अब मैं उन सिद्धो की वन्दना करता हूँ जो तीर्थकर परमदेव तथा भरत, राघव, पाण्डवादिक पूर्वकाल में वीतराग निर्विकल्प स्वसवेदन ज्ञान के बल से, शुद्धात्म स्वरूप को प्राप्त कर, कर्मों का नाश कर वर्तमान मे निर्वाण पद मे विराज रहे है । इसमे सशय नही है । कैसे है वे ? लोकालोक प्रकाशक केवलज्ञानरूप स्वसवेदन के बल से जो तीनो लोको मे भारी है, गुरु है, महान् है (भारी होते हुए भी वे भवसागर में नही गिरते है ।) व्यवहार नय से वे तीनो लोको को जानते है, निश्चय नय से वे अपने ही स्वरूप मे स्थित होते हुए निर्वाणपद मे विराज रहे है । **भावार्थ** यह है कि निर्वाणपद ही उपादेय है ।।४।।

अत ऊर्ध्व व्यवहारनिश्चयशुद्धात्मनो हि सिद्धास्तथापि निश्चयनयेन शुद्धात्मस्वरूपे तिष्ठन्तीति कथयति—

आगे व्यवहार नय से वे लोकालोक को देखने वाले है, तथापि निश्चय नय से वे अपने शुद्धात्म-स्वरूप में ही स्थित है, सो कहते है —

**ते पुणु वंदउँ सिद्ध-गण जे अप्पाणि वसंत ।**
**लोयालोउ वि सयलु इहु अच्छहिँ विमलु णियंत ।।५।।**

तान् पुनर्वन्दे सिद्धगणान् ये आत्मनि वसन्त ।
लोकालोकमपि सकल इह तिष्ठन्ति विमल पश्यन्त ।।५।।

**ते पुणु वंदउं सिद्धगण** तान् पुनर्वन्दे सिद्धगणान् । **जे अप्पाणि वसंत लोयालोउ वि सयलु इहु अत्थ(च्छ)हिं विमलु णियंत** ये आत्मनि वसन्तो लोकालोक सततस्वरूपपदार्थ निश्चयन्त इति । इदानी विशेष । तद्यथा-तान् पुनरहं वन्दे सिद्धगणान् सिद्धसमूहान् वन्दे कर्मक्षयनिमित्तम् । पुनरपि कथभूत सिद्धस्वरूपम् । चैतन्यानन्दस्वभाव लोकालोकव्यापिसूक्ष्मपर्यायशुद्धस्वरूप ज्ञानदर्शनोपयोगलक्षणम् । निश्चयएकीभूतव्यवहाराभावे स्वात्मनि अपि च सुखदु खभावाभावयोरेकीकृत्य स्वसवेद्यस्वरूपे स्वयत्ने तिष्ठन्ति । उपचरितासद्भूतव्यवहारे लोकालोकावलोकन स्वसंवेद्य प्रतिभाति, आत्मस्वरूपकैवल्य-

ज्ञानोपशमं यथा पुरुषार्थपदार्थदृष्टोः भवति तेषां बाह्यवृत्तिनिमित्तमुत्पत्तिस्थूलसूक्ष्म-परपदार्थव्यवहारात्मानमेव जानन्ति । यदि निश्चयेन तिष्ठन्ति तर्हि परकीयसुखदु:ख-परिज्ञाने सुखदु:खानुभवं प्राप्नोति, परकीयरागद्वेषहेतुपरिज्ञाने च रागद्वेषमयत्वं च प्राप्नोतीति महद्दूषणम् । अत्र यत् निश्चयेन स्वस्वरूपेऽवस्थानं भणितं तदेवोपादेयमिति भावार्थः ।।५।।

**पुणु** फिर **ते सिद्ध-गण वंदउँ** मैं उन सिद्ध गणों की वन्दना करता हूँ **जे अप्पाणि वसंत** जो निजस्वरूप मे बसते हुए **सयलु वि लोयालोउ इहु विमलु णियंत अच्छहिं** सकल लोकअलोक को संशय-रहित प्रत्यक्ष देखते हुए विद्यमान है ।।५।।

मैं कर्मक्षय हेतु फिर उन सिद्धो की वन्दना करता हूँ । कैसा है सिद्धस्वरूप ? चैतन्यानन्द स्वभाव वाला, लोकालोकव्यापी सूक्ष्मपर्यायिशुद्धस्वरूप वाला और ज्ञानदर्शनोपयोग लक्षण वाला है । जो निश्चय नय की अपेक्षा आत्मस्वरूप मे ही स्थित है और उपचरित असद्भूत व्यवहार नय की अपेक्षा सम्पूर्ण लोकअलोक को प्रत्यक्ष देखते है परन्तु जैसे आत्मस्वरूप मे तन्मयी है वैसे पर पदार्थों में तन्मयी नही है । यदि निश्चय से पर पदार्थों मे तन्मयता हो तो पर के सुख-दु ख के परिज्ञान से स्वय भी सुख-दु ख का अनुभव करने लगे और पर के रागद्वेष हेतु के परिज्ञान से स्वय भी रागद्वेषमयता को प्राप्त करे—यह बडा दूषण आता है । अत जो निश्चय नय की अपेक्षा आत्मस्वरूप मे अवस्थान कहा, वही अपना स्वरूप ही उपादेय है, यह **भावार्थ** हुआ ।।५।।

अथ निष्कलात्मान सिद्धपरमेष्ठिन नत्वेदानी तस्य सिद्धस्वरूपस्य तत्प्राप्त्युपायस्य च प्रतिपादक सकलात्मान नमस्करोमि—

निकल परमात्मा सिद्ध परमेष्ठी को नमस्कार कर अब उस सिद्धस्वरूप की प्राप्ति के उपाय का प्रतिपादन करने वाले सकल परमात्मा को नमस्कार करता हूँ—

**केवल-दंसण-णाणमय केवल-सुक्ख-सहाव ।**
**जिणवर वंदउं भत्तियए जेहिँ पयासिय भाव ।।६।।**

केवलदर्शनज्ञानमयान् केवलसुखस्वभावान् ।
जिनवरान् वन्दे भक्त्या यै प्रकाशिता भावा ।।६।।

केवलदर्शनज्ञानमया. केवलसुखस्वभावा ये तान् जिनवरानह वन्दे । कया । भक्त्या । यै. कि कृतम् । प्रकाशिता भावा जीवाजीवादिपदार्था इति । इतो विशेष. । केवलज्ञानाद्यनन्तचतुष्टयस्वरूपपरमात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभूतिरूपाभेदरत्नत्रयात्मक सुखदु:खजीवितमरणलाभालाभशत्रुमित्रसमानभावनाविनाभूतवीतरागनिर्विकल्पसमाधिपूर्व जिनोपदेश लब्ध्वा पश्चादनन्तचतुष्टयस्वरूपा जाता ये । पुनश्च कि कृतम् । यैः अनुवादरूपेण जीवादिपदार्थाः प्रकाशिता । विशेषेण तु कर्माभावे सति केवलज्ञानाद्य-

नन्तगुणस्वरूपलाभात्मको मोक्षः, शुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपाभेदरत्नत्रयात्मको मोक्षमार्गश्च, तानहं वन्दे । अत्रार्हद्गुणस्वरूपस्वशुद्धात्मस्वरूपमेवोपादेयमिति भावार्थः ॥६॥

**केवल-दंसरण णाणमय** जो केवलदर्शन और केवलज्ञानमय हैं **केवल-सुक्ख-सहाय** तथा केवल-सुख ही जिनका स्वभाव है और **जेहिं भाव पयासिय** जिन्होंने जीवाजीवादि सकल भाव यानी पदार्थों को प्रकाशित किया है, ऐसे उन **जिणवर भत्तिएं वंदउँ** जिनवरो की मैं भक्तिपूर्वक वन्दना करता हूँ ॥६॥

केवलज्ञानादि अनन्त चतुष्टय स्वरूप परमात्म तत्त्व के समीचीन श्रद्धान, ज्ञान और अनुभूति रूप अभेदरत्नत्रयपना जिनका स्वभाव है, तथा सुख-दुःख, जीवित-मरण, लाभ-अलाभ, शत्रु-मित्र सब मे सम भाव से उत्पन्न वीतराग निर्विकल्प समाधि से पूर्व जिनोपदेश (अरिहन्त परमेष्ठी के उपदेश) को पाकर जो बाद मे स्वयं अनन्त चतुष्टय स्वरूप हुए। पुनः क्या किया? जिन्होने यथार्थ-रूप से जीवादि पदार्थों का स्वरूप प्रकाशित किया। विशेषतः कर्मों का अभाव होने पर केवलज्ञानादि-अनन्त गुणो की प्राप्ति रूप मोक्ष को और शुद्धात्मा के सम्यक् श्रद्धान-ज्ञान-आचरणरूप अभेद रत्नत्रयात्मक मोक्षमार्ग को भी जिन्होने प्रकट किया, ऐसे उन जिनवरो को मैं भक्ति से नमस्कार करता हूँ। यहाँ अरिहन्त परमेष्ठी का केवलज्ञानादि गुणस्वरूप जो शुद्धात्मरूप है, वही उपादेय है, यह **भावार्थ** है ॥६॥

अथानन्तर भेदाभेदरत्नत्रयाराधकानाचार्योपाध्यायसाधून्नमस्करोमि—

अनन्तर, भेदाभेद रत्नत्रय के आराधक आचार्य, उपाध्याय और साधु परमेष्ठी को मैं नमस्कार करता हूँ—

**जे परमप्पु णियंति मुणि परम-समाहि धरेवि ।**
**परमाणंदह कारणिण तिण्णि वि ते वि णवेवि ॥७॥**

ये परमात्मानं पश्यन्ति मुनयः परमसमाधिं धृत्वा ।
परमानन्दस्य कारणेन त्रीनपि तानपि नत्वा ॥७॥

**जे परमप्पु णियंति मुणि** ये केचन परमात्मानं निर्गच्छन्ति स्वसंवेदनज्ञानेन जानन्ति मुनयस्तपोधनाः । किं कृत्वा पूर्वम् । **परमसमाहि धरेवि** रागादिविकल्परहितं परमसमाधिं धृत्वा । केन कारणेन । **परमाणंदह कारणिण** निर्विकल्पसमाधिसमुत्पन्न-सदानन्दपरमसमरसीभावसुखरसास्वादनिमित्तेन **तिण्णि वि ते वि णवेवि** त्रीनप्याचार्योपाध्यायसाधून् नत्वा नमस्कृत्येत्यर्थः । अतो विशेषः । अनुपचरितासद्भूतव्यवहार-संबन्धः द्रव्यकर्मनोकर्मरहितं तथैवाशुद्धनिश्चयसंबन्धमतिज्ञानादिविभावगुणनरनारका-दिविभावपर्यायरहितं च यच्चिदानन्दैकस्वभावं शुद्धात्मतत्त्वं तदेव भूतार्थं परमार्थरूपस-मयसारशब्दवाच्यं सर्वप्रकारोपादेयभूतं तस्माच्च यदन्यत्तद्धेयमिति । चलमलिनागाढ-रहितत्वेन निश्चयश्रद्धानबुद्धिः सम्यक्त्वं तत्राचरणं परिणमनं दर्शनाचारस्तत्रैव संशयवि-

पर्यासानध्यवसायरहितत्वेन स्वसंवेदनज्ञानरूपेण ग्राहकबुद्धिः सम्यग्ज्ञानं तत्राचरणं परिणमनं ज्ञानाचारः, तत्रैव शुभाशुभसंकल्पविकल्परहितत्वेन नित्यानन्दमयसुखरसास्वादस्थिरानुभवनं च सम्यक्चारित्रं तत्राचरणं परिणमनं चारित्राचारः, तत्रैव परद्रव्येच्छानिरोधेन सहजानन्दैकरूपेण प्रतपनं तपश्चरणं तत्राचरण परिणमन तपश्चरणाचारः, तत्रैव शुद्धात्मस्वरूपे स्वशक्त्यनवगूहनेनाचरण परिणमनं वीर्याचार इति निश्चयपञ्चाचाराः निःशङ्काद्यष्टगुणभेदो बाह्यदर्शनाचार., कालविनयाद्यष्टभेदो बाह्यज्ञानाचार, पञ्चमहाव्रतपञ्चसमितित्रिगुप्तिनिर्ग्रन्थरूपो बाह्यचारित्राचार, अनशनादिद्वादशभेदरूपो बाह्यतपश्चरणाचारः, बाह्यस्वशक्त्यनवगूहनरूपो बाह्यवीर्याचार इति । अयं तु व्यवहारपञ्चाचार पारंपर्येण साधक इति ।

विशुद्धज्ञानदर्शनस्वभावशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानबहिर्द्रव्येच्छानिवृत्तिरूप तपश्चरण स्वशक्त्यनवगूहनवीर्यरूपाभेदपञ्चाचाररूपात्मक शुद्धोपयोगभावनान्तर्भूतं वीतरागनिर्विकल्पसमाधिं स्वयमाचरन्त्यन्यानाचारयन्तीति भवन्त्याचार्यास्तानहं वन्दे । पञ्चास्तिकायषड्द्रव्यसप्ततत्त्वनवपदार्थेषु मध्ये शुद्धजीवास्तिकायशुद्धजीवद्रव्यशुद्धजीवतत्त्वशुद्धजीवपदार्थसंज्ञ स्वशुद्धात्मभावमुपादेयं तस्माच्चान्यद्धेयं कथयन्ति, शुद्धात्मस्वभावसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकं निश्चयमोक्षमार्गं च ये कथयन्ति ते भवन्त्युपाध्यायास्तानहं वन्दे । शुद्धबुद्धैकस्वभावशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणतपश्चरणरूपाभेदचतुर्विधनिश्चयाराधनात्मकवीतरागनिर्विकल्पसमाधिं ये साधयन्ति ते भवन्ति साधवस्तानहं वन्दे । अत्रायमेव ते समाचरन्ति कथयन्ति साधयन्ति च वीतरागनिर्विकल्पसमाधिं तमेवोपादेयभूतस्य स्वशुद्धात्मतत्त्वस्य साधकत्वादुपादेय जानीहीति भावार्थ. ॥७॥ इति **प्रभाकरभट्टस्य** पञ्चपरमेष्ठिनमस्कारकरणमुख्यत्वेन प्रथममहाधिकारमध्ये दोहकसूत्रसप्तक गतम् ।

**जे मुणि परमाणंदह कारणिण परम-समाहि धरेवि** जो मुनिगण परमसुख के रस का अनुभव करने के लिए परमसमाधि को धारण कर **परमप्पु णियंति** परमात्मा को देखते हैं, **ते वि तिण्णि वि णवेवि** उन तीनो आचार्य, उपाध्याय और साधुओं को भी नमस्कार करके मैं **'परमात्मप्रकाश'** का व्याख्यान करता हूँ ॥७॥

अनुपचरित-असद्भूत-व्यवहार नय से द्रव्यकर्म-नोकर्म से रहित, तथा अशुद्ध निश्चय नय की अपेक्षा मतिज्ञानादि विभावगुण और नर-नारकादि चतुर्गति रूप विभाव पर्यायों से रहित जो चिदानन्द एक अखण्ड स्वभाव शुद्धात्म तत्त्व है, वही भूतार्थ है, उसे ही परमार्थरूप समयसार शब्द से अभिहित करना चाहिए । वही आत्मा सबप्रकार से उपादेय है, उससे भिन्न अन्य सभी हेय हैं । चल[1]

---

१ जिस प्रकार एक ही जल अनेक कल्लोलरूप में परिणत होता है, उसी प्रकार जो सम्यग्दर्शन सभी तीर्थङ्कर या अर्हन्तों में समान अनन्त शक्ति के होने पर भी 'श्री शान्तिनाथ जी शान्ति के लिए और श्री पार्श्वनाथ जी रक्षा करने के लिए' समर्थ हैं, इस तरह नाना विषयों मे चलायमान होता है, उसको **चल सम्यग्दर्शन** कहते हैं ।

मलिन[1] और अगाढ[2] दोषोंसे रहित ऐसी निश्चय श्रद्धानबुद्धि **सम्यक्त्व है**। उसका आचरण यानी उस रूप परिणमन **दर्शनाचार है**, उसी निजस्वरूप मे सशय-विपर्यय-अध्यवसान[3] रहित स्वसवेदन ज्ञानरूप ग्राहक बुद्धि **सम्यग्ज्ञान** है, उसका आचरण-परिणमन **ज्ञानाचार है**, उसी शुद्धस्वरूप मे शुभ-अशुभ-सङ्कल्प-विकल्प रहित नित्यानन्दमय सुख रस के आस्वाद का निश्चल अनुभवन **सम्यक्चारित्र** है और उस रूप आचरण-परिणमन **चारित्राचार** है। उसी शुद्धस्वरूप में पर-द्रव्य की इच्छा का निरोध कर सहज आनन्द स्वरूप **में प्रतपन तपश्चरण** है और उसका आचरण परिणमन **तपश्चरणाचार** है। उसी **शुद्धात्म** स्वरूप मे अपनी शक्ति को प्रकट कर आचरण परिणमन **वीर्याचार** है। ये निश्चय पञ्चाचार है। नि.शङ्कितादि अष्ट अग भेदरूप **बाह्य दर्शनाचार** कालविनय आदि आठ भेदवाला **बाह्य ज्ञानाचार,** पाच महाव्रत, पाँच समिति, तीनगुप्तिमय निर्ग्रन्थरूप **बाह्य चारित्राचार,** अनशनादि बारह भेदरूप **बाह्य तपश्चरणाचार** और बाह्य मे अपनी शक्ति को न छिपाते हुए आचरण **बाह्य-वीर्याचार है**। यह व्यवहार पञ्चाचार है जो परम्परा से मोक्ष का साधक है।

विशुद्ध ज्ञानदर्शन स्वभावमय शुद्धात्म तत्त्व का सम्यक्श्रद्धान, ज्ञान, आचरण तथा परद्रव्य की इच्छानिवृत्ति रूप तपश्चरण और अपनी शक्ति के प्रकटीकरण रूप, निश्चय-अभेद पञ्चाचार मय शुद्धोपयोग की भावना मे अन्तर्भूत वीतरागनिर्विकल्प समाधि का जो स्वय आचरण करते है और दूसरो से भी करवाते है, वे **आचार्य** कहलाते है। मै उनकी वन्दना करता हूँ। पञ्चास्तिकाय, षट्द्रव्य, सात तत्त्व, नव पदार्थों मे शुद्धजीवास्तिकाय, शुद्धजीवद्रव्य, शुद्धजीवतत्त्व और शुद्धजीवपदार्थ सज्ञावाला स्व-शुद्धात्मभाव ही ग्रहण करने योग्य है और इससे भिन्न अन्य हेय है, जो ऐसा कहते है तथा यह भी कहते है कि शुद्धात्म स्वभाव का सम्यक् श्रद्धान, ज्ञान और आचरण रूप अभेद रत्नत्रयात्मक निश्चय मोक्षमार्ग है, वे **उपाध्याय** होते है, मै उन्हे नमस्कार करता हूँ। शुद्ध ज्ञान स्वभाव शुद्धात्मतत्त्व की समीचीन श्रद्धा, ज्ञान और तपश्चरण रूप अभेद चतुर्विध निश्चय आराधनात्मक वीतरागनिर्विकल्प समाधि को जो साधते है वे **साधु** होते है, मै उन्हे नमस्कार करता हूँ। इसी शुद्धात्म स्वरूप का वे आचरण करते है, कथन करते है और वीतरागनिर्विकल्प समाधि को साधते है। उसी उपादेयरूप स्वशुद्धात्मतत्त्व की साधक होने से यह वीतरागनिर्विकल्प समाधि ही उपादेय जानो, यह **भावार्थ है**। इसप्रकार प्रभाकर भट्ट के लिए उपदिष्ट पञ्च परमेष्ठियो को नमस्कार करने की मुख्यता से कथित परमात्मप्रकाश ग्रन्थ के प्रथम महाधिकार मे सात दोहो का कथन पूर्ण हुआ ।।७।।

अथ **प्रभाकरभट्टः** पूर्वोक्तप्रकारेण पञ्चपरमेष्ठिनो नत्वा पुनरिदानी **श्रीयोगीन्द्रदेवान्** विज्ञापयति—

अब प्रभाकर भट्ट पूर्वोक्त प्रकार से पाँचो परमेष्ठियो को नमस्कार कर गुरु श्री योगीन्दुदेव से विनय करते है -

---

१ जिस प्रकार शुद्ध सुवर्ण भी मल के निमित्त से मलिन कहा जाता है, उसी तरह सम्यक्त्वप्रकृति के उदय से जिसमे पूर्ण निर्मलता नही है, उसको **मलिन सम्यग्दर्शन** कहते है।

२. जिस तरह वृद्ध पुरुष के हाथ मे ठहरी हुई भी लाठी काँपती है, उसी तरह जिस सम्यग्दर्शन के होते हुए भी अपने बनवाए हुए मन्दिरादि मे 'यह मेरा मन्दिर है' और दूसरे के बनवाए हुए मे 'यह दूसरे का है' ऐसा भ्रम हो उसको **अगाढ सम्यग्दर्शन** कहते है।

—गोम्मटसार जीवकाण्ड १/२५ प खूबचन्द जैन की टीका

३. अनिश्चित तथा विकल्परहित ज्ञान।

**भावि पणविवि पंच-गुरु सिरि-जोइंदु-जिणाउ ।**
**भट्टपहायरि विण्णविउ विमलु करेविणु भाउ ॥८॥**

भावेन प्रणम्य पञ्चगुरून् श्रीयोगीन्दुजिनः ।
भट्टप्रभाकरेण विज्ञापित. विमल कृत्वा भावम् ॥८॥

**भावि पणविवि पंचगुरु** भावेन भावशुद्ध्या प्रणम्य । कान् । पञ्चगुरून् । पश्चात्किं कृतम् । **सिरिजोइंदुजिणाउ भट्टपहायरि विण्णविउ विमलु करेविणु भाउ** श्रीयोगीन्दुदेवनामा भगवान् **प्रभाकरभट्टेन** कर्तृभूतेन विज्ञापित विमलं कृत्वा भावं परिणाममिति । अत्र **प्रभाकरभट्टः** शुद्धात्मतत्त्वपरिज्ञानार्थं **श्रीयोगीन्दुदेवं** भक्तिप्रकर्षेण विज्ञापितवानित्यर्थ ॥८॥

**भावि पंचगुरु पणविवि** भावशुद्धिपूर्वक पञ्च परमेष्ठियो को प्रणाम कर **भट्ट पहायरि भाउ विमलु करेविणु सिरि-जोइंदु-जिणाउ विण्णविउ** प्रभाकर भट्ट आत्मपरिणामो को विमल करके श्री योगीन्दुदेव से निवेदन करते हैं ॥८॥ यहाँ प्रभाकर भट्ट शुद्धात्मतत्त्व को जानने के लिए श्री योगीन्दु देव को भक्तिपूर्वक सूचित करते है कि —

तद्यथा—

**गउ संसारि वसंताहँ सामिय कालु अणंतु ।**
**पर मइँ किं पि ण पत्तु सुहु दुक्खु जि पत्तु महंतु ॥९॥**

गत ससारे वसता स्वामिन् काल अनन्त. ।
पर मया किमपि न प्राप्त सुख दु खमेव प्राप्त महत् ॥९॥

**गउ संसारि वसंताहं सामिय कालु अणंतु** गत ससारे वसतां तिष्ठतां हे स्वामिन् । कोऽसौ । काल. । कियान् । अनन्त । **पर मइं किं पि ण पत्तु सुहु दुक्खु जि पत्तु महंतु** परं किंतु मया किमपि न प्राप्त सुख दु खमेव प्राप्त महदिति । इतो विस्तर । तथाहि— स्वशुद्धात्मभावनासमुत्पन्नवीतरागपरमानन्दसमरसीभावरूपसुखामृतविपरीतनारकादिदुःखरूपेण क्षारनीरेण पूर्णे अजरामरपदविपरीतजातिजरामरणरूपेण मकरादिजलचरसमूहेन सकीर्णे अनाकुलत्वलक्षणपारमार्थिकसुखविपरीतनानामानसादिदु.खरूपवडवानलशिखासदीपिताभ्यन्तरे वीतरागनिर्विकल्पसमाधिविपरीतसंकल्पविकल्पजालरूपेण कल्लोलमालासमूहेन विराजिते ससारसागरे वसता तिष्ठता हे स्वामिन्ननन्तकालो गत. । कस्मात् । एकेन्द्रियविकलेन्द्रियपञ्चेन्द्रियसंज्ञिपर्याप्तमनुष्यत्वदेशकुलरूपेन्द्रियपटुत्वनिर्व्याध्यायुष्कवरबुद्धिसद्धर्मश्रवणग्रहणधारणश्रद्धानसंयमविषयसुखव्यावर्तनक्रोधादिकषायनिवर्तनेषु परंपरया दुर्लभेषु । कथंभूतेषु । लब्धेष्वपि तपोभावनाधर्मेषु शुद्धात्मभावनाधर्मेषु शुद्धात्म-

भावनालक्षणस्य वीतरागनिर्विकल्पसमाधिदुर्लभत्वात् । तदपि कथम् । वीतरागनिर्विकल्पसमाधिबोधिप्रतिपक्षभूतानां मिथ्यात्वविषयकषायादिविभावपरिणामानां प्रबलत्वादिति । सम्यग्दर्शनज्ञानचारित्राणामप्राप्तप्रापण बोधिस्तेषामेव निर्विघ्नेन भवान्तरप्रापण समाधिरिति बोधिसमाधिलक्षण यथासभव सर्वत्र ज्ञातव्यम् । तथा चोक्तम्—"इत्यतिदुर्लभरूपां बोधि लब्ध्वा यदि प्रमादी स्यात् । ससृतिभीमारण्ये भ्रमति वराको नर सुचिरम् ।।" पर किंतु बोधिसमाध्यभावे पूर्वोक्तससारे भ्रमतापि मया शुद्धात्मसमाधिसमुत्पन्नवीतरागपरमानन्दसुखामृत किमपि न प्राप्त किंतु तद्विपरीतमाकुलत्वोत्पादक विविधशारीरमानसरूप चतुर्गतिभ्रमणसभव दु खमेव प्राप्तमिति । अत्र यस्य वीतरागपरमानन्दसुखस्यालाभे भ्रमितो जीवस्तदेवोपादेयमिति भावार्थ ।।६।।

**सामिय संसारि वसंताहँ अणंतु कालु गउ** हे स्वामिन् ! ससार मे रहते हुए मेरा अनन्त काल बीत गया **पर मइँ किं पि सुहु ण पत्तु** परन्तु मैने कुछ भी सुख प्राप्त नही किया **महंतु दुक्खु जि पत्तु** महान् भीषण दु ख ही पाया है ।।६।।

अपनी शुद्धात्मभावना मे उत्पन्न वीतराग परमानन्द समरसी भावरूप सुखामृत से विपरीत नरकादि दु खरूप खारे जल से परिपूर्ण, अजर-अमर पद से विपरीत जन्म-जरा-मरण रूपी मगरादि जलचरो से व्याप्त, अनाकुलता रूप निश्चय सुख से विपरीत नाना शारीरिक मानसिक दु खरूपी बडवानल की लपटो से प्रज्वलित, वीतराग निर्विकल्प समाधि से रहित, सङ्कल्प-विकल्पो के जालरूपी तरङ्गसमूहो से शोभित इस ससार रूपी सागर मे रहते हुए मुझे हे स्वामिन् ! अनन्त काल बीत चुका। कैसे ? इस ससार मे एकेन्द्रिय से विकलत्रय पर्याय पाना कठिन है, उसमे पञ्चेन्द्रिय सज्ञी, पर्याप्तियो की पूर्णता पाना दुर्लभ है, उसमे भी मनुष्य होना अत्यन्त दुर्लभ है, उसमे आर्यक्षेत्र, उत्तमकुल सुन्दररूप, इन्द्रियो की पटुता, दीर्घायु, नीरोगशरीर, उत्तमबुद्धि, सद्धर्म का श्रवण, ग्रहण और धारण श्रद्धान, सयम, विषयसुखो से निवृत्ति क्रोधादि कषायो का अभाव होना उत्तरोत्तर दुर्लभ है। शुद्धात्मभावना और तपोभावना के प्राप्त होने पर भी वीतरागनिर्विकल्पसमाधि का होना बहुत दुर्लभ है। क्योकि वीतरागनिर्विकल्पसमाधि बोधि के विरोधी जो मिथ्यात्व-विषय-कषायादिविभाव परिणाम है, उनकी प्रबलता है। अत. सम्यग्दर्शन-ज्ञान और चारित्र की प्राप्ति नही होती। इनकी उपलब्धि ही **बोधि** है और निर्विघ्नतया इनका धारण हो **समाधि** है। यथासम्भव बोधि-समाधि का यही लक्षण सर्वत्र जानना चाहिए। **कहा भी है**–"इस अतिदुर्लभ बोधि को पाकर भी जो मनुष्य प्रमादी बना रहता है, वह दरिद्र बेचारा, संसाररूपी भयङ्करवन मे बहुत काल तक घूमता रहता है।" इस बोधि-समाधि का अभाव होने के कारण ससार-सागर मे भटकते हुए मैने शुद्धात्मसमाधि से उत्पन्न होने वाला वीतरागपरमानन्द सुखामृत किञ्चित् भी प्राप्त नही किया, अपितु, इसके विपरीत आकुलता उत्पादक आधि-व्याधिरूप दु ख ही चारो गतियो मे भटकते हुए प्राप्त किया है। **भावार्थ** यह है कि जिस वीतरागपरमानन्द सुख के अभाव मे यह जीव भटक रहा है, वही सुख इसके लिए उपादेय है ।।६।।

अथ यस्यैव परमात्मस्वभावस्यालाभेऽनादिकाले भ्रमितो जीवस्तमेव पृच्छति—

अब, जिस परमात्मस्वभाव को उपलब्ध न होने पर यह जीव अनादिकाल से भटक रहा है, उसी के सम्बन्ध में (प्रभाकर भट्ट) पूछते है —

**चउ-गइ-दुक्खहँ तत्ताहँ जो परमप्पउ कोइ ।**
**चउ-गइ-दुक्ख-विणासयरु कहहु पसाएँ सो वि ॥१०॥**

चतुर्गतिदुःखैः तप्तानां यः परमात्मा कश्चित् ।
चतुर्गतिदुःखविनाशकरः कथय प्रसादेन तमपि ॥१०॥

**चउगइदुक्खहं तत्ताहं जो परमप्पउ कोइ** चतुर्गतिदुःखतप्तानां जीवानां यः कश्चिच्चिदानन्दैकस्वभावः परमात्मा । पुनरपि कथंभूतः । **चउगइदुक्खविणासयरु** आहारभयमैथुनपरिग्रहसंज्ञारूपादिसमस्तविभावरहितानां वीतरागनिर्विकल्पसमाधिबलेन परमात्मोत्थसहजानन्दैकसुखामृतसंतुष्टानां चतुर्गतिदुःखविनाशकः **कहहु पसाएं सो वि** हे भगवन् तमेव परमात्मानं महाप्रसादेन कथयेति । अत्र योऽसौ परमसमाधिरतानां चतुर्गतिदुःखविनाशकः स एव सर्वप्रकारेणोपादेय इति तात्पर्यार्थः ॥१०॥ एवं त्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्ये **प्रभाकरभट्ट**विज्ञप्तिकथनमुख्यत्वेन दोहकसूत्रत्रयं गतम् ।

**चउ-गइ-दुक्खहं** चारों गतियों के दुःखों से **तत्ताहं** सन्तप्त जीवों के **चउ-गइ-दुक्ख-विणासयरु** चतुर्गतिरूप दुःखों का विनाश करने वाला **जो कोइ परमप्पउ** जो कोई परमात्मा है **सो वि पसाएँ कहहु** उसको कृपा करके आप कहिए ।

जो आहार-भय-मैथुन-परिग्रह संज्ञादि समस्त विभावों में रहित तथा वीतराग निर्विकल्पसमाधि के बल से स्वभावोत्पन्न सहजानन्द सुखामृत में सन्तुष्ट जीवों के चतुर्गतिभ्रमणरूप दुःख का नाशक है हे भगवन् ! आप कृपा कर उस परमात्मा का स्वरूप मुझे कहिए । जो परमात्मा परमसमाधि में लीन, जीवों के चारों गतियों के दुःख का विनाशक है । वही सब प्रकार से उपादेय है, यह **भावार्थ** है । इसप्रकार त्रिविध आत्मा का प्रतिपादन करने वाले प्रथम महाधिकार में प्रभाकरभट्ट के कथन की मुख्यता से तीन दोहे पूर्ण हुए ॥१०॥

अथ **प्रभाकरभट्ट**विज्ञापनानन्तरं श्रीयोगीन्द्रदेवास्त्रिविधात्मानं कथयन्ति—

अब प्रभाकरभट्ट की विनती के बाद श्रीयोगीन्दुदेव त्रिविध आत्मा का व्याख्यान करते हैं ।

**पुणु पुणु पणविवि पंच-गुरु भावें चित्ति धरेवि ।**
**भट्टपहायर णिसुणि तुहुँ अप्पा तिविहु कहेवि (विं ?) ॥११॥**

पुनः पुनः प्रणम्य पञ्चगुरून् भावेन चित्ते धृत्वा ।
भट्टप्रभाकर निश्रृणु त्वम् आत्मानं त्रिविधं कथयामि ॥११॥

**पुणु पुणु पणविवि पंचगुरु भावें चित्ति धरेवि** पुनः पुनः प्रणम्य पञ्चगुरूनहम् । किं कृत्वा । भावेन भक्तिपरिणामेन मनसि धृत्वा पश्चात् **भट्टपहायर णिसुणि तुहुं अप्पा तिविहु कहेवि** हे प्रभाकरभट्ट ! निश्चयेन शृणु त्वं त्रिविधमात्मानं कथयाम्यहमिति ।

बहिरात्मान्तरात्मपरमात्मभेदेन त्रिविधात्मा भवति । अयं त्रिविधात्मा यथा त्वया पृष्टो हे **प्रभाकरभट्ट** तथा भेदाभेदरत्नत्रयभावनाप्रिया: परमात्मभावनोत्थवीतरागपरमानन्द-सुधारसपिपासिता वीतरागनिर्विकल्पसमाधिसमुत्पन्नसुखामृतविपरीतनारकादिदु:खभय-भीता भव्यवरपुण्डरीका भरत-सगर-राम-पाण्डव-श्रेणिकादयोऽपि वीतरागसर्वज्ञतीर्थकर-परमदेवानां समवसरणे सपरिवारा भक्तिभरनमितोत्तमाङ्गा सन्त. सर्वागमप्रश्नानन्तरं सर्वप्रकारोपादेयं शुद्धात्मान पृच्छन्तीति । अत्र त्रिविधात्मस्वरूपमध्ये शुद्धात्मस्वरूपमुपा-देयमिति भावार्थ ।।११।।

**पुणुपुणु पंचगुरु पणविवि** बार-बार पञ्चपरमेष्ठियो को प्रणाम कर **भावें चित्ति धरेवि** और निर्मल भावो को चित्त में धारण कर **तिविहु अप्पा कहेवि** मैं तीन प्रकार के आत्मा का कथन करता हूँ, **भट्टपहायर तुहुं णिसुणि** हे प्रभाकरभट्ट ! तू उसे सुन ।

बहिरात्मा, अन्तरात्मा और परमात्मा के भेद से आत्मा तीन प्रकार का है । यह त्रिविधात्मा जैसा तेरे द्वारा पूछा गया है हे प्रभाकरभट्ट ! उसी प्रकार से पहले भेदाभेदरत्नत्रय की भावना जिनको प्रिय थी, परमात्मा की भावना से उत्पन्न वीतराग परमानन्दामृत के जो पिपासु थे, वीतराग निर्विकल्पसमाधि से उत्पन्न सुखामृत से विपरीत नरकादिदु:खो से जो भयभीत थे, ऐसे भव्यो में श्रेष्ठ भरत-सगर-राम-पाण्डव-श्रेणिक आदि ने भी वीतराग सर्वज्ञ तीर्थङ्कर परमदेव के समवसरण में सपरिवार आकर भक्तिभाव से नतमस्तक होकर सर्व आगमो के प्रश्नो के बाद सब प्रकार से उपादेय शुद्धात्मा का ही स्वरूप पूछा था । तीन प्रकार के आत्मा के स्वरूप मे शुद्धात्म-स्वरूप ही उपादेय है, यह **भावार्थ** है ।।११।।

अथ त्रिविधात्मान ज्ञात्वा बहिरात्मान विहाय स्वसंवेदनज्ञानेन पर परमात्मान भावय त्वमिति प्रतिपादयति—

आगे कहते है कि तू आत्मा को तीन प्रकार का जानकर बहिरात्मपने को छोडकर स्वसंवेदनज्ञान के बल से उत्कृष्ट परमात्मा की भावना कर —

**अप्पा ति-विहु मुणेवि लहु मूढउ मेल्लहि भाउ ।**
**मुणि सण्णाणें णाणमउ जो परमप्प-सहाउ ।।१२।।**

आत्मान त्रिविध मत्वा लघु मूढ मुञ्च भावम् ।
मन्यस्व स्वज्ञानेन ज्ञानमय य परमात्मस्वभाव ।।१२।।

**अप्पा तिविहु मुणेवि लहु मूढउ मेल्लहि भाउ** हे **प्रभाकरभट्ट** आत्मान त्रिविधं मत्वा लघु शीघ्रं मूढ बहिरात्मस्वरूप भावं परिणाम मुञ्च । **मुणि सण्णाणें णाणमउ जो परमप्पसहाउ** पश्चात् त्रिविधात्मपरिज्ञानानन्तरं मन्यस्व जानीहि । केन करणभूतेन । अन्तरात्मलक्षणवीतरागनिर्विकल्पस्वसंवेदनज्ञानेन । कं जानीहि । य परमात्मस्वभावम् ।

किंविशिष्टम् । ज्ञानमयं केवलज्ञानेन निर्वृत्तमिति । अत्र योऽसौ स्वसंवेदनज्ञानेन परमात्मा ज्ञातः स एवोपादेय इति भावार्थः । स्वसंवेदनज्ञाने वीतरागविशेषणं किमर्थमिति पूर्वपक्षः, परिहारमाह—विषयानुभवरूपस्वसंवेदनज्ञानं सरागमपि दृश्यते तन्निषेधार्थमित्यभिप्रायः ॥१२॥

**अप्पा ति-विहु मुणेवि** आत्मा को तीन प्रकार का जानकर **मूढउ भाउ लहु मेल्लहि** बहिरात्म भाव को शीघ्र छोड़ और **जो णाणमउ परमप्पसहाउ सण्णाणें मुणि** जो ज्ञान से परिपूर्ण परमात्मस्वभाव है उसे स्वसंवेदनज्ञान के बल से अन्तरात्मा होकर जान। यहाँ जो स्वसंवेदनज्ञान से परमात्मा जाना गया है वही उपादेय है, यह **भावार्थ** हुआ। स्वसंवेदनज्ञान में वीतराग विशेषण क्यों कहा, शिष्य के ऐसा प्रश्न करने पर आचार्य उसका परिहार करते हुए कहते हैं कि विषयानुभवरूप स्वसंवेदनज्ञान सराग भी होता है, उसका निषेध करने के लिए ऐसा कहा है ॥१२॥

अथ त्रिविधात्मसंज्ञा बहिरात्मलक्षणं च कथयति—

अब त्रिविधात्मा में पहले बहिरात्मा का लक्षण कहते हैं—

**मूढु वियक्खणु बंभु परु अप्पा ति-विहु हवेइ ।**
**देहु जि अप्पा जो मुणइ सो जणु मूढु हवेइ ॥१३॥**

मूढो विचक्षणो ब्रह्मा परः आत्मा त्रिविधो भवति ।
देहमेव आत्मानं यो मनुते स जनो मूढो भवति ॥१३॥

**मूढु वियक्खणु बंभु परु अप्पा तिविहु हवेइ** मूढो मिथ्यात्वरागादिपरिणतो बहिरात्मा, विचक्षणो वीतरागनिर्विकल्पस्वसंवेदनज्ञानपरिणतोऽन्तरात्मा, ब्रह्मा शुद्धबुद्धैकस्वभावः परमात्मा । शुद्धबुद्धस्वभावलक्षणं कथ्यते—शुद्धो रागादिरहितो बुद्धोऽनन्तज्ञानादिचतुष्टयसहित इति शुद्धबुद्धस्वभावलक्षणं सर्वत्र ज्ञातव्यम् । स च कथंभूतः ब्रह्मा । परमो भावकर्मद्रव्यकर्मनोकर्मरहितः । एवमात्मा त्रिविधो भवति । **देहु जि अप्पा जो मुणइ सो जणु मूढु हवेइ** वीतरागनिर्विकल्पसमाधिसंजातसदानन्दैकसुखामृतस्वभावमलभमानः सन् देहमेवात्मानं यो मनुते जानाति स जनो लोको मूढात्मा भवति इति । अत्र बहिरात्मा हेयस्तदपेक्षया यद्यप्यन्तरात्मोपादेयस्तथापि सर्वप्रकारोपादेयभूतपरमात्मापेक्षया स हेय इति तात्पर्यार्थः ॥१३॥

**मूढु वियक्खणु बंभु परु अप्पा तिविहु हवेइ** मूर्ख बहिरात्मा, विचक्षण अन्तरात्मा और शुद्धबुद्ध स्वभाव परमात्मा, इस प्रकार आत्मा तीन प्रकार का है। **जो देहु जि अप्पा मुणइ सो जणु मूढु हवेइ** जो देह को ही आत्मा मानता है वह मनुष्य मूर्ख बहिरात्मा है।

मूढ यानी मिथ्यात्वरागादि से परिणत बहिरात्मा, विचक्षण यानी वीतरागनिर्विकल्प स्वसंवेदनज्ञान से परिणत अन्तरात्मा और ब्रह्मा यानी शुद्धबुद्ध स्वभाव वाला परमात्मा—आत्मा के

ये तीन प्रकार है। शुद्धबुद्ध स्वभाव का लक्षण है—शुद्ध यानी रागादि रहित, बुद्ध यानी अनन्त-ज्ञानादि चतुष्टय सहित और वह ब्रह्मा कैसा है? भावकर्म, द्रव्यकर्म, नोकर्म से सर्वथा रहित है। वीतराग निर्विकल्प समाधि से समुत्पन्न परमानन्द सुखामृतस्वभाव को प्राप्त न करते हुए जो देह को ही आत्मा मानता है, जानता है वह मनुष्य अज्ञानी बहिरात्मा होता हैं। इनमें से बहिरात्मा तो हेय है, छोडने योग्य है, इसकी अपेक्षा अन्तरात्मा उपादेय है तथापि सर्वप्रकार से उपादेयभूत परमात्मा की अपेक्षा वह अन्तरात्मा भी हेय है, यह **भावार्थ** जानना ।।१३।।

अथ परमसमाधिस्थितः सन् देहविभिन्नं ज्ञानमयं परमात्मानं योऽसौ जानाति सोऽन्तरात्मा भवतीति निरूपयति—

अब, परम समाधि मे स्थित होते हुए देह से भिन्न ज्ञानमय परमात्मा को जो जानता है, वह अन्तरात्मा होता है, सो कहते है—

**देह-विभिण्णउ णाणमउ जो परमप्पु णिएइ ।**
**परम-समाहि-परिट्ठियउ पंडिउ सो जि हवेइ ।।१४।।**

देहविभिन्नं ज्ञानमयं यः परमात्मानं पश्यति ।
परमसमाधिपरिस्थितः पण्डितः स एव भवति ।।१४।।

**देहविभिण्णउ णाणमउ जो परमप्पु णिएइ** अनुपचरितासद्भूतव्यवहारनयेन देहादभिन्नं निश्चयनयेन भिन्नं ज्ञानमयं केवलज्ञानेन निर्वृत्तं परमात्मानं योऽसौ जानाति **परमसमाहिपरिट्ठियउ पंडिउ सो जि हवेइ** वीतरागनिर्विकल्पसहजानन्दैकशुद्धात्मानुभूति-लक्षणपरमसमाधिस्थितः सन् पण्डितोऽन्तरात्मा विवेकी स एव भवति। "कः पण्डितो विवेकी" इति वचनात्, इति अन्तरात्मा हेयरूपो, योऽसौ परमात्मा भणितः स एव साक्षादुपादेय इति भावार्थः ।।१४।।

**जो परमप्पु देह विभिण्णउ णाणमउ णिएइ** जो परमात्मा को शरीर से भिन्न ज्ञानमय जानता है **सो जि परमसमाहिपरिट्ठियउ पंडिउ हवेइ** वही परमसमाधि मे ठहरते हुए पण्डित विवेकी अन्तरात्मा होता है। अनुपचरित-असद्भूत-व्यवहार नय की अपेक्षा देहादि से भिन्न और निश्चय नय की अपेक्षा ज्ञानमय, केवलज्ञान से परिपूर्ण परमात्मा को जो जानता है तथा वीतराग-निर्विकल्प सहजानन्द शुद्धात्मा की अनुभूतिरूप परमसमाधि मे स्थित होता हुआ जानता है, वही पण्डित अन्तरात्मा विवेकी होता है। यह अन्तरात्मा भी हेय रूप है, उपादेय तो साक्षात् परमात्मा ही है, यह **भावार्थ** है ।।१४।।

अथ समस्तपरद्रव्यं मुक्त्वा केवलज्ञानमयकर्मरहितशुद्धात्मा येन लब्धः स परमात्मा भवतीति कथयति—

अब, समस्त पर-द्रव्यों को छोडकर जिसने केवलज्ञानमय कर्मरहित शुद्धात्मा को प्राप्त कर लिया, वही परमात्मा होता है, सो कहते है—

**अप्पा लद्धउ णाणमउ कम्म-विमुक्कें जेण ।**
**मेल्लिवि सयलु वि दव्वु परु सो परु मुणहि मणेण ।।१५।।**

आत्मा लब्धो ज्ञानमयः कर्मविमुक्तेन येन ।
मुक्त्वा सकलमपि द्रव्यं परं तं परं मन्यस्व मनसा ।।१५।।

**अप्पा लद्धउ णाणमउ कम्मविमुक्कें जेण** आत्मा लब्धः प्राप्तः । किंविशिष्टः । ज्ञानमयः केवलज्ञानेन निर्वृत्तः । कथंभूतेन सता । ज्ञानावरणादिद्रव्यकर्मभावकर्मरहितेन येन । किं कृत्वात्मा लब्धः । **मेल्लिवि सयलु वि दव्वु परु सो परु मुणहि मणेण ।** मुक्त्वा परित्यज्य । किम् । परं द्रव्यं देहरागादिकम् । सकलं कतिसंख्योपेतं समस्तमपि । तमित्थंभूतमात्मानं परं परमात्मानमिति मन्यस्व जानीहि हे **प्रभाकरभट्ट** । केन कृत्वा । मायामिथ्यानिदानशल्यत्रयस्वरूपादिसमस्तविभावपरिणामरहितेन मनसेति । अत्रोक्त-लक्षणपरमात्मा उपादेयो ज्ञानावरणादिसमस्तविभावरूपं परद्रव्यं तु हेयमिति भावार्थः ।।१५।। एवंविधात्मप्रतिपादकप्रथममहाधिकारमध्ये संक्षेपेण त्रिविधात्मसूचनमुख्यतया सूत्रपञ्चकं गतम् । तदनन्तरं मुक्तिगतकेवलज्ञानादिव्यक्तिरूपसिद्धजीवव्याख्यानमुख्यत्वेन दोहकसूत्रदशकं प्रारभ्यते । तद्यथा ।

**जेण कम्मविमुक्के सयलु वि परु दव्वु मेल्लिवि णाणमउ अप्पा लद्धउ सो परु मणेण मुणहि** जिसने कर्मों का नाश करके और सकल पर-द्रव्यों का परित्याग करके ज्ञानमय आत्मा को प्राप्त किया है, उसे शुद्धमन से परमात्मा जानो। हे प्रभाकर भट्ट ! जिसने पर द्रव्य को छोड़कर और ज्ञानावरणादि द्रव्यकर्म और रागादि भावकर्म से रहित होकर आत्मोपलब्धि कर ली है ऐसी आत्मा को तू माया मिथ्या निदान रूप त्रिशल्य एवं समस्त विकारी परिणामों से रहित निर्मल चित्त में परमात्मा जान। यह उक्त लक्षणवाला परमात्मा ही उपादेय है, ज्ञानावरणादि समस्त विभावरूप परद्रव्य हेय है, यह **भावार्थ** है ।।१५।।

इसप्रकार त्रिविधात्मा का प्रतिपादन करने वाले प्रथम अधिकार में संक्षेप में पाँच दोहासूत्रों का कथन किया। अब मुक्त हुए, केवलज्ञानादि प्राप्त सिद्ध जीवों के व्याख्यान की मुख्यता से दस दोहासूत्र प्रारम्भ करते हैं।

लक्ष्यमलक्ष्येण धृत्वा हरिहरादिविशिष्टपुरुषा यं ध्यायन्ति तं परमात्मानं जानी-हीति प्रतिपादयति—

हरिहरादिक विशिष्ट पुरुष मन की स्थिरतापूर्वक जिसका ध्यान करते हैं, उसी परमात्मा का तू भी ध्यान कर सो कहते हैं -

**तिहुयण-वंदिउ सिद्धि-गउ हरि-हर झायहिँ जो जि ।**
**लक्खु अलक्खें धरिवि थिरु मुणि परमप्पउ सो जि ।।१६।।**

त्रिभुवनवन्दित सिद्धिगतं हरिहरा ध्यायन्ति यमेव ।
लक्ष्यमलक्ष्येण धृत्वा स्थिर मन्यस्व परमात्मानं तमेव ।।१६।।

**तिहुयण-वंदिउ सिद्धि-गउ हरि-हर झायहिं जो जि** त्रिभुवनवन्दितं सिद्धिगतं यं केवलज्ञानादिव्यक्तिरूपं परमात्मान हरिहरहिरण्यगर्भादयो ध्यायन्ति । किं कृत्वा पूर्वम् । **लक्खु अलक्खें धरिवि थिरु** लक्ष्य संकल्परूप चित्तम् । अलक्ष्येण वीतरागनिर्विकल्प-नित्यानन्दैकस्वभावपरमात्मरूपेण धृत्वा । कथभूतम् । स्थिर परीषहोपसर्गैरक्षुभित **मुणि-परमप्पउ सो जि** तमित्थभूतं परमात्मान हे **प्रभाकरभट्ट** मन्यस्व जानीहि भावयेत्यर्थ । अत्र केवलज्ञानादिव्यक्तिरूपमुक्तिगतपरमात्मसदृशो रागादिरहित स्वशुद्धात्मा साक्षादुपादेय इति भावार्थः ।।१६।। सकल्पविकल्पस्वरूप कथ्यते । तद्यथा—**बहिर्द्रव्यविषये पुत्रकलत्रादिचेतनाचेतनरूपे ममेदमिति स्वरूपः संकल्पः, अहं सुखी दुःखीत्यादि-चित्तगतो हर्षविषादादिपरिणामो विकल्प इति ।** एवं सकल्पविकल्पलक्षण सर्वत्र ज्ञातव्यम् ।

**हरिहर तिहुयण वंदिउ सिद्धिगउ जो जि झायहि** इन्द्र, नारायण और रुद्र आदि त्रिभुवन-वन्दनीय, सिद्धपने को प्राप्त जिस परमात्मा का ध्यान करते है **लक्खु अलक्खे थिरु धरिवि सो जि परमप्पउ मुणि** अपने मन को उसी परमात्मा मे स्थिर करके उसे ही परमात्मा मानकर चिन्तन कर । हे प्रभाकर भट्ट ! केवलज्ञानादि व्यक्तरूप, मुक्तिगत परमात्मा के समान रागादिरहित स्वशुद्ध आत्मा ही साक्षात् उपादेय है ।।१६।। सङ्कल्प विकल्प का स्वरूप कहते है– बाह्य वस्तुओ मे—पुत्रकलत्रादि सचेतन पदार्थों मे और सोना चादी आदि अचेतन पदार्थों मे-'ये मेरे है' ऐसे, ममत्वरूप परिणाम को **सङ्कल्प** कहते है । मै सुखी हूँ, मै दुःखी हूँ इत्यादि चित्तगत हर्ष विषाद के परिणामो को **विकल्प** कहते हैं । सर्वत्र सङ्कल्प-विकल्प का यही लक्षण जानना चाहिए ।

अथ नित्यनिरञ्जनज्ञानमयपरमानन्दस्वभावशान्तशिवस्वरूपं दर्शयन्नाह—

अब, नित्य निरजनज्ञानमय परमानन्द स्वभाव शान्त शिवस्वरूप का कथन करते है—

**णिच्चु णिरंजणु णाणमउ परमाणंद-सहाउ ।**
**जो एहउ सो संतु सिउ तासु मुणिज्जहि भाउ ।।१७।।**

नित्यो निरजनो ज्ञानमय परमानन्दस्वभाव ।
य ईदृश स शान्त शिव तस्य मन्यस्व भावम् ।।१७।।

**णिच्चु णिरंजणु णाणमउ परमाणंदसहाउ** द्रव्यार्थिकनयेन नित्योऽविनश्वर, रागादिकर्ममलरूपाञ्जनरहितत्वान्निरञ्जन., केवलज्ञानेन निर्वृत्तत्वात् ज्ञानमय., शुद्धात्मभावनोत्थवीतरागानन्दपरिणतत्वात्परमानन्दस्वभाव· **जो एहउ सो संतु सिउ** य इत्थभूत: स शान्त· शिवो भवति **हे प्रभाकरभट्ट तासु मुणिज्जहि भाउ** तस्य वीतरागत्वात् शान्त-

स्य परमानन्दसुखमयत्वात् शिवस्वरूपस्य त्वं जानीहि भावय । कं भावय । शुद्धबुद्धैक-स्वभावमित्यभिप्राय: ।।१७।।

**णिच्चु णिरंजणु णाणमउ परमाणंद सहाउ** नित्य अविनश्वर, रागादि कर्ममल रूप अंजन से रहित, केवलज्ञान से परिपूर्ण, परमानन्द स्वभाव स्वरूप **जो एहउ सो संतु सिउ, तासु भाउ मुणिज्जहि**, जो ऐसा है वही शान्तरूप और शिवरूप है, उसी के स्वभाव का तू ध्यान कर। हे प्रभाकर भट्ट ! शुद्धबुद्ध स्वभाव का ही ध्यान कर ।।१७।।

पुनश्च किंविशिष्टो भवति—
वह परमात्मा और कैसा होता है, सो कहते है —

**जो णिय-भाउ ण परिहरइ जो पर-भाउ ण लेइ ।**
**जाणइ सयलु वि णिच्चु पर सो सिउ संतु हवेइ ।।१८।।**

यो निजभाव न परिहरति य परभाव न लाति ।
जानाति सकलमपि नित्य पर स शिव शान्तो भवति ।।१८।।

य. कर्ता निजभावमनन्तज्ञानादिस्वभाव न परिहरति यश्च परभाव कामक्रोधादि-रूपमात्मरूपतया न गृह्णाति । पुनरपि कथभूत । जानाति सर्वमपि जगत्त्रयकालत्रय-वर्तिवस्तुस्वभाव न केवल जानाति द्रव्यार्थिकनयेन नित्य एव अथवा नित्यं सर्वकालमेव जानाति परं नियमेन । स इत्थभूत शिवो भवति शान्तश्च भवतीति । किं च अयमेव जीव मुक्तावस्थाया व्यक्तिरूपेण शान्त शिवसज्ञा लभते, ससारावस्थाया तु शुद्धद्रव्या-र्थिकनयेन शक्तिरूपेणेति । तथा चोक्तम्—"**परमार्थनयाय सदा शिवाय नमोऽस्तु**"। पुनश्चोक्तम्—"**शिवं परमकल्याणं निर्वाणं शान्तमक्षयम् । प्राप्तं मुक्तिपदं येन स शिवः परिकीर्तितः ।।**" अन्य कोऽप्येको जगत्कर्ता व्यापी सदा मुक्त. शान्त. शिवोऽस्तीत्येव न । अत्रायमेव शान्तशिवसज्ञ: शुद्धात्मोपादेय इति भावार्थ. ।।१८।।

**जो णिय-भाउ ण परिहरइ** जो अपने भावों को नहीं छोडता है, **जो पर-भाउ ण लेइ** जो परभावो को ग्रहण नही करता है, **सयलु वि पर णिच्चु जाणइ, सो सिउ संतु हवेइ** सकल यानी सम्पूर्ण लोक को मात्र नित्य जानता है, वही शिवस्वरूप तथा शान्तस्वरूप है । जो अनन्तज्ञानादिरूप अपने स्वभाव का त्याग नही करता है और परभाव कामक्रोधादि को आत्मरूप से ग्रहण नही करता है । और कैसा है ? तीन लोक और तीनकालवर्ती सभी पदार्थों को नित्य जानता है अथवा द्रव्यार्थिक नय से पदार्थ नित्य हैं ऐसा जानता है, वह ऐसा परमात्मा शिवस्वरूप और शान्तस्वरूप होता है । अथवा यही जीव मुक्तावस्था में व्यक्त रूप मे शान्त और शिव संज्ञा को प्राप्त करता है । संसारावस्था मे तो शुद्ध द्रव्यार्थिक नय से शक्ति रूप मे परमात्मा है अन्यत्र कहा भी है - "परमार्थनयाय सदा शिवाय नमोऽस्तु" । और भी कहा है—"परमकल्याण रूप, निर्वाणरूप, शान्त, अविनाशी ऐसे मुक्तिपद को जिसने प्राप्त कर लिया है, वही शिव कहा जाता

है।" अन्य कोई एक जगत्कर्ता, सर्वव्यापक, सदामुक्त, शान्त शिव (नैयायिक वैशेषिक मान्यता का) नहीं है। शान्त, शिव संज्ञा वाला एक शुद्धात्मा ही उपादेय है—यह **भावार्थ** है ॥१८॥

अथ पूर्वोक्तं निरञ्जनस्वरूपं सूत्रत्रयेण व्यक्तीकरोति—

अब, पूर्वकथित निरजनस्वरूप को तीन दोहा सूत्रों से प्रकट करते हैं—

**जासु ण वण्णु ण गंधु रसु जासु ण सद्दु ण फासु।**
**जासु ण जम्मणु मरणु ण वि णाउ णिरंजणु तासु ॥१९॥**
**जासु ण कोहु ण मोहु मउ जासु ण माय ण माणु।**
**जासु ण ठाणु ण झाणु जिय सो जि णिरंजणु जाणु ॥२०॥**
**अत्थि ण पुण्णु ण पाउ जसु अत्थि ण हरिसु विसाउ।**
**अत्थि ण एक्कु वि दोसु जसु सो जि णिरंजणु भाउ ॥२१॥तियलं।**

यस्य न वर्णो न गन्धो रस यस्य न शब्दो न स्पर्श ।
यस्य न जन्म मरण नापि नाम निरञ्जनस्तस्य ॥१९॥
यस्य न क्रोधो न मोहो मद. यस्य न माया न मान ।
यस्य न स्थान न ध्यान जीव तमेव निरञ्जन जानीहि ॥२०॥
अस्ति न पुण्य न पाप यस्य अस्ति न हर्षो विषाद ।
अस्ति न एकोऽपि दोषो यस्य स एव निरञ्जनो भाव ॥२१॥त्रिकलम्॥

यस्य मुक्तात्मन शुक्लकृष्णरक्तपीतनीलरूपपञ्चप्रकारवर्णो नास्ति, सुरभिदुरभिरूपो द्विप्रकारो गन्धो नास्ति, कटुकतीक्ष्णमधुराम्लकषायरूप· पञ्चप्रकारो रसो नास्ति, भाषात्मकाभाषात्मकादिभेदभिन्न· शब्दो नास्ति, शीतोष्णस्निग्धरूक्षगुरुलघुमृदुकठिनरूपोऽष्टप्रकार· स्पर्शो नास्ति, पुनश्च यस्य जन्म मरणमपि नैवास्ति तस्य चिदानन्दैकस्वभावपरमात्मनो निरञ्जनसंज्ञा लभते ॥ पुनश्च किंरूप स निरञ्जन· । यस्य न विद्यते । किं किं न विद्यते । क्रोधो मोहो विज्ञानाद्यष्टविधमदभेदो यस्यैव मायामानकषायो यस्यैव नाभिहृदयललाटादिध्यानस्थानानि चित्तनिरोधलक्षणध्यानमपि यस्य न तमित्थभूतं स्वशुद्धात्मानं हे जीव निरञ्जन जानीहि । ख्यातिपूजालाभदृष्टश्रुतानुभूत भोगाकाक्षारूपसमस्तविभावपरिणामान् त्यक्त्वा स्वशुद्धात्मानुभूतिलक्षणनिर्विकल्पसमाधौ स्थित्वानुभवेत्यर्थ. ॥ पुनरपि किंस्वभाव स निरञ्जन । यस्यास्ति न । किं किं नास्ति । द्रव्यभावरूपं पुण्य पाप च ॥ पुनरपि किं नास्ति । रागरूपो हर्षो द्वेषरूपो विषादश्च । पुनश्च । नास्ति क्षुधाद्यष्टादशदोषेषु मध्ये चैकोऽपि दोष । स एव शुद्धात्मा निरञ्जनः इति हे **प्रभाकरभट्ट** त्व जानीहि । स्वशुद्धात्मसंवित्तिलक्षणवीतरागनिर्विकल्पसमाधौ-

स्थित्वानुभवेत्यर्थः । किं च । एवंभूतसूत्रत्रयव्याख्यातलक्षणो निरञ्जनो ज्ञातव्यो न चान्यः कोऽपि निरञ्जनोऽस्ति परकल्पितः । अत्र सूत्रत्रयेऽपि विशुद्धज्ञानदर्शनस्वभावो योऽसौ निरञ्जनो व्याख्यातः स एवोपादेय इति भावार्थ. ।।१९-२१।।

**जासु वण्णु ण, गंधु रसु ण, जासु सद्दु ण, फासु ण । जासु जम्मणु ण, मरणु वि ण, तासु णाउ णिरंजणु ।।१९।। जासु कोहु ण, मोहुमउ ण, जासु माय ण माणु ण, जासु ठाणु ण, जिय झाणु ण, सो जि णिरंजणु जाणु ।।२०।। जसु पुण्णु ण पाउ ण अत्थि, हरिसु विसाउ ण अत्थि, जसु एक्कु वि दोसु ण अत्थि, सो जि णिरंजणु भाउ ।।२१।।** जिस मुक्तात्मा के शुक्ल, कृष्ण, रक्त, पीत, नील रूप पाँच प्रकार का रग नही है, सुगन्ध, दुर्गन्ध रूप दो प्रकार की गन्ध नहीं है; कटुक तीक्ष्ण, मधुर, अम्ल और कसायले रूप पाँच प्रकार का रस नही है; भाषात्मक-अभाषात्मक आदि शब्द नही है, शीत-उष्ण, कोमल-रुक्ष, हलका-भारी, कोमल, कठोर रूप आठ प्रकार का स्पर्श नहीं है; और जिसके जन्म-मरण भी नही है, उस चिदानन्द शुद्ध स्वभाव परमात्मा की निरञ्जन संज्ञा है ।।१९।। और किसरूप है वह निरञ्जन ? जिसके क्रोध नही है, मोह नही है, ज्ञान, जाति, कुल, पूजा, बल, ऋद्धि, तप और शरीरसौन्दर्य रूप आठ प्रकार का मद नही है, जिसके माया और मान कषाय नही है, जिसके नाभि, हृदय, ललाट आदि ध्यान के स्थान नही हैं और चित्त को रोकने रूप ध्यान भी नही है, ऐसे स्वशुद्धात्मा को हे जीव ! तू निरञ्जन जान । ख्याति, पूजा, लाभ, देखे, सुने और भोगे हुए भोगो की आकाक्षा रूप समस्त विभाव परिणामो को तज कर अपने शुद्धात्मा की अनुभूति स्वरूप निर्विकल्प समाधि मे ठहर कर उस शुद्धात्मा की अनुभूति कर ।।२०।। और किस स्वभाव वाला है वह निरञ्जन ? जिसके द्रव्यभावरूप पुण्य-पाप नही है, रागरूप हर्ष और द्वेषरूप विषाद नही है । क्षुधादि अठारह दोषो मे से एक भी दोष नही है । वही शुद्धात्मा निरंजन है ऐसा हे प्रभाकर भट्ट ! तू जान तथा निज शुद्धात्मा के अनुभव लक्षण रूप वीतराग निर्विकल्प समाधि मे स्थित होकर अनुभव कर । इस प्रकार तीन दोहो मे जिसका लक्षण कहा गया है उसे ही निरजन जानना चाहिए, अन्य कोई परकल्पित निरजन नही है । इन तीन दोहो मे विशुद्ध ज्ञान-दर्शन स्वभाव वाला जो निरजन कहा गया है, वही उपादेय है । यह भावार्थ है ।।२१।।

अथ धारणाध्येययन्त्रमन्त्रमण्डलमुद्रादिकं व्यवहारध्यानविषयं मन्त्रवादशास्त्रकथितं यत्तन्निर्दोषपरमात्माराधनाध्याने निषेधयन्ति—

अब धारणा, ध्येय, यत्र, मत्र, मण्डल, मुद्रा आदिक व्यवहारध्यान के विषय जो मन्त्रवाद शास्त्र मे कहे गए है, निर्दोष परमात्मा के आराधना-ध्यान मे उनका निषेध करते हैं—

**जासु ण धारणु धेउ ण वि जासु ण जंतु ण मंतु ।**
**जासु ण मंडलु मुद्द ण वि सो मुणि देउँ अणंतु ।।२२।।**

यस्य न धारणा ध्येयं नापि यस्य न यन्त्रं न मन्त्रः ।
यस्य न मण्डलं मुद्रा नापि तं मन्यस्व देवमनन्तम् ।।२२।।

यस्य परमात्मनो नास्ति न विद्यते । किं किम् । कुम्भकरेचकपूरकसंज्ञावायुधारणादिकप्रतिमादिकं ध्येयमिति । पुनरपि किं तस्य । अक्षररचनाविन्यासरूपस्तम्भन-

मोहनादिविषयं यन्त्रस्वरूपं विविधाक्षरोच्चारणरूप मन्त्रस्वरूपं च अप्मण्डलवायुमण्डल-पृथ्वीमण्डलादिक गारुडमुद्राज्ञानमुद्रादिकं च यस्य नास्ति तं परमात्मानं देवमाराध्यं द्रव्यार्थिकनयेनानन्तमविनश्वरमनन्तज्ञानादिगुणस्वभावं च मन्यस्व जानीहि । अतीन्द्रियसुखास्वादविपरीतस्य जिह्वेन्द्रियविषयस्य निर्मोहशुद्धात्मस्वभावप्रतिकूलस्य मोहस्य वीतराग-सहजानन्दपरमसमरसीभावसुखरसानुभवप्रतिपक्षस्य नवप्रकाराब्रह्मव्रतस्य वीतरागनिर्विकल्पसमाधिघातस्य मनोगतसकल्पविकल्पजालस्य च विजयं कृत्वा **हे प्रभाकरभट्ट** शुद्धात्मानमनुभवेत्यर्थ. । तथा चोक्तम्–"**अक्खाण रसणी कम्माण मोहणी तह वयाण बंभं च । गुत्तीणं मणगुत्ती चउरो दुक्खेण सिज्झंति ।।**" ।।२२।।

**जासु ण धारणु, धेउ ण वि, जासु जंतु ण, मंतु ण, जासु मडलु ण, मुद्द ण वि, सो अणंतु देउँ मुणि ।।२२।।** जिस परमात्मा के कुम्भक, रेचक, पूरक सज्ञावाली वायु धारणादिक नही है, प्रतिमादिक ध्येय भी नही है, अक्षरो की रचना रूप स्तम्भन, मोहनादि विषयक यत्र नही हैं, विविध अक्षरो के उच्चारणरूप मत्र भी नही है, जिसके जल-वायु-पृथ्वीमण्डल-आदि भेद नही है और जिसके गारुडमुद्रा, ज्ञानमुद्रा आदि मुद्रा भी नही है, द्रव्यार्थिक नय से जो अविनाशी, अनन्त, ज्ञानादि गुणरूप है, उसे ही परमात्मदेव समझो । अतीन्द्रिय सुख के आस्वाद से विपरीत, जिह्वेन्द्रिय के विषय को जीतकर निर्मोह शुद्ध स्वभाव से विपरीत मोह का त्याग कर, वीतराग सहज आनन्द परम समरसी भाव सुखरूपी रस के अनुभव का शत्रु जो नौ प्रकार का कुशील है उसको तथा वीतरागनिर्विकल्प समाधि के घातक मन के सकल्प विकल्पो को जीतकर हे प्रभाकरभट्ट । तू शुद्धात्मा का अनुभव कर। कहा भी है– "इन्द्रियो मे जिह्वा इन्द्रिय, कर्मो मे मोहनीय, व्रतो मे ब्रह्मचर्य और गुप्तियो मे मनोगुप्ति – ये चार बाते कठिनाई से सिद्ध होती है" ।।२२।।

अथ वेदशास्त्रेन्द्रियादिपरद्रव्यालम्बनाविषय च वीतरागनिर्विकल्पसमाधिविषयं च परमात्मान प्रतिपादयन्ति––

अब वेद, शास्त्र और इन्द्रियादि परद्रव्यो के अगोचर और वीतरागनिर्विकल्पसमाधि के गोचर परमात्मा का कथन करते है—

**वेयहिँ सत्थहिँ इंदियहिँ जो जिय मुणहु ण जाइ ।**
**णिम्मल-झाणहँ जो विसउ सो परमप्पु अणाइ ।।२३।।**

वेदै शास्त्रैरिन्द्रियै यो जीव मन्तु न याति ।
निर्मलध्यानस्य यो विषय स परमात्मा अनादि ।।२३।।

वेदशास्त्रेन्द्रियै· कृत्वा योऽसौ मन्तु ज्ञातु न याति । पुनश्च कथंभूतो य: । मिथ्याविरतिप्रमादकषाययोगाभिधानपञ्चप्रत्ययरहितस्य निर्मलस्य स्वशुद्धात्मसवित्ति-संजातनित्यानन्दैकसुखामृतास्वादपरिणतस्य ध्यानस्य विषय: । पुनरपि कथंभूतो य: ।

अनादिः स परमात्मा भवतीति हे जीव जानीहि । तथा चोक्तम्—**"अन्यथा वेदपाण्डित्यं शास्त्रपाण्डित्यमन्यथा । अन्यथा परमं तत्त्वं लोकाः क्लिश्यन्ति चान्यथा ॥"**[1] अत्रार्थभूत एवं शुद्धात्मोपादेयो अन्यद्धेयमिति भावार्थः ॥२३॥

**वेयहिं सत्थहिं इंदियहिं जो जिय मुणहु ण जाइ, जो णिम्मल-झाणहं विसउ, सो परमप्पु अणाइ ॥२३॥** वेद, शास्त्र और इन्द्रियों से भी जो शुद्धात्मा जाना नही जाता । और कैसा है यह ? मिथ्यात्व, अविरति, प्रमाद, कषाय और योग इन पाँच आस्रवो से रहित, निर्मल निज शुद्धात्मा के अनुभव से उत्पन्न नित्यानन्द सुखामृत के आस्वादरूप परिणत ध्यान का विषय है । और कैसा है यह ? अनादि है, हे जीव तू इसे ही परमात्मा जान । कहा भी है —"वेद का पाण्डित्य और शास्त्र का पाण्डित्य तो कुछ और ही है और वह परम तत्त्व कुछ और ही है । ये लोक अन्यथा ही क्लेश कर रहे है ।" **भावार्थ** यह है कि अर्थरूप शुद्धात्मा ही उपादेय है, अन्य सब हेय हैं ॥२३॥

अथ योऽसौ वेदादिविषयो न भवति परमात्मा समाधिविषयो भवति पुनरपि तस्यैव स्वरूप व्यक्त करोति—

अब, जो यह परमात्मा वेदादिगम्य नही है केवल समाधिगम्य है, उसी का स्वरूप फिर कहते है—

**केवल-दंसण-णाणमउ केवल-सुक्ख-सहाउ ।**
**केवल-वीरिउ सो मुणहि जो जि परावरु भाउ ॥२४॥**

केवलदर्शनज्ञानमय केवलसुखस्वभाव ।
केवलवीर्यस्त मन्यस्व य एव परापरो भाव ॥२४॥

केवलोऽसहाय ज्ञानदर्शनाभ्या निर्वृत्त केवलदर्शनज्ञानमय केवलानन्दसुखस्वभावः केवलानन्तवीर्यस्वभाव इति यस्तमात्मान मन्यस्व जानीहि । पुनश्च कथंभूतः य एव । य. परापर. परेभ्योऽर्हत्परमेष्ठिभ्य पर उत्कृष्टो मुक्तिगतः शुद्धात्मा भावः पदार्थः स एव सर्वप्रकारेणोपादेय इति तात्पर्यार्थः ॥२४॥

**जो केवल-दंसण-णाणमउ, केवल-सुक्ख-सहाउ, केवल वीरिउ, सो जि परावरुभाउ मुणहि ॥२४॥** जो केवल यानी पराश्रय रहित ज्ञानदर्शन से परिपूर्ण है, केवल दर्शनज्ञानमय है, केवल सुखस्वभाव वाला है, केवल अनन्तवीर्य स्वभाव वाला है, ऐसा जो है उसे ही परमात्मा मानो, जानो । और कैसा है वह ? जो उत्कृष्ट अर्हन्त परमेष्ठी से भी अधिक उत्कृष्ट है, मुक्तिगत शुद्धात्मा है, वही शुद्धात्मा सर्वप्रकार से उपादेय है यह **भावार्थ** है ॥२४॥

---

१. अन्यथा लोकपाण्डित्य वेदपाण्डित्यमन्यथा ।
अन्यथा तत्पद शान्तं, लोका क्लिश्यन्ति चान्यथा ॥५/६७ यशस्तिलकचम्पू ।

**अथ त्रिभुवनवन्दित इत्यादिलक्षणैर्युक्तो योऽसौ शुद्धात्मा भणितः स लोकाग्रे तिष्ठतीति कथयति—**

अब कहते हैं कि त्रिभुवनवन्दित इत्यादि लक्षणों से युक्त जो यह शुद्धात्मा कहा गया है, वह लोक के अग्रभाग में रहता है—

**एयहिँ जुत्तउ लक्खणहिँ जो परु णिक्कलु देउ ।**
**सो तहिँ णिवसइ परम-पइ जो तइलोयहँ झेउ ।।२५।।**

एतैर्युक्तो लक्षणैः य परो निष्कलो देव ।
स तत्र निवसति परमपदे य त्रैलोक्यस्य ध्येय ।।२५।।

एतैस्त्रिभुवनवन्दितादिलक्षणै पूर्वोक्तैर्युक्तो य. । पुनश्च कथंभूतो य । पर· परमात्मस्वभाव· । पुनरपि किंविशिष्ट । निष्कल पञ्चविधशरीररहित । पुनरपि किंविशिष्ट. । देवस्त्रिभुवनाराध्य स एव परमपदे मोक्षे निवसति । यत्पद कथंभूतम् । त्रैलोक्यस्यावसानमिति । अत्र तदेव मुक्तजीवसदृशं स्वशुद्धात्मस्वरूपमुपादेयमिति भावार्थ ।।२५।। एव त्रिविधात्मकथनप्रथममहाधिकारमध्ये मुक्तिगतसिद्धजीवव्याख्यानमुख्यत्वेन दोहकसूत्रदशक गतम् ।

**एयहिं लक्खणहिं जुत्तउ परु णिक्कलु देउ जो, सो तहिं परम-पइ णिवसइ, जो तइलोयहँ झेउ ।।२५।।** तीनों लोकों से वन्दित इत्यादि लक्षणों से जो पहले कहा गया है, उनमें युक्त, सर्वोत्कृष्ट परमात्मस्वभाव वाला, औदारिक-वैक्रियिक-आहारक-तैजस-कार्माण रूप पाँच प्रकार के शरीरों से रहित अर्थात् अमूर्त, तीन लोक का जो आराध्य देव है वही परमपद-मोक्ष में निवास करता है । वह पद कैसा है ? तीन लोक का अवसान है अर्थात् लोक के शिखर पर है । यहाँ **भावार्थ** यह है कि इसी मुक्त जीव यानी सिद्ध परमात्मा के सदृश अपना भी शुद्धात्मस्वरूप है, वही उपादेय है ।।२५।।

इसप्रकार त्रिविधात्मा का कथन करने वाले प्रथम महाधिकार में मुक्तिगत सिद्ध परमात्मा के व्याख्यान की मुख्यता से दस दोहासूत्रों का कथन किया ।

अत ऊर्ध्वं प्रक्षेपपञ्चकमन्तर्भाविचतुर्विंशतिसूत्रपर्यन्तं यादृशो व्यक्तिरूप परमात्मा मुक्तौ तिष्ठति तादृश. शुद्धनिश्चयनयेन शक्तिरूपेण तिष्ठतीति कथयन्ति । तद्यथा—

अब पाँच क्षेपक मिले हुए चौबीस दोहों तक जैसा प्रकट रूप परमात्मा मोक्ष में है वैसा ही शुद्ध निश्चयनय से (देह में भी) शक्ति रूप से है, सो कहते हैं -

**जेहउ णिम्मलु णाणमउ सिद्धिहिँ णिवसइ देउ ।**
**तेहउ णिवसइ बंभु परु देहहँ मं करि भेउ ।।२६।।**

यादृशो निर्मलो ज्ञानमय सिद्धौ निवसति देव ।
तादृशो निवसति ब्रह्मा पर. देहे मा कुरु भेदम् ।।२६।।

यादृश: केवलज्ञानादिव्यक्तिरूप: कार्यसमयसार:, निर्मलो भावकर्मद्रव्यकर्मनोकर्म-मलरहित:, ज्ञानमय केवलज्ञानेन निर्वृत्त: केवलज्ञानान्तर्भूतानन्तगुणपरिणत: सिद्धो मुक्तो मुक्तौ निवसति तिष्ठति देव: परमाराध्य: । तादृश: पूर्वोक्तलक्षणसदृश: निवसति तिष्ठति ब्रह्मा शुद्धबुद्धैकस्वभाव: परमात्मा पर उत्कृष्ट: । क्व निवसति । देहे । केन । शुद्धद्रव्यार्थिकनयेन । कथंभूतेन । शक्तिरूपेण **हे प्रभाकरभट्ट** भेदं मा कार्षीस्त्वमिति । तथा चोक्तं **श्रीकुन्दकुन्दाचार्यदेवैः मोक्षप्राभृते–"णमिएहिं जं णमिज्जइ झाइज्जइ झाइएहिं अणवरयं । थुव्वंतेहिं थुणिज्जइ देहत्थं किं पि तं मुणह ।।"** अत्र स एव परमात्मोपादेय इति भावार्थ: ।।२६।।

**जेहउ णिम्मलु णाणमउ देउ सिद्धिहिं णिवसइ तेहउ परु बंभु देहहं णिवसइ, भेउ मं करि ।** ।।२६।। जैसा केवलज्ञानादि प्रकटरूप कार्य समयसार निर्मल यानी भावकर्म, द्रव्यकर्म और नोकर्म रूप मल से रहित, ज्ञानमय - केवलज्ञान से परिपूर्ण—केवलज्ञान के अन्तर्भूत अनन्त गुण परिणत सिद्धजीव मोक्ष मे रहता है वैसा ही पूर्वोक्तलक्षण सदृश परब्रह्म शुद्ध बुद्ध स्वभाव परमात्मा उत्कृष्टता से रहता है । कहाँ रहता है ? देह मे । कैसे ? शुद्ध द्रव्यार्थिक नय की अपेक्षा । किस भाँति रहता है ? शक्तिरूप मे रहता है । हे प्रभाकरभट्ट ! तू भेद मत कर (यानी अपने मे और सिद्ध-परमेष्ठी मे तू अन्तर मत कर) मोक्षप्राभृत मे श्री कुन्दकुन्दाचार्य देव ने ऐसा ही कहा है—"जो नमस्कार करने योग्य इन्द्रादि है, उनसे तो नमस्कार करने योग्य है और ध्यान व स्तुति करने योग्य जो तीर्थकरादि है उनसे भी ध्यान व स्तुति करने योग्य है, ऐसा कुछ है वह इस देह मे ही है, उसको यथार्थ यानी परमात्मा जानो ।" **भावार्थ** यह है कि वह परमात्मा ही उपादेय है ।।२६।।

अथ येन शुद्धात्मना स्वसंवेदनज्ञानचक्षुषावलोकितेन पूर्वकृतकर्माणि नश्यन्ति तं किं न जानासि त्वं हे योगिन्निति कथयन्ति—

अब, 'हे योगिन् ! जिस शुद्धात्मा को सम्यग्ज्ञान नेत्र से देखने पर पूर्वोपार्जित कर्म नष्ट हो जाते है, क्या तुम उसे नही जानते हो ?' सो कहते हैं—

**जें दिट्ठें तुट्टंति लहु कम्मइँ पुव्व-कियाइँ ।**
**सो परु जाणहि जोइया देहि वसंतु ण काइँ ।।२७।।**

येन दृष्टेन त्रुट्यन्ति लघु कर्माणि पूर्वकृतानि ।
तं परं जानासि योगिन् देहे वसन्तं न किम् ।।२७।।

**जें दिट्ठें तुट्टंति लहु कम्मइं पुव्वकियाइं** येन परमात्मना दृष्टेन सदानन्दैकरूप-वीतरागनिर्विकल्पसमाधिलक्षणनिर्मललोचनेनावलोकितेन त्रुट्यन्ति शतचूर्णानि भवन्ति लघु शीघ्रम् अन्तर्मुहूर्तेन । कानि । परमात्मन: प्रतिबन्धकानि स्वसंवेद्यभावोपार्जितानि पूर्वकृतकर्माणि **सो परु जाणहि जोइया देहि वसंतु ण काइं** तं नित्यानन्दैकस्वभावं

स्वात्मानं परमोत्कृष्टं किं न जानासि हे योगिन् । कथंभूतमपि । स्वदेहे वसन्तमपीति । अत्र स एवोपादेय इति भावार्थः ॥२७॥

**जं दिट्ठें लहु पुव्व-कियाइं कम्मइं तुट्टंति, सो पर देहि वसंतु जोइया ! काइं ण जाणहि ॥२७॥** जिस परमात्मा को देखने से—सदा आनन्दरूप वीतराग निर्विकल्प समाधिलक्षण रूप निर्मल नेत्रों से देखने से शीघ्र ही अन्तर्मुहूर्त में ही परमात्मपने के प्रतिबन्धक पूर्वोपार्जित कर्म चूर-चूर हो जाते है, उस नित्यानन्द स्वभाव वाली परम उत्कृष्ट निजात्मा को अपने शरीर मे निवास करते हुए भी हे योगिन् ! तू क्यों नहीं जानता है ? वह निजस्वरूप ही उपादेय है, यह **भावार्थ** है ॥२७॥

अथ ऊर्ध्वं प्रक्षेपपञ्चकं कथयन्ति । तद्यथा—
अब आगे पाँच प्रक्षेपकों का कथन करते है—

**जित्थु ण इंदिय-सुह-दुहइँ जित्थु ण मण-वावारु ।**
**सो अप्पा मुणि जीव तुहुँ अण्णु परिं अवहारु ॥२८॥**

यत्र नेन्द्रियसुखदुःखानि यत्र न मनोव्यापारः ।
तं आत्मानं मन्यस्व जीव त्वं अन्यत्परमपहर ॥२८॥

**जित्थु ण इंदियसुहदुहइं जित्थु ण मणवावारु** यत्र शुद्धात्मस्वरूपे न सन्ति न विद्यन्ते । कानि । अनाकुलत्वलक्षणपारमार्थिकसौख्यविपरीतान्याकुलत्वोत्पादकानीन्द्रियसुखदुःखानि यत्र च निर्विकल्पपरमात्मनो विलक्षणः सकल्पविकल्परूपो मनोव्यापारो नास्ति । **सो अप्पा मुणि जीव तुहुं अण्णु परिं अवहारु** तं पूर्वोक्तलक्षणं स्वशुद्धात्मानं मन्यस्व नित्यानन्दैकरूप वीतरागनिर्विकल्पसमाधौ स्थित्वा जानीहि हे जीव, त्वम् अन्यत्परमात्मस्वभावाद्विपरीतं पञ्चेन्द्रियविषयस्वरूपादिविभावसमूहं परस्मिन् दूरे सर्वप्रकारेणापहर त्यज । तात्पर्यार्थः । निर्विकल्पसमाधौ सर्वत्र वीतरागविशेषणं किमर्थं कृतम् इति पूर्वपक्षः । परिहारमाह । यत एव हेतोः वीतरागस्तत एव निर्विकल्प-इति हेतुहेतुमद्भावज्ञापनार्थम्, अथवा ये सरागिणोऽपि सन्तो वयं निर्विकल्पसमाधिस्था इति वदन्ति तन्निषेधार्थम् अथवा श्वेतशङ्खवत्स्वरूपविशेषणमिदम् इति परिहारत्रयं निर्दोषिपरमात्मशब्दादिपूर्वपक्षेऽपि योजनीयम् ॥२८॥

**जित्थु इंदिय-सुह-दुहइं ण, जित्थु मण-वावारु ण, हे जीव ! तुहुं सो अप्पा मुणि अण्णु परिं अवहारु ॥२८॥** जिस शुद्ध आत्मस्वरूप मे अनाकुलता लक्षण वाले पारमार्थिक सुख से विपरीत आकुलता के उत्पादक इन्द्रियजन्य सुख-दुःख नहीं है, जिसमे निर्विकल्प परमात्मा से विलक्षण सङ्कल्प-विकल्परूप मनोव्यापार नहीं है, ऐसे उस पूर्वोक्त लक्षण वाले को हे जीव ! तू आत्मा मान । वीतराग निर्विकल्पसमाधि मे स्थित होकर उस नित्यानन्दैक स्वभावरूप आत्मा को जान और परमात्म स्वभाव से विपरीत पञ्चेन्द्रियों के विषयादिरूप विभाव समूह का दूर से ही सब प्रकार

से त्याग कर। यह तात्पर्यार्थ है। **शंका**—निर्विकल्प समाधि में सब जगह वीतराग विशेषण क्यों किया गया है? **समाधान**—जहाँ वीतरागता है, वही निर्विकल्पता है, इस रहस्य को समझने के लिए अथवा जो रागी होते हुए भी हम निर्विकल्पसमाधिस्थ है ऐसा कहते है, उनके निषेध के लिए अथवा सफेद शंख की तरह स्वरूप प्रकट करने के लिए यह विशेषण दिया गया है ।।२८।।

अथ य: परमात्मा व्यवहारेण देहे तिष्ठति निश्चयेन स्वस्वरूपे तमाह—

अब, व्यवहारनय से तो परमात्मा इस देह में ठहर रहा है लेकिन निश्चय नय से तो वह अपने स्वरूप मे ही स्थित है, उस आत्मा का कथन करते है—

**देहादेहहिँ जो वसइ भेयाभेय-णएण ।**
**सो अप्पा मुणि जीव तुहुँ किं अण्णेँ बहुएण ।।२९।।**

देहादेहयो यो वसति भेदाभेदनयेन ।
तमात्मान मन्यस्व जीव त्व किमन्येन बहुना ।।२९।।

देहादेहयोरधिकरणभूतयोर्यो वसति । केन । भेदाभेदनयेन । तथाहि—अनुपचरितासद्भूतव्यवहारेणाभेदनयेन स्वपरात्मनोऽभिन्ने स्वदेहे वसति शुद्धनिश्चयनयेन तु भेदनयेन स्वदेहाद्भिन्ने स्वात्मनि वसति य तमात्मान मन्यस्व जानीहि हे जीव नित्यानन्दैकवीतरागनिर्विकल्पसमाधौ स्थित्वा भावयेत्यर्थः । किमन्येन शुद्धात्मनो भिन्नेन देहरागादिना बहुना । अत्र योऽसौ देहे वसन्नपि निश्चयेन देहरूपो न भवति स एव स्वशुद्धात्मोपादेय इति तात्पर्यार्थ ।।२९।।

**जो भेयाभेयणएण देहादेहहिं वसइ, सो तुहुं हे जीव ! अप्पा मुणि, किं अण्णें बहुएण** ।।२९।। जो अनुपचरित असद्भूत व्यवहार रूप अभेद नय से अपने मे भिन्न देह में रहता है और शुद्ध निश्चय रूप भेद नय मे अपनी देह मे भिन्न आत्म स्वभाव मे रहता है, उसे हे जीव ! तू परमात्मा जान। हे जीव ! नित्यानन्द वीतराग निर्विकल्प समाधि मे स्थित हो आत्मा का ध्यान कर। निज शुद्धात्मा से भिन्न देहरागादिको मे तुझे क्या करना है। जो देह में रहते हुए भी निश्चय मे देहरूप नही होता, वही निज शुद्धात्मा उपादेय है, यह **भावार्थ** है ।।२९।।

अथ जीवाजीवयोरेकत्व मा कार्षीर्लक्षणभेदेन भेदोऽस्तीति निरूपयति—

अब, जीव और अजीव मे एकता-अभिन्नता मत कर, लक्षण के भेद से दोनों में भेद है, उसका कथन करते है—

**जीवाजीव म एक्कु करि लक्खण भेएँ भेउ ।**
**जो परु सो परु भणमि मुणि अप्पा अप्पु अभेउ ।।३०।।**

जीवाजीवौ मा एकौ कुरु लक्षणभेदेन भेद. ।
यत्परं तत्परं भणामि मन्यस्व आत्मन आत्मना अभेद: ।।३०।।

**हे प्रभाकरभट्ट** जीवाजीवावेकौ मा कार्षीः । कस्मात् । लक्षणभेदेन भेदोऽस्ति तद्यथा–रसादिरहितं शुद्धचैतन्यं जीवलक्षणम् । तथा चोक्तं **प्राभृते–"अरसमरूवमगंधं अव्वत्तं चेदणागुणमसद्दं; जाण अलिंगग्गहणं जीवमणिद्दिट्ठसंठाणं ।।"** इत्थंभूतशुद्धात्मनो भिन्नमजीवलक्षणम् । तच्च द्विविधम् । जीवसबन्धमजीवसंबन्धं च । देहरागादिरूप जीवसंबन्धं, पुद्गलादिपञ्चद्रव्यरूपमजीवसंबन्धमजीवलक्षणम् । अत एव भिन्नं जीवादजीवलक्षणम् । तत. कारणात् यत्पर रागादिकं तत्परं जानीहि । कथंभूतम् । भेद्यमभेद्यमित्यर्थः । अत्र योऽसौ शुद्धलक्षणसयुक्त शुद्धात्मा स एवोपादेय इति भावार्थ ।।३०।।

नित्य हैं। पर्याय के दो भेद हैं—एक तो स्वभाव, दूसरी विभाव। जीव के सिद्धत्वादि स्वभाव-पर्याय है और केवलज्ञानादि स्वभावगुण हैं। ये जीव में ही पाये जाते हैं, अन्य द्रव्य में नही। अगुरुलघु आदि स्वभावगुण सब द्रव्यों में पाये जाते हैं। अगुरुलघु गुण का परिणमन षट्गुणी हानिवृद्धि रूप है। यह स्वभाव पर्याय सभी द्रव्यों में है, कोई द्रव्य इसके बिना नही है, यह अर्थपर्याय कही जाती है सो शुद्ध-पर्याय है। यह शुद्ध पर्याय ससारी जीवो के, सब अजीव पदार्थों के तथा सिद्धों के पाई जाती है और सिद्ध पर्याय तथा केवलज्ञानादि गुण सिद्धो के ही पाया जाता है, दूसरों के नही। ससारी जीवो के मतिज्ञानादि विभावगुण और नर नारकादि विभाव पर्याय पाई जाती है। यह तो जीव द्रव्य के गुण-पर्याय का कथन हुआ—अब पुद्गल के कहते है—पुद्गल के परमाणु रूप तो स्वभाव पर्याय और वर्णादि स्वभावगुण और एक वर्ण मे दूसरे वर्ण रूप होना, यह विभावगुणव्यंजन पर्याय तथा एक परमाणु मे दो तीन इत्यादि अनेक परमाणु मिलकर स्कन्धरूप होना ये विभाव द्रव्य व्यजन पर्याय है। द्व्यणुकादि स्कन्ध मे जो वर्ण आदि है, वे विभावगुण कहे जाते है और वर्ण से वर्णान्तर होना, रस से रसान्तर होना, गन्ध से अन्य गन्ध होना—यह विभाव-पर्याय है। परमाणु शुद्ध द्रव्य मे एक वर्ण, एक रस, एक गन्ध और शीत-उष्ण मे से एक तथा रूखे-चिकने में से एक, ऐसे दो स्पर्श इस तरह पाँच गुण तो मुख्य है, इनके आदि से अस्तित्वादि अनन्तगुण है, वे स्वभावगुण कहे जाते है और परमाणु का जो आकार वह स्वभाव द्रव्य व्यजन-पर्याय है तथा वर्णादि गुणरूप परिणमन वह स्वभावगुण व्यञ्जन पर्याय है। जीव और पुद्गल इन दोनो मे तो स्वभाव और विभाव दोनो है तथा धर्म-अधर्म-आकाश-काल इन चारो मे अस्तित्वादि स्वभाव गुण ही हैं और अर्थपर्याय षट्गुणी हानिवृद्धिरूप स्वभाव पर्याय सभी के है। धर्मादि के विभावगुण पर्याय नही है। आकाश के घटाकाश आदि का जो कथन है, वह उपचार मात्र है। इन षट् द्रव्यो में शुद्ध गुण, शुद्ध पर्याय सहित जो शुद्ध जीव द्रव्य है, वही उपादेय है, यह **भावार्थ** है ॥५७॥

अथ जीवस्य विशेषेण द्रव्यगुणपर्यायान् कथयति—

अब, विशेषरूप से जीव के द्रव्य-गुण-पर्याय का कथन करते हैं—

**अप्पा बुज्झहि दव्वु तुहुँ गुण पुणु दंसणु णाणु।**
**पज्जय चउ-गइ-भाव तणु कम्म-विणिम्मिय जाणु ॥५८॥**

आत्मान बुध्यस्व द्रव्य त्व गुणौ पुन दर्शन ज्ञानम्।
पर्यायान् चतुर्गतिभावान् तनु कर्मविनिर्मितान् जानीहि ॥५८॥

**अप्पा बुज्झहि दव्वु तुहुं** आत्मान द्रव्य बुध्यस्व जानीहि त्वम्। **गुण पुणु दंसणु णाणु** गुणौ पुनर्दर्शनं ज्ञान च। **पज्जय चउगइभाव तणु कम्मविणिम्मिय जाणु** तस्यैव जीवस्य पर्यायांश्चतुर्गतिभावान् परिणामान् तनु शरीर च। कथंभूतान् तान्। कर्म-विनिर्मितान् जानीहीति। इतो विशेष:। शुद्धनिश्चयेन शुद्धबुद्धैकस्वभावमात्मान द्रव्य जानीहि। तस्यैवात्मन. सविकल्पं ज्ञान निर्विकल्पं दर्शनं गुण इति। तत्र ज्ञानमष्टविधं केवलज्ञानं सकलमखण्ड शुद्धमिति शेषं सप्तकं खण्डज्ञानमशुद्धमिति। तत्र सप्तकमध्ये मत्यादिचतुष्टयं सम्यग्ज्ञानं कुमत्यादित्रयं मिथ्याज्ञानमिति। दर्शनचतुष्टयमध्ये केवल-

दर्शनं सकलमखण्डं शुद्धमिति चक्षुरादित्रयं विकलमशुद्धमिति । किं च । गुणास्त्रिविधा भवन्ति । केचन साधारणाः, केचनासाधारणा , केचन साधारणासाधारणा इति । जीवस्य तावदुच्यन्ते । अस्तित्व वस्तुत्व प्रमेयत्वागुरुलघुत्वादय. साधारणाः, ज्ञानसुखादय स्वजातौ साधारणा अपि विजातौ पुनरसाधारणा । अमूर्तत्व पुद्गलद्रव्य प्रत्यसाधारणमाकाशादिकं प्रति साधारणम् प्रदेशत्व पुन कालद्रव्य प्रति पुद्गलपरमाणुद्रव्यं च प्रत्यसाधारण शेषद्रव्य प्रति साधारणमिति संक्षेपव्याख्यानम् । एव शेषद्रव्याणामपि यथासभवं ज्ञातव्यमिति भावार्थ ॥५८॥

**तुहुँ अप्पा दव्वु बुज्झहि पुणु दंसणु णाणु गुण, चउ-गइ-भाव तणु कम्म-विणिम्मिय पज्जय जाणु ॥५८॥** तू (हे प्रभाकर भट्ट !) आत्मा को तो द्रव्य जान और दर्शनज्ञान को गुण जान । चार गतियो के भाव तथा शरीर को कर्मजनित विभाव पर्याय जान । इसका विशेष व्याख्यान करते हैं—शुद्ध निश्चयनय से शुद्धबुद्ध अखण्ड स्वभाव आत्मा को तू द्रव्य जान । उस आत्मा के सविकल्पज्ञान और निर्विकल्प दर्शन को गुण जान । ज्ञान आठ प्रकार का है, इनमे से केवलज्ञान तो पूर्ण, अखण्ड और शुद्ध है तथा शेष सात अपूर्ण, खण्डित और अशुद्ध है । इन सात मे से मतिज्ञान, श्रुतज्ञान, अवधिज्ञान और मन.पर्ययज्ञान ये चार ज्ञान तो सम्यक् ज्ञान हैं और कुमति, कुश्रुत, कुअवधि ये मिथ्याज्ञान है । दर्शन-चतुष्टय में केवलदर्शन तो पूर्ण, अखण्ड और शुद्ध है और चक्षु-अचक्षु-अवधिदर्शन अपूर्ण और अशुद्ध है । गुण तीन प्रकार के होते है—कुछ साधारण, कुछ असाधारण, कुछ साधारण-असाधारण । जीव के ये इस प्रकार हैं—अस्तित्व, वस्तुत्व, प्रमेयत्व, अगुरुलघुत्व आदि साधारण गुण है, ज्ञान सुख आदि स्वजाति मे साधारण होने पर भी विजाति मे पुन असाधारण होते हैं । अमूर्तपना पुद्गलद्रव्य के प्रति असाधारण है और आकाशादिक के लिए साधारण । प्रदेशत्व गुण काल की अपेक्षा असाधारण और शेष द्रव्यो के लिए साधारण गुण है । पुद्गल परमाणु को द्रव्य कहते हैं, मूर्तपना पुद्गल का विशेष गुण है और इसी प्रकार शेष द्रव्यो के सम्बन्ध मे भी जानना चाहिए । यही **भावार्थ** है ॥५८॥

अथानन्तसुखस्योपादेयभूतस्याभिन्नत्वात् शुद्धगुणपर्याय इति प्रतिपादनमुख्यत्वेन सूत्राष्टकं कथ्यते । तत्राष्टकमध्ये प्रथमचतुष्टय कर्मशक्तिस्वरूपमुख्यत्वेन द्वितीयचतुष्टयं कर्मफलमुख्यत्वेनेति । तद्यथा ।

अब, उपादेयभूत अतीन्द्रिय सुख से तन्मयी जो निर्विकल्पभाव है, उसकी प्राप्ति के लिए शुद्ध गुण-पर्याय के व्याख्यान की मुख्यता से आठ दोहे कहते है । इन आठ मे भी पहले चार दोहो मे कर्मसम्बन्ध का व्याख्यान और शेष चार दोहो मे कर्मफल का व्याख्यान करेंगे ।

जीवकर्मणोरनादिसम्बन्धं कथयति—

जीव और कर्म का अनादि-सम्बन्ध है, ऐसा कहते है—

**जीवहँ कम्मु अणाइ जिय जणियउ कम्मु ण तेण ।**
**कम्में जीउ वि जणिउ णवि दोहिँ वि आइ ण जेण ॥५९॥**

जीवानां कर्माणि अनादीनि जीव जनितं कर्म न तेन ।
कर्मणा जीवोऽपि जनितः नैव द्वयोरपि आदि न येन ।।५६।।

**जीवहं कम्मु अणाइ जिय जणियउ कम्मु ण तेण** जीवानां कर्मणामनादिसंबन्धो भवति हे जीव जनितं कर्म न तेन जीवेन । **कम्में जीउ वि जणिउ णवि दोहिं वि आइ ण जेण** कर्मणा कर्तृभूतेन । जीवोऽपि जनितो न द्वयोरप्यादिर्न येन कारणेनेति । इतो विशेष. । जीवकर्मणामनादिसंबन्धः पर्यायसतानेन बीजवृक्षवद्व्यवहारनये संबन्धः कर्म तावत्तिष्ठति तथापि शुद्धनिश्चयनयेन विशुद्धज्ञानदर्शनस्वभावेन जीवेन न तु जनितं तथाविधजीवोऽपि स्वशुद्धात्मसंवित्त्यभावोपार्जितेन कर्मणा नरनारकादिरूपेण न जनितः कर्मात्मेति च द्वयोरनादित्वादिति । अत्रानादिजीवकर्मणोस्संबन्धव्याख्यानेन सदा मुक्तः सदा शिव कोऽप्यस्तीति निराकृतमिति भावार्थः ।। तथा चोक्तम्—**मुक्तश्चेत्प्राग्भवे बद्धो नो बद्धो मोचनं वृथा । अबद्धो मोचनं नैव मुञ्चेरर्थो निरर्थकः ।। अनादितो हि मुक्तश्चेत्पश्चाद्बन्धः कथं भवेत् । बन्धनं मोचनं नो चेन्मुञ्चेरर्थो निरर्थकः ।।५६।।**

जिय ! **जीवहँ कम्मु अणाइ तेण कम्मु ण जणियउ, कम्में वि जीउ णवि जणिउ, जेण दोहिँ वि आइ ण ।।५६।।** जीव और कर्म का अनादिकालीन सम्बन्ध है, हे आत्मन् ! उस जीव ने कर्म उत्पन्न नही किये, कर्मो ने भी जीव को उत्पन्न नही किया क्योकि इन दोनो का ही आदि नही है अर्थात् दोनो अनादि से है । **विशेष**—पर्यायसन्तान की अपेक्षा व्यवहार नय से जीव और कर्म का अनादि सम्बन्ध बीज और वृक्ष की भाँति है, जैसे बीज से वृक्ष और वृक्ष से बीज होता है । उसी प्रकार पहले बीजरूप कर्म से देह, फिर देह मे नये-नये कर्म तथापि शुद्ध निश्चय नय की अपेक्षा जीव विशुद्ध ज्ञान-दर्शन स्वभाव वाला ही है । न तो जीव ने ये कर्म उत्पन्न किए है और न स्वशुद्धात्मानुभव के अभाव मे उपार्जित कर्म से प्राप्त नरनारकादि पर्याय ने जीव को उत्पन्न किया है । दोनों अनादि से है । यहाँ जीव और कर्म के अनादिसम्बन्ध के कथन से इस मान्यता का निराकरण किया है कि आत्मा सदा मुक्त है, सदा शिव है । अन्यत्र कहा भी है जो यह जीव पहले बँधा हो, तभी 'मुक्त' कहना बन सकता है और जो पहले बँधा ही न हो तो फिर 'मुक्त' कैसे ? जो अबद्ध है उसे मुक्त कहना ठीक नही । जो विभावबध मुक्ति मानते है, उनका कहना निरर्थक है । जो यह अनादि का मुक्त ही हो तो बाद मे बद्ध कैसे हो सकता है ? बद्ध होवे तभी मुक्ति हो सकती है । जो बद्ध ही न हो तो मुक्त कहना निरर्थक है ।।५६।।

अथ व्यवहारनयेन जीवः पुण्यपापरूपो भवतीति प्रतिपादयति—

अब, व्यवहारनय से जीव पुण्य-पाप रूप होता है, यह प्रतिपादित करते है —

**एहु ववहारें जीवडउ हेउ लहेविणु कम्मु ।**
**बहुविह-भावें परिणवइ तेण जि धम्मु अहम्मु ।।६०।।**

एष व्यवहारेण जीवः हेतुं लब्ध्वा कर्म ।
बहुविधभावेन परिणमति तेन एव धर्मः अधर्मः ।।६०।।

**एहु ववहारें जीवडउ हेउ लहेविणु कम्मु** एष प्रत्यक्षीभूतो जीवो व्यवहार-नयेन हेतुं लब्ध्वा । किम् । कर्मेति । **बहुविहभावें परिणवइ तेण जि धम्मु अहम्मु** बहुविधभावेन विकल्पज्ञानेन परिणमति तेनैव कारणेन धर्मोऽधर्मश्च भवतीति । तद्यथा । एष जीवः शुद्धनिश्चयेन वीतरागचिदानन्दैकस्वभावोऽपि पश्चाद्व्यवहारेण वीतरागनिर्विकल्पस्वसंवेदनाभावेनोपार्जित शुभाशुभ कर्म हेतुं लब्ध्वा पुण्यरूप पापरूपश्च भवति । अत्र यद्यपि व्यवहारेण पुण्यपापरूपो भवति तथापि परमात्मानुभूत्यविनाभूतवीतरागसम्यग्दर्शनज्ञानचारित्रबहिर्द्रव्येच्छानिरोधलक्षणतपश्चरणरूपा या तु निश्चयचतुर्विधाराधना तस्या भावनाकाले साक्षादुपादेयभूतवीतरागपरमानन्दैकरूपो मोक्षसुखाभिन्नत्वात् शुद्धजीव उपादेय इति तात्पर्यार्थः ॥६०॥

**एहु जीवडउ ववहारें कम्मु हेउ लहेविणु बहुविहभावें परिणवइ, तेण जि धम्मु अहम्मु** ॥६०॥ यह जीव व्यवहारनय से कर्मरूप कारण को प्राप्त कर विकल्पज्ञान से अनेक रूप परिणमन करता है, इसी से धर्म-अधर्म या पुण्य-पाप रूप होता है । यह जीव शुद्ध निश्चयनय की अपेक्षा वीतराग चिदानन्द स्वभाव होते हुए भी व्यवहारनय से वीतराग निर्विकल्प स्वसंवेदन के अभाव से उपार्जित शुभाशुभ कर्मों के कारण को प्राप्त कर पुण्यरूप-पापरूप होता है । यद्यपि यह व्यवहारनय से पुण्य-पापरूप होता है, फिर भी परमात्मा की अनुभूति से तन्मयी जो वीतराग सम्यग्दर्शन, ज्ञान, चारित्र और आत्म-बाह्य पदार्थों में इच्छा के रोकने रूप तप—इस प्रकार की चतुर्विध निश्चयाराधना की भावना के काल में, इसके (आत्मा के) लिए साक्षात् उपादेय रूप वीतराग परमानन्दैकरूप मोक्षसुख से अभिन्न शुद्ध जीव ही उपादेय है, यह **भावार्थ** है ॥६०॥

अथ तानि पुन कर्माण्यष्टौ भवन्तीति कथयति—

वे कर्म जिनसे संसारी जीव बँधा है आठ है, सो कहते है —

**ते पुणु जीवहँ जोइया अट्ठ वि कम्म हवंति ।**
**जेहिँ जि झंपिय जीव णवि अप्प-सहाउ लहंति ॥६१॥**

तानि पुन जीवाना योगिन् अष्टौ अपि कर्माणि भवन्ति ।
यै एव च्छादिता जीवा नैव आत्मस्वभावं लभन्ते ॥६१॥

**ते पुणु जीवहं जोइया अट्ठ वि कम्म हवंति** तानि पुनर्जीवाना हे योगिन्नष्टावेव कर्माणि भवन्ति । **जेहिं जि झंपिय जीव णवि अप्पसहाउ लहंति** यैरेव कर्मभिर्झंपिता सन्तो जीवा सम्यक्त्वाद्यष्टविधस्वकीयस्वभाव न लभन्त । तद्यथा हि—"**सम्मत्तणाणदंसणवीरियसुहुमं तहेव अवगहणं । अगुरुलहुगं अव्वाबाहं अट्ठगुणा हुंति सिद्धाणं** ॥[1] शुद्धात्मादिपदार्थविषये विपरीताभिनिवेशरहित परिणामः क्षायिकसम्यक्त्वमिति भण्यते ।

१ कुन्दकुन्द प्राकृत सिद्धभक्ति २० ।

जगत्त्रयकालत्रयवर्तिपदार्थयुगपद्विशेषपरिच्छित्तिरूपं केवलज्ञानं भण्यते तत्रैव सामान्यपरिच्छित्तिरूपं केवलदर्शनं भण्यते । केवलज्ञानविषये अनन्तपरिच्छित्तिशक्तिरूपमनन्तवीर्यं भण्यते । अतीन्द्रियज्ञानविषय सूक्ष्मत्वं भण्यते । एक जीवावगाहप्रदेशे अनन्तजीवावगाहदानसामर्थ्यमवगाहनत्वं भण्यते । एकान्तेन गुरुलघुत्वस्याभावरूपेण अगुरुलघुत्वं भण्यते । वेदनीयकर्मोदयजनितसमस्तबाधारहितत्वादव्याबाधगुणश्चेति । इदं सम्यक्त्वादिगुणाष्टकं संसारावस्थाया किमपि केनापि कर्मणा प्रच्छादितं तिष्ठति यथा तथा कथ्यते । सम्यक्त्व मिथ्यात्वकर्मणा प्रच्छादित, केवलज्ञानं केवलज्ञानावरणेन झपितं, केवलदर्शनं केवलदर्शनावरणेन झपितम्, अनन्तवीर्य वीर्यान्तिरायेण प्रच्छादितं, सूक्ष्मत्वमायुष्ककर्मणा प्रच्छादितम् । कस्मादिति चेत् । विवक्षितायु कर्मोदयेन भवान्तरे प्राप्ते सत्यतीन्द्रियज्ञानविषय सूक्ष्मत्व त्यक्त्वा पश्चादिन्द्रियज्ञानविषयो भवतीत्यर्थ. । अवगाहनत्व शरीरनामकर्मोदयेन प्रच्छादित, सिद्धावस्थायोग्य विशिष्टागुरुलघुत्व नामकर्मोदयेन प्रच्छादितम् । गुरुत्वशब्देनोच्चगोत्रजनितं महत्त्वं भण्यते, लघुत्वशब्देन नीचगोत्रजनितं तुच्छत्वमिति, तदुभयकारणभूतेन गोत्रकर्मोदयेन विशिष्टागुरुलघुत्व प्रच्छाद्यत इति । अव्याबाधगुणत्व वेदनीयकर्मोदयेनेति सक्षेपेणाष्टगुणाना कर्मभिराच्छादन ज्ञातव्यमिति । तदेव गुणाष्टक मुक्तावस्थायां स्वकीयस्वकीयकर्मप्रच्छादनाभावे व्यक्त भवतीति सक्षेपेणाष्टगुणा कथिता । विशेषेण पुनरमूर्तत्वनिर्नामगोत्रादयः साधारणासाधारणरूपानन्तगुणा. यथासम्भवमागमाविरोधेन ज्ञातव्या इति । अत्र सम्यक्त्वादिशुद्धगुणस्वरूपः शुद्धात्मैवोपादेय इति भावार्थ ॥६१॥

**जोइया ! ते पुणु कम्म जीवहँ अट्ठ वि हवंति । जेहिँ जि झंपिय जीव अप्प-सहाउ णवि लहंति ॥६१॥** हे योगी ! वे कर्म जीवों के आठ ही होते है जिनसे आवृत होने के कारण ये जीव सम्यक्त्वादि अष्ट गुणरूप स्वकीय स्वभाव को उपलब्ध नही होते । वे आठ गुण इस प्रकार है— "सम्यक्त्व, ज्ञान, दर्शन, वीर्य, सूक्ष्मत्व, अवगाहन, अगुरुलघु और अव्याबाध—ये आठ गुण सिद्धों के होते हैं ।" शुद्ध आत्मादि पदार्थों में विपरीत श्रद्धानरहित परिणाम को **क्षायिक सम्यक्त्व** कहा जाता है । तीन लोक तीन काल के पदार्थों को एक ही समय में विशेष रूप से जानने वाला **केवलज्ञान** कहलाता है और सब पदार्थों को एक ही समय में सामान्यरूप से देखने को **केवलदर्शन** कहते है । केवलज्ञान मे अनन्तज्ञायक शक्ति है, उसे **अनन्तवीर्य** कहते है । अतीन्द्रियज्ञान से अमूर्तिक सूक्ष्म पदार्थों को जानना **सूक्ष्मत्व** गुण है । एक जीव के अवगाह क्षेत्र मे अनन्त जीवों को अवगाहन देने की सामर्थ्य को **अवगाहन** गुण कहते हैं । एकान्त से गुरुता और लघुता का अभाव अर्थात् न गुरु न लघु—उसे **अगुरुलघु** गुण कहते है । वेदनीय कर्म के उदय के अभाव से उत्पन्न हुआ समस्त बाधारहित जो निराबाध गुण उसे **अव्याबाध** कहते है । ये सम्यक्त्वादि आठ गुण ससारावस्था में किस-किस कर्म से आच्छादित है सो कहते है । सम्यक्त्वगुण मिथ्यात्व कर्म (दर्शन मोहनीय) से आच्छादित है । केवलज्ञान गुण केवलज्ञानावरण से आवृत है, केवल दर्शनावरण से केवलदर्शन आच्छादित है । वीर्यान्तराय कर्म से अनन्तवीर्य गुण ढका है, सूक्ष्मत्व गुण आयुकर्म से ढका है । कैसे ? विवक्षित

आयुकर्म के उदय से भवान्तर को प्राप्त होने पर अतीन्द्रिय ज्ञान विषय सूक्ष्मपने को छोड़ कर इन्द्रिय ज्ञान का धारक होता है अत स्थूल को तो जानता है, सूक्ष्म को नहीं। शरीर नाम कर्मोदय से अवगाहन गुण आच्छादित है। सिद्धावस्था के योग्य विशिष्ट अगुरुलघु गुण[1] नाम कर्मोदय से ढक गया है। गुरु शब्द से उच्चगोत्रजनित महत्त्व-गुरुपना और लघु शब्द से नीचगोत्रजनित तुच्छपना व्यक्त होता है। इस प्रकार उभय कारणभूत गोत्रकर्मोदय से विशिष्ट अगुरुलघु गुण आच्छादित है। वेदनीयकर्मोदय से अव्याबाधगुण ढका हुआ है। इस प्रकार सक्षेप मे कर्मों के द्वारा आठ गुणों का आच्छादन जानना चाहिए। ये ही आठ गुण मुक्तावस्था मे अपने-अपने कर्म के आच्छादन के अभाव में प्रकट हो जाते है। संक्षेप में, इन आठ गुणों का कथन किया। विशेषता से अमूर्तपना, निर्नाम-गोत्रपना, साधारण-असाधारणरूप अनन्त गुण यथासम्भव आगमप्रमाण से जानने चाहिए। **भावार्थ** यह है कि सम्यक्त्वादि शुद्ध गुण स्वरूप शुद्धात्मा ही उपादेय है ।।६१।।

अथ विषयकषायासक्ताना जीवाना ये कर्मपरमाणव सबद्धा भवन्ति तत्कर्मेति कथयति—

अब, विषयकषायासक्त जीवो के जो कर्मपरमाणु बँधते है, वे कर्म कहे जाते है, सो कहते है—

**विसय-कसायहिँ रंगियहँ ते अणुया लग्गंति।**
**जीव-पएसहँ मोहियहँ ते जिण कम्म भणंति ।।६२।।**

विषयकषायै रञ्जिताना ये अणव लगन्ति।
जीवप्रदेशेषु मोहिताना तान् जिना कर्म भणन्ति ।।६२।।

**विसयकसायहिं रंगियहं जे अणुया लग्गंति** विषयकषायै रजिताना रक्ताना ये परमाणवो लग्ना भवन्ति। **जीवपएसिहिं मोहियहं ते जिण कम्म भणंति**। केषु लग्ना भवन्ति। जीवप्रदेशेषु। केषाम्। मोहिताना जीवानाम्। तान् कर्मस्कन्धान् जिना कर्मेति कथयन्ति। तथाहि। शुद्धात्मानुभूतिविलक्षणैर्विषयकषायै रक्ताना स्वसवित्त्य-भावोपार्जितमोहकर्मोदयपरिणताना च जीवाना कर्मवर्गणायोग्यस्कन्धास्तैलम्रक्षितानां मलपर्यायवदष्टविधज्ञानावरणादिकर्मरूपेण परिणमन्तीत्यर्थ ।। अत्र य एव विषयकषाय-काले कर्मोपार्जन करोति स एव परमात्मा वीतरागनिर्विकल्पसमाधिकाले साक्षादुपादेयो भवतीति तात्पर्यार्थ ।।६२।। इति कर्मस्वरूपकथनमुख्यत्वेन सूत्रचतुष्टय गतम्।

**विसय-कसायहिँ रंगियहँ मोहियहँ जीव-पएसहँ ते अणुया लग्गंति, ते जिण कम्म भणंति ।।६२।।** विषयकषायो से रजित मोही जीवो के जीवप्रदेशो मे जो परमाणु लगते हैं, उन परमाणुओ के स्कन्धो को जिनेन्द्रदेव कर्म कहते हैं। **भावार्थ** शुद्धात्मानुभूति से भिन्न विषय-कषायो मे अनुरक्त, आत्मज्ञान के अभाव मे उपार्जित मोहकर्मोदय से परिणत जीवो के कर्मवर्गणा योग्य स्कन्ध उसी-

---

[1] द्रष्टव्य प रतनचन्द्रमुख्तार व्यक्तित्व और कृतित्व- द्वितीय खण्ड पृ ११७० से ११७६। तथा बृहज्जिनोपदेश प जवाहरलाल शास्त्री कृत पृ ३३३-३४७ (शका समाधान ६४७ से ६५८)।

प्रकार आठ प्रकार के ज्ञानावरणादि कर्मों में परिणमन करते है जिस प्रकार तेल से शरीर के चिकना होने पर धूलि लग कर मैल रूप में परिणमती है। जो यहाँ विषय-कषाय के काल मे कर्मोपार्जन करता है, वही परमात्मा वीतरागनिर्विकल्प समाधि के काल मे साक्षात् उपादेय होना है ।।६२।।
इस प्रकार कर्मस्वरूप के कथन की मुख्यता मे चार दोहे कहे ।

अथापीन्द्रियचित्तसमस्तविभावचतुर्गतिसतापाः शुद्धनिश्चयनयेन कर्मजनिता इत्यभिप्राय मनसि धृत्वा सूत्रं कथयन्ति—

आगे, पाँच इन्द्रिय, मन, समस्त विभाव और चतुर्गति के दु ख ये सब शुद्ध निश्चयनय की अपेक्षा कर्मजनित है—ऐसा अभिप्राय मन मे रख कर दोहा—सूत्र कहते है—

**पंच वि इंदिय अण्णु मणु अण्णु वि सयल-विभाव ।**
**जीवहँ कम्मइँ जणिय जिय अण्णु वि चउगइ-ताव ।।६३।।**

पञ्चापि इन्द्रियाणि अन्यत् मन अन्यदपि सकलविभाव ।
जीवाना कर्मणा जनिता जीव अन्यदपि चतुर्गतितापा ।।६३।।

**पंच वि इंदिय अण्णु वि सयलवि भाव** पञ्चेन्द्रियाणि अन्यन्मनः अन्यदपि पुनरपि समस्तविभाव । **जीवहं कम्मइं जणिय जिय अण्णु वि चउगइताव** एते जीवानां कर्मणा जनिता हे जीव, न केवलमेते अन्यदपि पुनरपि चतुर्गतिसतापास्ते कर्मजनिता इति । तद्यथा । अतीन्द्रियात् शुद्धात्मनो यानि विपरीतानि पञ्चेन्द्रियाणि, शुभाशुभसकल्पविकल्परहितात्मनो विपरीतमनेकसकल्पविकल्पजालरूप मनः, ये च शुद्धात्मतत्त्वानुभूतेर्विलक्षणाः समस्तविभावपर्याया , वीतरागपरमानन्दसुखामृतप्रतिकूला समस्तचतुर्गतिसंतापाः दु.खदाहाश्चेति सर्वेऽप्येते अशुद्धनिश्चयनयेन स्वसवेद्याभावोपार्जितेन कर्मणा निर्मिता जीवानामिति । अत्र परमात्मद्रव्यात्प्रतिकूल यत्पञ्चेन्द्रियादिसमस्तविकल्पजाल तद्धेय तद्विपरीत स्वशुद्धात्मतत्त्व पञ्चेन्द्रियविषयाभिलाषादिसमस्तविकल्परहित परमसमाधिकाले साक्षादुपादेयमिति भावार्थ ।।६३।।

**पंच वि इंदिय अण्णु, मणु वि सयलविभाव अण्णु, चउगइ-ताव वि अण्णु, जिय जीवहँ कम्मइँ जणिय ।।६३।।** पाँचो ही इन्द्रियाँ भिन्न है, मन और रागादि सब विभाव परिणाम अन्य है, चारो गतियो के दु ख भी अन्य हैं, हे जीव ! ये सब जीवों के कर्म से उत्पन्न हुए है । अतीन्द्रिय शुद्धात्मा से विपरीत जो पाँच इन्द्रियाँ है, शुभ-अशुभ संकल्प-विकल्प से रहित आत्मा से विपरीत अनेक संकल्प-विकल्प समूहरूप जो मन है और शुद्धात्मतत्त्व की अनुभूति से भिन्न जो राग-द्वेष, मोहादिरूप सब विभाव पर्याय है, वे सब आत्मा से भिन्न हैं तथा वीतराग परमानन्द सुखरूप अमृत मे प्रतिकूल जो चतुर्गति के महान् दु खदायी सन्ताप है वे सब भी जीव पदार्थ से भिन्न है । ये सभी अशुद्धनिश्चयनय से आत्मज्ञान के अभाव से उपार्जित कर्मों से जीव के उत्पन्न हुए है । यहाँ पर परमात्म द्रव्य से विपरीत जो पाँचो इन्द्रियो को आदि लेकर सब विकल्प जाल है, वे सब हेय है, उससे विपरीत पाँचो

इन्द्रियों के विषयो की अभिलाषादि समस्त विकल्पों से रहित अपना शुद्धात्मतत्त्व ही परमसमाधि के काल में साक्षात् उपादेय है, यही भावार्थ है ।।६३।।

अथ सांसारिकसमस्तसुखदु:खानि शुद्धनिश्चयनयेन जीवानां कर्म जनयतीति निरूपयति—

अब, सांसारिक समस्त सुख-दु:ख शुद्ध निश्चयनय की अपेक्षा जीवो के कर्म से उत्पन्न होते हैं, सो कहते हैं—

**दुक्खु वि सुक्खु वि बहु-विहउ जीवहँ कम्मु जणेइ ।**
**अप्पा देक्खइ मुणइ पर णिच्छउ एउँ भणेइ ।।६४।।**

दु:खमपि सुखमपि बहुविधं जीवाना कर्म जनयति ।
आत्मा पश्यति मनुते पर निश्चय एवं भणति ।।६४।।

**दुक्खु वि सुक्खु वि बहुविहउ जीवहं कम्मु जणेइ** दु:खमपि सुखमपि । कथंभूतम् । बहुविधं जीवाना कर्म जनयति । **अप्पा देक्खइ मुणइ पर णिच्छउ एउं भणेइ** आत्मा पुन: पश्यति जानाति पर नियमेन निश्चयनय एवं ब्रुवते इति । तथाहि—अनाकुलत्वलक्षणपारमार्थिकवीतरागसौख्यात् प्रतिकूलं सांसारिकसुखदु:ख यद्यप्यशुद्धनिश्चयनयेन जीवजनितं तथापि शुद्धनिश्चयेन कर्मजनित भवति । आत्मा पुनर्वीतरागनिर्विकल्पसमाधिस्थ: सन् वस्तु वस्तुस्वरूपेण पश्यति जानाति च न च रागादिक करोति । अत्र पारमार्थिकसुखाद्विपरीत सांसारिकसुखदु:खविकल्पजाल हेयमिति तात्पर्यार्थ. ।।६४।।

**जीवहँ बहुविहउ दुक्खु वि सुक्खु वि कम्मु जणेइ । अप्पा देक्खइ पर मुणइ, एउँ णिच्छउ भणेइ ।।६४।।** जीवो के अनेक तरह के दु:ख और सुख कर्म ही उत्पन्न करता है । आत्मा उपयोगमयी होने से देखता है और केवल जानता है, यह निश्चयनय कहता है । **भावार्थ**–निराकुल पारमार्थिक वीतराग सुख से प्रतिकूल सांसारिक सुख-दु:ख यद्यपि अशुद्ध निश्चयनय की अपेक्षा जीवजनित है तथापि शुद्ध निश्चयनय की अपेक्षा कर्मजनित है, आत्मा तो वीतराग निर्विकल्प समाधि में स्थिर हुआ वस्तु को वस्तु के स्वरूप में देखता-जानता है, रागादिक नही करता । यहाँ पारमार्थिक सुख से विपरीत जो सांसारिक सुख-दु:खरूप विकल्प जाल है, वह हेय है, यह तात्पर्य है ।।६४।।

अथ निश्चयेन बंधमोक्षौ कर्म करोतीति प्रतिपादयति—

अब यह प्रतिपादित करते है कि निश्चय नय से बन्ध और मोक्ष कर्मजनित ही है—

**बंधु वि मोक्खु वि सयलु जिय जीवहँ कम्मु जणेइ ।**
**अप्पा किंपि वि कुणइ णवि णिच्छउ एउँ भणेइ ।।६५।।**

बन्धमपि मोक्षमपि सकल जीव जीवाना कर्म जनयति ।
आत्मा किमपि करोति नैव निश्चय एवं भणति ।।६५।।

**बंधु वि मोक्खु वि सयलु जिय जीवहं कम्मु जणेइ** बन्धमपि मोक्षमपि समस्तं हे जीव जीवानां कर्म कर्तृ जनयति **अप्पा किंपि [किंचि] वि कुणइ णवि णिच्छउ एउं भणेइ** आत्मा किमपि न करोति बन्धमोक्षस्वरूपं निश्चय एव भणति । तद्यथा । अनुपचरितासद्भूतव्यवहारेण द्रव्यबन्धं तथैवाशुद्धनिश्चयेन भावबन्धं तथा नयद्वयेन द्रव्य-भावमोक्षमपि यद्यपि जीवः करोति तथापि शुद्धपारिणामिकपरमभावग्राहकेन शुद्धनिश्चय-नयेन न करोत्येव भणति । कोऽसौ । निश्चय इति । अत्र य एव शुद्धनिश्चयेन बन्धमोक्षौ न करोति स एव शुद्धात्मोपादेय इति भावार्थः ॥६५॥

**जिय ! बंधु वि मोक्खु वि सयलु जीवहं कम्मु जणेइ । अप्पा किं पि वि णवि कुणइ, णिच्छउ एउं भणेइ ॥६५॥** हे जीव ! बन्ध और मोक्ष सबको जीवो के कर्म ही उत्पन्न करते है । आत्मा कुछ भी नही करता । निश्चयनय ऐसा कहता है । **भावार्थ**—अनुपचरित असद्भूत व्यवहारनय से ज्ञानावरणादि द्रव्यकर्मबन्ध को और अशुद्धनिश्चयनय से रागादि भावकर्मबन्ध को तथा दोनो नयों से द्रव्यमोक्ष और भावमोक्ष को यद्यपि जीव करता है तथापि शुद्ध पारिणामिक परम भाव के ग्रहण करने वाले शुद्ध निश्चयनय से नही करता है । यहाँ जो शुद्धनिश्चय नय से बन्ध और मोक्ष का कर्त्ता नही है, वही शुद्धात्मा उपादेय है—यह अभिप्राय है ॥६५॥

अथ स्थलसंख्याबाह्यं प्रक्षेपकं कथयति—

आगे, दोहासूत्रों की स्थलसंख्या से बाहर प्रक्षेपक का कथन करते है—

**सो णत्थि त्ति पएसो चउरासी-जोणि-लक्ख-मज्झम्मि ।**
**जिण-वयणं ण लहंतो जत्थ ण डुलुडुल्लिओ जीवो ॥६५*१॥**

स नास्ति इति प्रदेशः चतुरशीतियोनिलक्षमध्ये ।
जिनवचनं न लभमानः यत्र न भ्रमितः जीवः ॥६५*१॥

**सो णत्थि त्ति पएसो** स प्रदेशो नास्त्यत्र जगति । स किम् । **चउरासीजोणि-लक्खमज्झम्मि जिणवयणं ण लहंतो जत्थ ण डुलुडुल्लिओ जीवो** चतुर्लक्षेषु मध्ये भूत्वा जिनवचनमलभमानो यत्र न भ्रमितो जीव इति । तथाहि । भेदाभेदरत्नत्रयप्रतिपादकं जिनवचनमलभमानः सन्नयं जीवोऽनादिकाले यत्र चतुरशीतियोनिलक्षेषु मध्ये भूत्वा न भ्रमितः सोऽत्र कोऽपि प्रदेशो नास्ति इति । अत्र यदेव भेदाभेदरत्नत्रयप्रतिपादकं जिन-वचनमलभमानो भ्रमितो जीवस्तदेवोपादेयात्मसुखप्रतिपादकत्वादुपादेयमिति तात्प-र्यार्थः ॥६५*१॥

**सो णत्थि त्ति पएसो जत्थ चउरासी-जोणि-लक्ख-मज्झम्मि जिणवयणं ण लहंतो जीवो ण डुलुडुल्लिओ ॥६५*१॥** इस जगत् में ऐसा कोई भी प्रदेश-स्थान नहीं है जहाँ चौरासी लाख योनियों मे होकर जिनवचन को नही प्राप्त करते हुए यह जीव नही भटका हो । निश्चय व्यवहार रत्नत्रय के

प्रतिपादक जिनवचन को नहीं पाते हुए यह जीव अनादि काल से चौरासी लाख योनियों में होकर जहाँ न घूमा हो ऐसा जगत् में एक भी प्रदेश नहीं है। यहाँ अभिप्राय यह है कि जिस भेदाभेदरत्नत्रय के प्रतिपादक जिनवचन के न पाने से यह जीव भटका है, वे ही जिनवचन उपादेय-आत्मसुख के प्रतिपादक होने के कारण उपादेय हैं, आराधने योग्य है, यह तात्पर्य है ॥६५*१॥

अथात्मा पङ्गुवत् स्वयं न याति न चैति कर्मैव नयत्यानयति चेति कथयति—

अब, पङ्गु के समान आत्मा भी स्वयं न कहीं जाता है, न आता है, कर्म ही इसको ले जाते हैं और लाते हैं, ऐसा कहते हैं –

**अप्पा पंगुह अणुहरइ अप्पु ण जाइ ण एइ।**
**भुवणत्तयहँ वि मज्झि जिय विहि आणइ विहि णेइ ॥६६॥**

आत्मा पङ्गोः अनुहरति आत्मा न याति न आयाति।
भुवनत्रयस्य अपि मध्ये जीव विधिः आनयति विधिः नयति ॥६६॥

**अप्पा पंगुह अणुहरइ अप्पु ण जाइ ण एइ** आत्मा पङ्गोरनुहरति सदृशो भवति अयमात्मा न याति न चागच्छति। क्व। **भुवणत्तयहं वि मज्झि जिय विहि आणइ विहि णेइ** भुवनत्रयस्यापि मध्ये हे जीव विधिरानयति विधिर्नयतीति। तद्यथा। अयमात्मा शुद्धनिश्चयेनानन्तवीर्यत्वात् शुभाशुभकर्मरूपनिगलद्वयरहितोऽपि व्यवहारेण अनादिसंसारे स्वशुद्धात्मभावनाप्रतिबन्धकेन मनोवचनकायत्रयेणोपार्जितेन कर्मणा निर्मितेन पुण्यपापनिगलद्वयेन दृढतरं बद्धः सन् पंगुवद्भूत्वा स्वयं न याति न चागच्छति स एवात्मा परमात्मोपलम्भप्रतिपक्षभूतेन विधिशब्दवाच्येन कर्मणा भुवनत्रये नीयते तथैवानीयते चेति। अत्र वीतरागसदानन्दैकरूपात्सर्वप्रकारोपादेयभूतात्परमात्मनो यद्भिन्नं शुभाशुभकर्मद्वयं तद्धेयमिति भावार्थः ॥६६॥ इति कर्मशक्तिस्वरूपकथनस्थले सूत्राष्टकं गतम्।

**जिय ! अप्पा पंगुह अणुहरइ, अप्पु ण जाइ ण एइ। भुवणत्तयहँ वि मज्झि विहि आणइ विहि णेइ ॥६६॥** हे जीव ! यह आत्मा पंगु के समान है। स्वयं न कहीं जाता है, न आता है तीनों लोकों में इस जीव को कर्म ही ले जाता है और कर्म ही लाता है। यह आत्मा शुद्धनिश्चयनय से अनन्तवीर्य का धारी होने से शुभाशुभ कर्मरूप बन्धन से रहित है, तो भी व्यवहारनय से अनादिसंसार में स्वशुद्धात्मभावना के प्रतिबन्धक मन-वचन-काय से उपार्जित कर्मों से निर्मित पुण्यपापरूप बेड़ियों से दृढतर बँधा हुआ होने के कारण पंगु के समान होकर अपने आप न तो जाता है, न आता है। वही आत्मा परमात्मा की प्राप्ति के प्रतिबन्धक, विधि शब्द से वाच्य कर्मों से तीनों लोकों में लाया-ले जाया जाता है। यहाँ, वीतराग परम आनन्दरूप, सब प्रकार से उपादेयभूत परमात्मा से भिन्न जो शुभाशुभ कर्म हैं, वे हेय हैं, यह भावार्थ है ॥६६॥ इस प्रकार कर्मशक्तिस्वरूप को बताने वाले आठ दोहासूत्र कहे।

अत ऊर्ध्वं भेदाभेदभावनामुख्यतया पृथक्-पृथक् स्वतन्त्रसूत्रनवकं कथयति—

अब, भेदाभेदभावना की मुख्यता से पृथक्-पृथक् नौ स्वतन्त्र सूत्र कहते हैं—

**अप्पा अप्पु जि परु जि परु अप्पा परु जि ण होइ ।**
**परु जि कयाइ वि अप्पु णवि णियमें पभणहिं जोई ।।६७।।**

आत्मा आत्मा एव परः एव परः आत्मा परः एव न भवति ।
पर एव कदाचिदपि आत्मा नैव नियमेन प्रभणन्ति योगिनः ।।६७।।

**अप्पा अप्पु जि परु जि परु अप्पा परु जि ण होइ** आत्मात्मैव पर एव परः आत्मा पर एव न भवति । **परु जि कयाइ वि अप्पु णवि णियमें पभणहिं जोई** पर एव कदाचिदप्यात्मा नैव भवति नियमेन निश्चयेन भणन्ति कथयन्ति । के कथयन्ति । परमयोगिन इति । तथाहि । शुद्धात्मा केवलज्ञानादिस्वभाव शुद्धात्मात्मैव परः कामक्रोधादिस्वभावः पर एव पूर्वोक्त परमात्माभिधान तदैकस्वस्वभाव त्यक्त्वा कामक्रोधादिरूपो न भवति । कामक्रोधादिरूप पर क्वापि काले शुद्धात्मा न भवतीति परमयोगिनः कथयन्ति । अत्र मोक्षसुखादुपादेयभूतादभिन्न कामक्रोधादिभ्यो भिन्नो यः शुद्धात्मा स एवोपादेय इति तात्पर्यार्थ ।।६७।।

**अप्पा अप्पु जि, परु परु जि, अप्पा परु ण जि होइ । परु जि कयाइ वि अप्पु णवि, णियमें जोई पभणहि ।।६७।।** आत्मा आत्मा ही है, पर पदार्थ पर ही है, आत्मा तो परद्रव्य नहीं होता और परद्रव्य भी कभी आत्मा नही होता, ऐसा निश्चय से योगीश्वर कहते है । शुद्धात्मा तो केवलज्ञानादि स्वभाव है, शुद्धात्मस्वरूप ही है, परवस्तु जो काम-क्रोधादि स्वभाव है, वह पर वस्तु—भावकर्म, द्रव्यकर्म, नोकर्म ही है । पूर्वोक्त परमात्मा सज्ञा वाला आत्मा अपने ज्ञानस्वभाव को छोड कर काम-क्रोधादिरूप नही होता है । कामक्रोधादिरूप पर ही हैं, ये कभी शुद्धात्मा नही होते और शुद्धात्मा कभी इन रूप नही होता, ऐसा योगीश्वर कहते है । (ससार-अवस्था मे यह आत्मा अशुद्ध निश्चयनय से कामक्रोधादिरूप हो गया है तथापि शुद्ध निश्चयनय की अपेक्षा निज भावरूप ही है ।) यहाँ उपादेयरूप मोक्षसुख से अभिन्न और काम-क्रोधादिक से भिन्न जो शुद्धात्मा है, वही उपादेय है, यह **अभिप्राय** है ।।६७।।

अथ शुद्धनिश्चयेनोत्पत्ति मरण बन्धमोक्षौ न करोत्यात्मेति प्रतिपादयति—

अब, शुद्धनिश्चयनय से आत्मा जन्म, मरण, बन्ध और मोक्ष नही करता है, यह प्रतिपादित करते है—

**ण वि उप्पज्जइ ण वि मरइ बंधु ण मोक्खु करेइ ।**
**जिउ परमत्थें जोइया जिणवरु एउँ भणेइ ।।६८।।**

नापि उत्पद्यते नापि म्रियते बन्ध न मोक्ष करोति ।
जीव परमार्थेन योगिन् जिनवर एवं भणति ।।६८।।

नाप्युत्पद्यते नापि म्रियते बन्धमोक्ष च न करोति । कोऽसौ कर्ता । जीवः । **केन** परमार्थेन हे योगिन् जिनवर एव ब्रूते कथयति । तथाहि । यद्यप्यात्मा शुद्धात्मानुभूत्यभावे सति शुभाशुभोपयोगाभ्या परिणम्य जीवितमरणशुभाशुभबन्धान् करोति । शुद्धात्मानुभूतिसद्भावे तु शुद्धोपयोगेन परिणम्य मोक्ष च करोति तथापि शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन न करोति । अत्राह शिष्य । यदि शुद्धद्रव्यार्थिकलक्षणेन शुद्धनिश्चयेन मोक्ष च न करोति तर्हि शुद्धनयेन मोक्षो नास्तीति तदर्थमनुष्ठान वृथा । परिहारमाह । मोक्षो हि बन्धपूर्वक, स च बन्ध शुद्धनिश्चयेन नास्ति, तेन कारणेन बन्धप्रतिपक्षभूतो मोक्ष सोऽपि शुद्धनिश्चयेन नास्ति यदि पुन शुद्धनिश्चयेन बन्धो भवति तदा सर्वदैव बन्ध एव । अस्मिन्नर्थे दृष्टान्तमाह । एक कोऽपि पुरुष. शृङ्खलाबद्धस्तिष्ठति द्वितीयस्तु बन्धनरहितस्तिष्ठति यस्य बन्धभावो मुक्त इति व्यवहारो घटते, द्वितीय प्रति मोक्षो जातो भवत इति यदि भण्यते तदा कोप करोति । कस्माद्बन्धाभावे मोक्षवचन कथ घटत इति । तथा जीवस्यापि शुद्धनिश्चयेन बन्धाभावे मुक्तवचन न घटते इति । अत्र वीतरागनिर्विकल्पसमाधिरतो मुक्तजीवसदृश स्वशुद्धात्मोपादेय इति भावार्थ ।।६८।।

**जोइया परमत्थें जिउ ण उप्पज्जइ, ण वि मरइ, ण बंधु मोक्खु करेइ । एउँ जिणवरु भणेइ ।।६८।।** हे योगी ! परमार्थ से विचार किया जावे तो यह जीव न तो उत्पन्न होता है, न मरता है और न बन्ध-मोक्ष को करता है, ऐसा जिनेन्द्रदेव कहते है । **भावार्थ**—यद्यपि आत्मा शुद्धात्मानुभूति के अभाव मे शुभ-अशुभ उपयोगरूप परिणमन कर जीवन, मरण, शुभ, अशुभ कर्मबन्ध करता है और शुद्धात्मानुभूति के सद्भाव मे शुद्धोपयोग मे परिणत हो कर मोक्ष को करता है तो भी शुद्ध पारिणामिक परमभावग्राहक शुद्ध द्रव्यार्थिक नय से न बन्ध को करता है, न मोक्ष को । यहाँ शिष्य **प्रश्न** करता है कि यदि शुद्ध द्रव्यार्थिक स्वरूप शुद्ध निश्चयनय से मोक्ष का भी कर्ता नही है, तो ऐसा समझना चाहिए कि शुद्ध नय से मोक्ष ही नही है तो फिर उसके लिए प्रयत्न करना वृथा है । इसका **उत्तर** देते है :--मोक्ष बन्धपूर्वक है, वह बन्ध शुद्ध निश्चयनय की अपेक्षा होता नही, इस कारण से बन्ध का प्रतिपक्षी मोक्ष भी शुद्ध निश्चय नय से नही है । यदि शुद्ध निश्चय नय से बन्ध होता, तो हमेशा बन्ध ही रहता, कभी बन्ध का अभाव नहीं होता । इस सम्बन्ध मे एक दृष्टान्त कहते है— कोई एक पुरुष सांकल से बँधा हुआ है, दूसरा कोई पुरुष बन्धनरहित है इनमे से जो बँधा है, उसके छूटने पर मुक्त हुआ, यह व्यवहार घटित होता है किन्तु दूसरे के लिए यह कहे कि वह मुक्त हुआ तो वह क्रोध करता है (कि मै बँधा ही कब था जो अब आप मुझे 'मुक्त' कहते है) क्योंकि बन्ध के अभाव मे 'मुक्त' वचन का व्यवहार घटित नही होता । इसी प्रकार यह जीव शुद्ध निश्चयनय से बँधा हुआ नही है अत. इसे मुक्त कहना ठीक नही है । बंध भी व्यवहारनय से है और मुक्त भी व्यवहारनय

मे। यहाँ यह अभिप्राय है कि सिद्ध समान यह अपना शुद्धात्मा वीतराग निर्विकल्पसमाधि में लीन पुरुषों को उपादेय है ॥६८॥

अथ निश्चयनयेन जीवस्योद्भवजरामरणरोगलिङ्गवर्णसंज्ञा नास्तीति कथयन्ति—

निश्चयनय से जीव के जन्म, जरा, मरण, रोग, लिंग, वर्ण और संज्ञा नहीं है, ऐसा कहते हैं—

**अत्थि ण उब्भउ जर-मरणु रोय वि लिंग वि वण्ण।**
**णियमिं अप्पु वियाणि तुहुँ जीवहँ एक्क वि सण्ण ॥६९॥**

अस्ति न उद्भवः जरामरण रोगाः अपि लिङ्गान्यपि वर्णाः।
नियमेन आत्मन् विजानीहि त्वं जीवस्य एकापि संज्ञा ॥६९॥

**अत्थि ण उब्भउ जरमरणु रोय वि लिंग वि वण्ण** अस्ति न न विद्यते। किं किं नास्ति। **उब्भउ** उत्पत्तिः जरामरण रोगा अपि लिङ्गान्यपि वर्णाः **णियमिं वियाणि तुहुं जीवहं एक्क वि सण्ण** नियमेन निश्चयेन हे आत्मन् हे जीव विजानीहि त्वम्। कस्य नास्ति। जीवस्य न केवलमेतन्नास्ति संज्ञापि नास्तीति। अत्र संज्ञाशब्देनाहारादिसंज्ञा नामसंज्ञा वा ग्राह्या। तथाहि। वीतरागनिर्विकल्पसमाधेर्विपरीतैः क्रोधमानमायालोभप्रभृतिविभावपरिणामैर्यान्युपार्जितानि कर्माणि तदुदयजनितान्युद्भवादीनि शुद्धनिश्चयेन न सन्ति जीवस्य। ते कस्मान्न सन्ति। केवलज्ञानाद्यनन्तगुणैः कृत्वा निश्चयेनानादिसंतानागतोद्भवादिभ्यो भिन्नत्वादिति। अत्र उपादेयरूपानन्तसुखाविनाभूतशुद्धजीवात्तत्सकाशाद्यानि भिन्नान्युद्भवादीनि तानि हेयानीति तात्पर्यार्थः ॥६९॥

**अप्पु जीवहँ उब्भउ न, जर-मरणु रोय वि लिंग वि वण्ण, एक्क सण्ण वि ण अत्थि, तुहुँ णियमिं वियाणि** ॥६९॥ हे आत्मन्! जीव के जन्म नहीं है, जरा, मरण, रोग, चिह्न, वर्ण, आहारादिक एक भी संज्ञा वा नाम नहीं है, ऐसा तू निश्चय से जान। वीतरागनिर्विकल्पसमाधि से विपरीत जो क्रोध, मान, माया, लोभ आदि विभाव परिणाम है, उनसे उपार्जित कर्मों के उदय से उत्पन्न हुए जन्म-मरण आदि अनेक विकार है, वे शुद्धनिश्चयनय से जीव के नहीं हैं क्योंकि निश्चयनय से आत्मा केवलज्ञानादि अनन्त गुणों से परिपूर्ण है और अनादि सन्तान से प्राप्त जन्म-जरा-आदि सब से पूर्णत भिन्न है। यहाँ उपादेय रूप अनन्त सुख का धाम जो शुद्ध जीव है, उससे भिन्न जन्मादिक सब त्याज्य है, एक आत्मा ही उपादेय है, यह **अभिप्राय** जानना ॥६९॥

यद्युद्भवादीनि स्वरूपाणि शुद्धनिश्चयेन जीवस्य न सन्ति तर्हि कस्य सन्तीति प्रश्ने देहस्य भवन्तीति प्रतिपादयति—

यदि शुद्ध निश्चयनय से जन्म-मरणादि जीव के नहीं है तो किसके है? ऐसा **प्रश्न** करने पर **समाधान** करते है कि ये सब देह के है—

**देहहँ उब्भउ जर-मरणु देहहँ वण्णु विचित्तु।**
**देहहँ रोय वियाणि तुहुँ देहहँ लिंगु विचित्तु ॥७०॥**

देहस्य उद्भवः जरामरणं देहस्य वर्णः विचित्रः ।
देहस्य रोगान् विजानीहि त्वं देहस्य लिङ्गं विचित्रम् ॥७०॥

देहस्य भवति । किं किम् । उब्भउ उत्पत्तिः जरामरणं च वर्णो विचित्रः । वर्ण-शब्देनात्र पूर्वसूत्रे च श्वेतादि ब्राह्मणादि वा गृह्यते । तस्यैव देहस्य रोगान् विजानी-हीति, लिङ्गमपि लिङ्गशब्देनात्र पूर्वसूत्रे च स्त्रीपुंनपुंसकलिङ्गं यतिलिङ्गं वा ग्राह्यं चित्त मनश्चेति । तद्यथा—शुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयभावनाप्रतिकूलै रागद्वेषमोहैर्यान्युपार्जितानि कर्माणि तदुदयसंपन्ना जन्ममरणादिधर्मा यद्यपि व्यवहार-नयेन जीवस्य सन्ति तथापि निश्चयनयेन देहस्येति ज्ञातव्यम् । अत्र देहादिममत्वरूप विकल्पजालं त्यक्त्वा यदा वीतरागसदानन्दैकरूपेण सर्वप्रकारोपादेयभूतेन परिणमति तदा स्वशुद्धात्मैवोपादेय इति भावार्थः ॥७०॥

**तुहुँ देहहँ उब्भउ, जरमरणु, देहहँ विचित्तु वण्णु, देहहँ रोय, देहहँ विचित्तु लिंगु वियाणि ॥७०॥** गुरुदेव कहते हैं कि हे शिष्य ! तू देह के जन्म-जरा-मरण होते हैं, देह के अनेक रंग (श्वेत श्याम रक्त पीत हरित) अथवा वर्ण (ब्राह्मण क्षत्रिय वैश्य शूद्र) होते हैं, देह के रोग होते हैं, देह के अनेक प्रकार के लिंग-स्त्री, पुरुष, नपुंसक आदि होते हैं, ऐसा जान । **भावार्थ**-शुद्धात्मा के सम्यक् श्रद्धान, ज्ञान आचरण रूप अभेद रत्नत्रय की भावना से प्रतिकूल राग-द्वेष, मोहादि से उपार्जित कर्मों के उदय से सम्पन्न जन्म-मरणादि धर्म यद्यपि व्यवहारनय से जीव के हैं तथापि निश्चयनय से देह के ही जानने चाहिए। यहाँ पर देहादिक में ममतारूप विकल्पजाल को छोड़कर जब यह जीव वीतराग सदानन्दरूप सब तरह उपादेय रूप निज भावों में परिणमता है तब इसके लिए स्वशुद्धात्मा ही उपादेय है, ऐसा अभिप्राय जानो ॥७०॥

अथ देहस्य जरामरणं दृष्ट्वा मा भयं जीव कार्षीरिति निरूपयति—

अब यह कहते हैं कि हे जीव ! देह के जरा-मरण देख कर तू भय मत कर—

**देहहँ पेक्खवि जर-मरणु मा भउ जीव करेहि ।**
**जो अजरामरु बंभु परु सो अप्पाणु मुणेहि ॥७१॥**

देहस्य दृष्ट्वा जरामरणं मा भयं जीव कार्षीः ।
यः अजरामरः ब्रह्मा परः तं आत्मानं मन्यस्व ॥७१॥

**देहहं पेक्खवि जरमरणु मा भउ जीव करेहि** देहसंबन्धि दृष्ट्वा । किम् । जरा-मरणम् । मा भयं कार्षीः हे जीव । अयमर्थो यद्यपि व्यवहारेण जीवस्य जरामरणं तथापि शुद्धनिश्चयेन देहस्य न च जीवस्येति मत्वा भयं मा कार्षीः । तर्हि किं कुरु ।

**जो अजरामरु बंभु परु सो अप्पाणु मुणेहि** य. कश्चिदजरामरो जरामरणरहितब्रह्मशब्द-वाच्य: शुद्धात्मा। कथंभूत.। पर. सर्वोत्कृष्टस्तमित्थभूतं परं ब्रह्मस्वभावमात्मानं जानीहि पञ्चेन्द्रियविषयप्रभृतिसमस्तविकल्पजाल मुक्त्वा परमसमाधौ स्थित्वा तमेव भावयेति भावार्थ: ॥७१॥

**जीव ! देहहँ जर-मरणु पेक्खिवि भउ मा करेहि। जो अजरामरु परु बंभु सो अप्पाणु मुणेहि ॥७१॥** हे जीव ! देह की वृद्धावस्था और मरण देखकर तू भय मत कर, जो अजर-अमर-परब्रह्म है, उसे ही तू आत्मा जान। यद्यपि व्यवहारनय से जीव के जरा-मरण है तो भी शुद्धनिश्चयनय की अपेक्षा ये जीव के नही है, देह के है। तू अपने चित्त मे ऐसा समझ कि जो कोई जरा-मरण रहित अखण्ड परब्रह्म है, वैसा ही मेरा स्वरूप है, शुद्धात्मा सर्वोत्कृष्ट है, ऐसा तू अपना स्वभाव जान। पञ्चेन्द्रियों के विषयादि समस्त विकल्प समूहों को छोड़कर परमसमाधि मे स्थिर होकर स्वशुद्धात्मा का ही ध्यान कर, यह **भावार्थ** है ॥७१॥

अथ देहे छिद्यमानेऽपि भिद्यमानेऽपि शुद्धात्मान भावयेत्यभिप्राय मनसि धृत्वा सूत्र प्रतिपादयति---

अब, देह के छिद-भिद जाने पर भी तू शुद्धात्मा का ध्यान कर, ऐसा अभिप्राय मन में रख कर सूत्र का प्रतिपादन करते है

**छिज्जउ भिज्जउ जाउ खउ जोइय एहु सरीरु।**
**अप्पा भावहि णिम्मलउ जिं पावहि भव-तीरु ॥७२॥**

छिद्यता भिद्यता यातु क्षय योगिन् इद शरीरम्।
आत्मान भावय निर्मल येन प्राप्नोषि भवतीरम् ॥७२॥

**छिज्जउ भिज्जउ जाउ खउ जोइय एहु सरीरु** छिद्यता वा द्विधा भवतु भिद्यता वा छिद्रीभवतु क्षय वा यातु हे योगिन् इदं शरीर तथापि त्वं किं कुरु। **अप्पा भावहि णिम्मलउ** आत्मान वीतरागचिदानन्दैकस्वभाव भावय। किंविशिष्टम्। निर्मल भावकर्मद्रव्यकर्मनोकर्मरहितम्। येन किं भवति। **जिं पावहि भवतीरु** येन परमात्मध्यानेन प्राप्नोषि लभसे त्व हे जीव। किम्। भवतीर ससारसागरावसान-मिति अत्र योऽसौ देहस्य छेदनादिव्यापारेऽपि रागद्वेषादिक्षोभमकुर्वन् सन् शुद्धात्मान भाव-यतीति संपादनादर्वाङ्मोक्ष स गच्छतीति भावार्थ: ॥७२॥

**जोइय एहु सरीरु छिज्जउ भिज्जउ खउ जाउ, णिम्मलउ अप्पा भावहि, जिं भवतीरु पावहि ॥७२॥** हे योगी ! यह शरीर छिद जावे-दो टुकड़े हो जावे, अथवा भिद जावे-छिद्र सहित हो जावे, नाश को प्राप्त हो जावे तो भी तू क्या कर ? अपने निर्मल आत्मा का ही ध्यान कर अर्थात् वीतराग चिदानन्द शुद्धस्वभाव तथा भावकर्म द्रव्यकर्म नोकर्म रहित अपने आत्मा का ही

चिन्तन कर, जिससे तू भवसागर का पार पाएगा। **भावार्थ**–जो इस देह के छेदनादि व्यापार के होने पर भी रागद्वेष क्षोभ आदि न करते हुए शुद्धात्मा को ध्याता है, वह थोड़े ही काल में मोक्ष को प्राप्त करता है ।।७२।।

अथ कर्मकृतभावानचेतनं द्रव्यं च निश्चयनयेन जीवाद्भिन्नं जानीहीति कथयति-

अब कहते है कि कर्मकृत भावो को और अचेतन द्रव्य शरीरादि को निश्चयनय से जीव से भिन्न जानो—

**कम्महँ केरा भावडा अण्णु अचेयणु दव्वु ।**
**जीव-सहावहँ भिण्णु जिय णियमिं बुज्झहि सव्वु ।।७३।।**

कर्मणः सम्बन्धिनः भावाः अन्यत् अचेतनं द्रव्यम् ।
जीवस्वभावात् भिन्नं जीव नियमेन बुध्यस्व सर्वम् ।।७३।।

**कम्महं केरा भावडा अण्णु अचेयणु दव्वु** कर्मसम्बन्धिनो रागादिभावा अन्यत् चाचेतन देहादिद्रव्य एतत्पूर्वोक्त **अप्पसहावहं भिण्णु** जिय विशुद्धज्ञान-दर्शनस्वरूपादात्मस्वभावान्निश्चयेन भिन्न पृथग्भूत हे जीव **णियसि बुज्झहि सव्वु** नियमेन निश्चयेन बुध्यस्व जानीहि सर्वं समस्तमिति । अत्र मिथ्यात्वाविरतिप्रमाद-कषाययोगनिवृत्तिपरिणामकाले शुद्धात्मोपादेय इति तात्पर्यार्थ ।।७३।।

**जिय कम्महँ केरा भावडा अण्णु अचेयणु दव्वु सव्वु णियमिं जीव-सहावहँ भिण्णु बुज्झहि** ।।७३।। हे जीव ! कर्मजन्य रागादि भाव और शरीरादिक अचेतन पदार्थ इन सबको नियम से जीव के स्वभाव से भिन्न जानो। ये सब कर्मोदयजनित है, आत्मा का स्वभाव विशुद्ध ज्ञानदर्शनमयी है। **भावार्थ** यह है कि मिथ्यात्व, अविरति, प्रमाद, कषाय और योगो की निवृत्ति रूप परिणाम-काल मे शुद्धात्मा ही उपादेय है ।।७३।।

अथ ज्ञानमयपरमात्मनः सकाशादन्यत्परद्रव्य मुक्त्वा शुद्धात्मानं भावयेति निरू-पयति—

अब कहते है कि ज्ञानमयी परमात्मा से भिन्न पर-द्रव्य को छोडकर तू शुद्धात्मा की भावना कर—

**अप्पा मेल्लिवि णाणमउ अण्णु परायउ भाउ ।**
**सो छंडेविणु जीव तुहुँ भावहि अप्प-सहाउ ।।७४।।**

आत्मानं मुक्त्वा ज्ञानमयं अन्य परं भाव ।
तं त्यक्त्वा जीव त्वं भावय आत्मस्वभावम् ।।७४।।

**अप्पा मेल्लिवि णाणमउ अण्णु परायउ भाउ** आत्मानं मुक्त्वा । किंवि-शिष्टम् । ज्ञानमयं केवलज्ञानान्तर्भूतानन्तगुणराशि निश्चयात् अन्यो भिन्नोऽभ्यन्तरे

मिथ्यात्वरागादिबहिर्विषये देहादिपरभाव: **सो छंडेविणु जीव तुहुं भावहि अप्पसहाउ** तं पूर्वोक्तं शुद्धात्मनो विलक्षणं परभाव छंडयित्वा त्यक्त्वा हे जीव त्व भावय । कम् । स्वशुद्धात्मस्वभावम् । किंविशिष्टम् । केवलज्ञानाद्यनन्तचतुष्टयव्यक्तिरूपकार्यसमयसार-साधकमभेदरत्नत्रयात्मककारणसमयसारपरिणतमिति । अत्र तमेवोपादेय जानीहीत्य-भिप्राय: ।।७४।।

**जीव ! तुहुं णाणमउ अप्पा मेल्लिवि अण्णु परायउ भाउ सो छंडेविणु अप्पसहाउ भावहि** ।।७४।। हे जीव ! तू ज्ञानमयी आत्मा से भिन्न अन्य जो पर-भाव हैं उन्हें छोडकर अपने शुद्ध आत्म-स्वभाव का ध्यान कर । **भावार्थ**-केवलज्ञानादि अनन्त गुणो के समूह आत्मा से भिन्न जो मिथ्यात्व-रागादि अन्तर के भाव तथा देहादि बाहर के पर-भाव हैं, उन्हे त्याग कर केवलज्ञानादि अनन्तचतुष्टय रूप कार्यसमयसार का साधक जो अभेदरत्नत्रयरूप कारण समयसार है, उस रूप परिणत हुए अपने शुद्धात्म स्वभाव का चिन्तन कर और उसे ही उपादेय समझ ।।७४।।

अथ निश्चयेनाष्टकर्मसर्वदोषरहितं सम्यग्दर्शनज्ञानचारित्रसहितमात्मान जानीहीति कथयति—

आगे, निश्चयनय से तू आत्मा को आठ कर्म और सब दोषो से रहित तथा सम्यग्दर्शन-ज्ञान-चारित्र सहित जान—

**अट्ठहँ कम्महँ बाहिरउ सयलहँ दोसहँ चत्तु ।**
**दंसण-णाण-चरित्तमउ अप्पा भावि णिरुत्तु ।।७५।।**

अष्टभ्य कर्मभ्य बाह्य सकलै दोषै त्यक्तम् ।
दर्शनज्ञानचारित्रमय आत्मान भावय निश्चितम् ।।७५।।

**अट्ठहं कम्महं बाहिरउ सयलहं दोसहं चत्तु** अष्टकर्मभ्यो बाह्य शुद्धनिश्चयेन ज्ञानावरणाद्यष्टकर्मभ्यो भिन्नं मिथ्यात्वरागादिभावकर्मरूपसर्वदोषैस्त्यक्तम् । **पुनश्च** किंविशिष्टम् । **दंसणणाणचरित्तमउ** दर्शनज्ञानचारित्रमयं शुद्धोपयोगाविनाभूतै: स्वशुद्धा-त्मसम्यग्दर्शनज्ञानचारित्रैर्निर्वृत्त **अप्पा भावि णिरुत्तु** तमित्थभूतमात्मानं भावय । दृष्ट-श्रुतानुभूतभोगाकांक्षारूपनिदानबन्धादिसमस्तविभावपरिणामान् त्यक्त्वा भावयेत्यर्थ: । **णिरुत्तु** निश्चितम् । अत्र निर्वाणसुखादुपादेयभूतादभिन्न समस्तभावकर्मद्रव्यकर्मभ्यो भिन्नो योऽसौ शुद्धात्मा स एवाभेदरत्नत्रयपरिणतानां भव्यानामुपादेय इति भावार्थ: ।।७५।। एव त्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्ये पृथक् पृथक् स्वतन्त्रं भेदभावना-स्थलसूत्रनवक गतम् ।

**अट्ठहँ कम्महँ बाहिरउ सयलहँ दोसहँ चत्तु दंसण णाण चरित्तमउ अप्पा णिरुत्त भावि** ।।७५।। शुद्ध निश्चयनय की अपेक्षा ज्ञानावरणादि आठ कर्मो से रहित और मिथ्यात्वरागादि सब

दोषों से रहित, शुद्धोपयोग के साथ रहने वाले अपने सम्यग्दर्शन ज्ञान चारित्र रूप आत्मा का निश्चय से ध्यान कर। देखे, सुने और भोगे हुए भोगों की आकांक्षा रूप निदानबन्धादि समस्त विभाव परिणामों को छोड़ कर निजस्वरूप की भावना कर। यहाँ उपादेयभूत निर्वाणसुख से अभिन्न और सब भावकर्म, द्रव्यकर्म, नोकर्म से भिन्न जो शुद्धात्मा है, वही अभेद रत्नत्रय को धारण करने वाले भव्यों को उपादेय है, यह **भावार्थ** हुआ ॥७५॥ ऐसे त्रिविध आत्मा का स्वरूप कहने वाले प्रथम अधिकार में पृथक्-पृथक् स्वतन्त्र भेद-भावना के स्थल में नौ दोहे कहे।

तदनन्तरं निश्चयसम्यग्दृष्टिमुख्यत्वेन स्वतन्त्रसूत्रमेकं कथयति—

अब निश्चय सम्यग्दृष्टि की मुख्यता से एक स्वतन्त्र दोहा सूत्र कहते हैं—

**अप्पिं अप्पु मुणंतु जिउ सम्माइट्ठि हवेइ।**
**सम्माइट्ठिउ जीवडउ लहु कम्मइँ मुच्चेइ ॥७६॥**

आत्मना आत्मानं जानन् जीवः सम्यग्दृष्टिः भवति।
सम्यग्दृष्टिः जीवः लघु कर्मणा मुच्यते ॥७६॥

**अप्पिं अप्पु मुणंतु जिउ सम्माविट्ठि हवेइ** आत्मनात्मानं जानन् सन् जीवो वीतरागस्वसंवेदनज्ञानपरिणतेनान्तरात्मना स्वशुद्धात्मानं जानन्ननुभवन् सन् जीवः कर्ता वीतरागसम्यग्दृष्टिर्भवति। निश्चयसम्यक्त्वभावनाया फलं कथ्यते **सम्माइट्ठिउ जीवडउ लहु कम्मइं मुच्चेइ** सम्यग्दृष्टिः जीवो लघु शीघ्रं ज्ञानावरणादिकर्मणा मुच्यते इति। अत्र येनैव कारणेन वीतरागसम्यग्दृष्टिः किल कर्मणा शीघ्रं मुच्यते तेनैव कारणेन वीतरागचारित्रानुकूलं शुद्धात्मानुभूत्यविनाभूतं वीतरागसम्यक्त्वमेव भावनीयमित्यभिप्रायः। तथा चोक्तं **श्रीकुन्दकुन्दाचार्यैर्मोक्षप्राभृते** निश्चयसम्यक्त्वलक्षणम्—"**सद्दव्वरओ सवणो सम्माविट्ठी हवेइ णियमेण। सम्मत्तपरिणदो उण खवेइ दुट्ठट्ठकम्माइं ॥**" ॥७६॥

**अप्पिं अप्पु मुणंतु जिउ सम्माइट्ठि हवेइ, सम्माइट्ठिउ जीवडउ लहु कम्मइँ मुच्चेइ ॥७६॥** अपने को अपने से जानता हुआ यह जीव सम्यग्दृष्टि होता है और सम्यग्दृष्टि जीव शीघ्र कर्मों से मुक्त हो जाता है। यह आत्मा वीतराग स्वसंवेदनज्ञान में परिणत हुआ अन्तरात्मा होकर अपनी शुद्धात्मा का ज्ञान और अनुभव करते हुए वीतरागसम्यग्दृष्टि होता है तब निश्चयसम्यक्त्व भावना के फलस्वरूप ज्ञानावरणादि कर्मों से शीघ्र मुक्त हो जाता है। यहाँ **अभिप्राय** यह है कि जिस कारण से वीतरागसम्यग्दृष्टि होकर यह जीव कर्मों से शीघ्र छूट जाता है वही कारणरूप वीतरागचारित्र के अनुकूल शुद्धात्मानुभूति का अविनाभावी वीतरागसम्यक्त्व ही ध्याने योग्य है। **श्री कुन्दकुन्दाचार्य ने मोक्षप्राभृत** में निश्चयसम्यक्त्व का लक्षण ऐसा ही कहा है—"जो मुनि स्व द्रव्य अर्थात् अपनी आत्मा में रत है, वह नियम से सम्यग्दृष्टि है और वही सम्यक्त्व भावरूप परिणमन करता हुआ दुष्ट आठ कर्मों का क्षय करता है" ॥७६॥

अत ऊर्ध्वं मिथ्यादृष्टिलक्षणकथनमुख्यत्वेन सूत्राष्टकं कथ्यते तद्यथा—

अब, इससे आगे मिथ्यादृष्टि के लक्षण-कथन की मुख्यता से आठ दोहे कहते हैं—

**पज्जय-रत्तउ जीवडउ मिच्छादिट्ठि हवेइ ।**
**बंधइ बहु-विह-कम्मडा जें संसारु भमेइ ॥७७॥**

पर्यायरक्तो जीवः मिथ्यादृष्टिः भवति ।
बध्नाति बहुविधकर्माणि येन संसार भ्रमति ॥७७॥

**पज्जयरत्तउ जीवडउ मिच्छादिट्ठि हवेइ** पर्यायरक्तो जीवो मिथ्यादृष्टिर्भवति परमात्मानुभूतिरुचिप्रतिपक्षभूताभिनिवेशरूपा व्यावहारिकमूढत्रयादिपञ्चविंशतिमलान्तर्भाविनी मिथ्या वितथा व्यलीका च सा दृष्टिरभिप्रायो रुचिः प्रत्ययः श्रद्धानं यस्य स भवति मिथ्यादृष्टि । स च किंविशिष्ट । नरनारकादिविभावपर्यायरत. । तस्य मिथ्यापरिणामस्य फल कथ्यते । **बंधइ बहुविहकम्मडा जें संसारु भमेइ** बध्नाति बहुविधकर्माणि यै ससार भ्रमति, येन मिथ्यात्वपरिणामेन शुद्धात्मोपलब्धे प्रतिपक्षभूतानि बहुविधकर्माणि बध्नाति तैश्च कर्मभिर्द्रव्यक्षेत्रकालभवभावरूपं पञ्चप्रकारं संसारं परिभ्रमतीति । तथा चोक्त **मोक्षप्राभृते** निश्चयमिथ्यादृष्टिलक्षणम्—"**जो पुणु परदव्वरम्रो मिच्छाइट्ठी हवेइ सो साहू । मिच्छत्तपरिणदो उण बज्झदि दुट्ठट्ठकम्मेहिं ॥**" पुनश्चोक्तं तत्रैव—"**जे पज्जएसु णिरदा जीवा परसमइग त्ति णिद्दिट्ठा । आदसहावम्मि ठिदा ते सगसमया मुणेयव्वा ॥**" अत्र स्वसंवित्तिरूपाद्वीतरागसम्यक्त्वात् प्रतिपक्षभूतं मिथ्यात्वं हेयमिति भावार्थ ॥७७॥

**पज्जय-रत्तउ जीवडउ मिच्छादिट्ठि हवेइ, बहुविहकम्मडा बंधइ जें संसारु भमेइ ॥७७॥** पर्याय मे अनुरक्त जीव मिथ्यादृष्टि होता है, वह अनेक प्रकार के कर्म बाँधता है जिनसे ससार में परिभ्रमण करता रहता है । परमात्मानुभूति की रुचि से विपरीत, तीन मूढता आठ मद, आठ मल, छह अनायतन रूप पच्चीस दोषो से युक्त जो मिथ्या दृष्टि, अभिप्राय, रुचि, प्रत्यय, श्रद्धान जिसके है, वह मिथ्यादृष्टि है । वह मिथ्यादृष्टि नर-नारकादि विभाव पर्यायों में लीन रहता है और मिथ्यात्व परिणाम से शुद्धात्मा के अनुभव से विपरीत अनेक कर्म बांधता है जिनसे द्रव्य, क्षेत्र, काल, भव और भावरूपी पंच प्रकार के ससार मे भटकता रहता है । **मोक्षपाहुड मे श्री कुन्दकुन्दाचार्य** ने निश्चय मिथ्यादृष्टि का लक्षण ऐसा ही कहा है—"जो साधु पर-द्रव्य में रत है, रागी है; वह मिथ्यादृष्टि होता है । वह मिथ्यात्व भावरूप परिणमन करता हुआ दुष्ट अष्ट कर्मों से बँधता है ।" उन्होंने यह भी कहा है कि जो जीव विभाव पर्यायो-नर-नारकादि पर्यायो मे लीन है, उन्हे पर-समय कहा गया है और जो जीव आत्म स्वभाव में स्थित है, वे स्वसमय जानने योग्य है । (**प्रवचनसार गाथा ६४**) । यहाँ **भावार्थ** यह है कि आत्मज्ञान रूपी वीतराग सम्यक्त्व से विपरीत जो मिथ्यात्व है, वह हेय है ॥७७॥

अथ मिथ्यात्वोपार्जितकर्मशक्ति कथयति—

अब, मिथ्यात्व से उपार्जित कर्मों की शक्ति का कथन करते हैं—

**कम्मइँ दिढ-घण-चिक्कणइँ गरुवइँ वज्ज-समाइँ ।**
**णाण-वियक्खणु जीवडउ उप्पहि पाडहिँ ताइँ ।।७८।।**

कर्माणि दृढघनचिक्कणानि गुरुकाणि वज्रसमानि ।
ज्ञानविचक्षण जीव उत्पथे पातयन्ति तानि ।।७८।।

**कम्मइं दिढघणचिक्कणइं गरुवइं वज्जसमाइं** कर्माणि भवन्ति । किंविशिष्टानि । दृढानि बलिष्ठानि घनानि निबिडानि चिक्कणान्यपनेतुमशक्यानि विनाशयितुमशक्यानि गुरुकाणि महान्ति वज्रसमान्यभेद्यानि च । इत्थंभूतानि कर्माणि किं कुर्वन्ति । **णाणवियक्खणु जिवडउ उप्पहि पाडहिं ताइं** ज्ञानविचक्षण जीवमुत्पथे पातयन्ति । तानि कर्माणि युगपल्लोकालोकप्रकाशककेवलज्ञानाद्यनन्तगुणविचक्षण दक्ष जीवमभेदरत्नत्रयलक्षणा-न्निश्चयमोक्षमार्गात्प्रतिपक्षभूत उन्मार्गे पातयन्तीति । अत्रायमेवाभेदरत्नत्रयरूपो निश्चय-मोक्षमार्ग उपादेय इत्यभिप्राय ।।७८।।

**ताइँ दिढ-घण-चिक्कणइँ गरुवइँ वज्ज-समाइँ कम्मइँ णाणवियक्खणु जीवडउ उप्पहि पाडहिँ ।।७८।।** वे बलिष्ठ, बहुत, विनाश करने को अशक्य अत चिकने, भारी और वज्र के समान अभेद्य कर्म ज्ञानादिगुण मे विचक्षण जीव को खोटे मार्ग मे पटक देते है । एक साथ लोकालोक को प्रकाशित करने वाले केवलज्ञानादि अनन्त गुणो मे विचक्षण जीव को वे ससार के कारणभूत कर्म उनके ज्ञानादि गुणो का आच्छादन करके अभेदरत्नत्रयरूप निश्चयमोक्षमार्ग से विपरीत खोटे मार्ग मे डाल देते है । यहाँ **अभिप्राय** यह है कि अभेदरत्नत्रयरूप निश्चयमोक्षमार्ग ही उपादेय है ।।७८।।

अथ मिथ्यापरिणत्या जीवो विपरीत तत्त्व जानातीति निरूपयति—

अब कहते है कि मिथ्यात्व परिणति से यह जीव तत्त्व को विपरीत जानता है —

**जिउ मिच्छत्तेँ परिणमिउ विवरिउ तच्चु मुणेइ ।**
**कम्म-विणिम्मिय भावडा ते अप्पाणु भणेइ ।।७९।।**

जीव मिथ्यात्वेन परिणत विपरीत तत्त्व मनुते ।
कर्मविनिर्मितान् भावान् तान् आत्मान भणति ।।७९।।

**जिउ मिच्छत्तें परिणमिउ विवरिउ तच्चु मुणेइ** जीवो मिथ्यात्वेन परिणत. सन् विपरीतं तत्त्व जानाति, शुद्धात्मानुभूतिरुचिविलक्षणेन मिथ्यात्वेन परिणत सन् जीव पर-मात्मादितत्त्व च यथावद् वस्तुस्वरूपमपि विपरीत मिथ्यात्वरागादिपरिणत जानाति । ततश्च कि करोति । **कम्मविणिम्मिय भावडा ते अप्पाणु भणेइ** कर्मविनिर्मितान् भावान् तानात्मान भणति, विशिष्टभेदज्ञानाभावाद्गौरस्थूलकृशादिकर्मजनितदेहधर्मान जानाती-

त्यर्थ: । अत्र तेभ्य. कर्मजनितभावेभ्यो भिन्नो रागादिनिवृत्तिकाले स्वशुद्धात्मैवोपादेय इति तात्पर्यम् ॥७९॥

**जिउ मिच्छत्ते परिणमिउ तच्चु विवरिउ मुणेइ । कम्मविणिम्मिय भावडा ते अप्पाणु भणेइ ॥७९॥** यह जीव मिथ्यात्व से परिणत होकर तत्त्वों के स्वरूप को विपरीत श्रद्धान करता है और कर्मों से रचे गए भावो को अपने कहता है । वस्तु का स्वरूप तो जैसा है वैसा ही है तो भी यह मिथ्यात्वी जीव वस्तु के स्वरूप को विपरीत जानता है, अपना जो शुद्धज्ञानादि सहित स्वरूप है उसको मिथ्यात्व रागादि रूप जानता है अर्थात् भेदविज्ञान के अभाव से गोरा, काला, मोटा, दुबला आदि कर्मजनित देह के स्वरूप को अपना जानता है । इसी बुद्धि से ससार में परिभ्रमण करता है । यहाँ उन कर्मजनित भावो से भिन्न रागादिनिवृत्ति के काल मे स्वशुद्धात्मा ही उपादेय है, यह **भावार्थ** है ॥७९॥

अथानन्तर तत्पूर्वोक्तकर्मजनितभावान् येन मिथ्यापरिणामेन कृत्वा बहिरात्मा-आत्मनि योजयति त परिणाम सूत्रपञ्चकेन विवृणोति—

अब उन परिणामो का पाँच दोहासूत्रों में कथन करते है जिन कर्मजनित भावों को मिथ्यात्व परिणाम मे बहिरात्मा अपनी आत्मा से जोडता है—

**हउँ गोरउ हउँ सामलउ हउँ जि विभिण्णउ वण्णु ।**
**हउँ तणु-अंगउँ थूलु हउँ एहउँ मूढउ मण्णु ॥८०॥**

अह गौर अह श्याम अहमेव विभिन्न वर्ण ।
अह तन्वङ्ग स्थूल अह एत मूढ मन्यस्व ॥८०॥

अहं गौरो गौरवर्ण , अह श्याम श्यामवर्ण , अहमेव भिन्नो नानावर्ण. मिश्रवर्ण: । क्व । वर्णविषये रूपविषये । पुनश्च कथंभूतोऽहम् । तन्वङ्ग कृशाङ्ग: । पुनश्च कथ-भूतोऽहम् । स्थूल स्थूलशरीर । इत्थभूत मूढात्मानं मन्यस्व । एव पूर्वोक्तमिथ्यापरि-णामपरिणत जीवं मूढात्मान जानीहीति । अयमत्र भावार्थ. । निश्चयनयेनात्मनो भिन्नान् कर्मजनितान् गौरस्थूलादिभावान् सर्वथा हेयभूतानपि सर्वप्रकारोपादेयभूते वीतरागनित्या-नन्दैकस्वभावे शुद्धजीवे यो योजयति स विषयकषायाधीनतया स्वशुद्धात्मानुभूतेश्च्युत सन् मूढात्मा भवतीति ॥८०॥ अथ—

**हउँ गोरउ हउँ सामलउ हउँ जि विभिण्णउ वण्णु हउँ तणु-अंगउँ, हउँ थूलु, एहउँ मूढउ मण्णु ॥८०॥** मैं गौरा हूँ, मैं काला हूँ, मैं ही अनेक वर्ण वाला हूँ, मैं दुबले शरीर वाला हूँ, मै मोटा हूँ, इस प्रकार मानने वाले मिथ्यात्वी जीव को तू मूढ़ मान । **भावार्थ**–निश्चयनय से आत्मा से भिन्न कर्मजनित गौर-स्थूलादि भाव सर्वथा हेय है, जो जीव इनको सब प्रकार से उपादेयभूत वीतराग नित्यानन्द स्वभाव वाले शुद्ध जीव में जोड़ता है, वह विषयकषायों की आधीनतावश अपनी शुद्धात्मा-नुभूति से च्युत हुआ मूढात्मा है ॥८०॥

**हउँ वरु बंभणु वइसु हउँ हउँ खत्तिउ हउँ सेसु ।**
**पुरिसु णउँसर इत्थि हउँ मण्णइ मूढु विसेसु ॥८१॥**

अहं वरः ब्राह्मणः वैश्यः अहं अहं क्षत्रियः अहं शेषः ।
पुरुषः नपुंसकः स्त्री अहं मन्यते मूढः विशेषम् ॥८१॥

**हउँ वरु बंभणु वइसु हउँ हउँ खत्तिउ हउँ सेसु** अहं वरो विशिष्टो ब्राह्मणः अहं वैश्यो वणिग् अहं क्षत्रियोऽहं शेषः शूद्रादिः । पुनश्च कथंभूतः । **पुरिसु णउंसउ इत्थि हउं मण्णइ मूढु विसेसु** पुरुषो नपुंसकः स्त्रीलिङ्गोऽहं मन्यते मूढो विशेषं ब्राह्मणादि-विशेषमिति । इदमत्र तात्पर्यम् । यन्निश्चयनयेन परमात्मनो भिन्नानपि कर्मजनितान् ब्राह्मणादिभेदान् सर्वप्रकारेण हेयभूतानपि निश्चयनयेनोपादेयभूते वीतरागसदानन्दैक-स्वभावे स्वशुद्धात्मनि योजयति सबद्धान् करोति । कोऽसौ कथंभूतः । अज्ञानपरिणतः स्वशुद्धात्मतत्त्वभावनारहितो मूढात्मेति ॥८१॥ अथ—

**मूढु विसेसु मण्णइ, हउँ वरु बंभणु, हउँ वइसु, हउँ खत्तिउ हउँ सेसु, हउँ पुरिसु णउँसर इत्थि ॥८१॥** मिथ्यादृष्टि जीव अपने को ऐसा विशिष्ट मानता है कि मैं सबमें श्रेष्ठ ब्राह्मण हूँ, मैं वैश्य हूँ, मैं क्षत्रिय हूँ, मैं शूद्र हूँ, मैं पुरुष हूँ, मैं नपुंसक हूँ, मैं स्त्री हूँ, । **भावार्थ**–निश्चयनय से परमात्मा से भिन्न इन कर्मजनित ब्राह्मणादि भेदों को सब प्रकार से हेयभूत होते हुए भी निश्चयनय से उपादेय-भूत वीतराग सदा आनन्द स्वभाव निजशुद्धात्मा में जोड़ता है अर्थात् अपने को ब्राह्मण, क्षत्रिय, वैश्य, शूद्र, स्त्री, पुरुष, नपुंसक मानता है, वह (जीव) निज शुद्धात्म तत्त्व की भावना से रहित हुआ, अज्ञान से परिणत मूढात्मा है ॥८१॥

**तरुणउ बूढउ रूयडउ सूरउ पंडिउ दिव्वु ।**
**खवणउ वंदउ सेवडउ मूढउ मण्णइ सव्वु ॥८२॥**

तरुणः वृद्धः रूपवान् शूरः पण्डितः दिव्यः ।
क्षपणकः वन्दकः श्वेतपटः मूढः मन्यते सर्वम् ॥८२॥

**तरुणउ बूढउ रूयडउ सूरउ पंडिउ दिव्वु** तरुणो यौवनस्थोऽहं वृद्धोऽहं रूपस्व्यहं शूरः सुभटोऽहं पण्डितोऽहं दिव्योऽहम् । पुनश्च किंविशिष्टः । **खवणउ वंदउ सेवडउ** क्षपणको दिगम्बरोऽहं वन्दको बौद्धोऽहं श्वेतपटादिलिङ्गधारकोऽहमिति मूढात्मा सर्वं मन्यत इति । अयमत्र तात्पर्यार्थः । यद्यपि व्यवहारेणाभिन्नान् तथापि निश्चयेन वीतराग-सहजानन्दैकस्वभावात्परमात्मनः भिन्नान् कर्मोदयोत्पन्नान् तरुणवृद्धादिविभावपर्यायान् हेयानपि साक्षादुपादेयभूते स्वशुद्धात्मतत्त्वे योजयति । कोऽसौ । ख्यातिपूजालाभादिविभाव-परिणामाधीनतया परमात्मभावनाच्युतः सन् मूढात्मेति ॥८२॥ अथ—

**जोइज्जइ** दृश्यते **तिं** तेन पुरुषेण तेन कारणेन वा । कोऽसौ दृश्यते । **बंभु परु** ब्रह्मशब्दवाच्य शुद्धात्मा । कथभूत । पर उत्कृष्ट । अथवा **पर** इति पाठे नियमेन । न केवलं दृश्यते **जाणिज्जइ** ज्ञायते तेन पुरुषेण तेन कारणेन वा **सोइ** स एव शुद्धात्मा । केन कारणेन । **बंभु मुणेविणु जेण लहु** येन पुरुषेण येन कारणेन वा ब्रह्मशब्दवाच्यनिर्दोषिपरमात्मान मत्वा ज्ञात्वा पश्चात् **गम्मिज्जइ परलोइ** तेनैव पूर्वोक्तेन ब्रह्मस्वरूपे

परिज्ञानपुरुषेण तेनैव कारणेन वा गम्यते । क्व । परलोके परलोकशब्दवाच्ये परमात्मतत्त्वे । किं च । योऽसौ शुद्धनिश्चयनयेन शक्तिरूपेण केवलज्ञानदर्शनस्वभावः परमात्मा स सर्वेषां सूक्ष्मैकेन्द्रियादिजीवाना शरीरे पृथक् पृथग्रूपेण तिष्ठति स एव परमब्रह्मा स एव परमविष्णुः स एव परमशिवः इति, व्यक्तिरूपेण पुनर्भगवानर्हन्नेव मुक्तिगतसिद्धात्मा वा परमब्रह्मा विष्णुः शिवो वा भण्यते । तेन नान्यः कोऽपि परिकल्पितः जगद्व्यापी तथैवैको परमब्रह्मा शिवो वास्तीति । अयमत्रार्थः । यत्रासौ मुक्तात्मा लोकाग्रे तिष्ठति स एव ब्रह्मलोक. स एव विष्णुलोकः स एव शिवलोको नान्य. कोऽपीति भावार्थः ॥१०९॥ अथ—

**तिं परु बंभु जोइज्जइ, तिं सोइ जाणिज्जइ जेण बंभु मुणेविणु परलोइ लहु गम्मिज्जइ** ॥१०९॥ उस कारण से उसी पुरुष से शुद्धात्मा नियम से देखा जाता है, उसी पुरुष से निश्चय से वही शुद्धात्मा जाना जाता है, जो पुरुष जिस कारण अपना स्वरूप जान कर परमात्मतत्त्व में शीघ्र ही प्राप्त होता है । **भावार्थ**–जो यह शुद्ध निश्चयनय की अपेक्षा शक्तिरूप से केवलज्ञान-केवलदर्शन स्वभाव है, वही परमात्मा है । वही सूक्ष्म बादर एकेन्द्रियादि जीवों के शरीर मे जुदा-जुदा रहता है और कर्मों से रहित हो जाने पर सिद्ध कहलाता है । यही आत्मा परमब्रह्म, परमविष्णु, परमशिव शक्तिरूप है और प्रकटरूप से भगवान् अर्हन्त अथवा मुक्तिगत सिद्धात्मा ही परमब्रह्मा परमविष्णु परमशिव कहे जाते है । इनमे भिन्न कोई अन्य परिकल्पित जगद्व्यापी एक परमब्रह्मा, विष्णु या शिव नही है और जहाँ यह मुक्तात्मा लोक के शिखर भाग में ठहरता है, वही ब्रह्मलोक है, वही विष्णुलोक है, वही शिवलोक है, अन्य कोई नही ॥१०९॥

**मुणि-वर-विंदहँ हरि-हरहं जो मणि णिवसइ देउ ।**
**परहँ जि परतरु णाणमउ सो वुच्चइ पर-लोउ ॥११०॥**

मुनिवरवृन्दानां हरिहराणा यः मनसि निवसनि देवः ।
परस्माद् अपि परतर ज्ञानमयः स उच्यते परलोकः ॥११०॥

**मुणिवरविंदहं हरिहरहं** मुनिवरवृन्दानां हरिहराणा च **जो मणि णिवसइ देउ** योऽसौ मनसि निवसति देवः आराध्य. । पुनरपि किंविशिष्टः । **परहं जि परतरु णाणमउ** परस्मादुत्कृष्टादपि अथवा **परहं** जि बहुवचनं परेभ्योऽपि सकाशादतिशयेन परः परतरः । पुनरपि कथभूतः । ज्ञानमयः केवलज्ञानेन निर्वृत्तः **सो वुच्चइ परलोउ** स एवगुणविशिष्टः शुद्धात्मा परलोक इत्युच्यते इति । पर उत्कृष्टो वीतरागचिदानन्दैकस्वभाव आत्मा तस्य लोकोऽवलोकनं निर्विकल्पसमाधौ वानुभवनमिति परलोकशब्दस्यार्थ., अथवा लोक्यन्ते दृश्यन्ते जीवादिपदार्था यस्मिन् परमात्मस्वरूपे यस्य केवलज्ञानेन वा स भवति लोकः परश्चासौ लोकश्च परलोकः व्यवहारेण पुनः स्वर्गापवर्गलक्षण. पर-

लोको भण्यते । अत्र योऽसौ परलोकशब्दवाच्य परमात्मा स एवोपादेय इति तात्पर्यार्थ. ।।११०।।

**जो देउ मुणिवरविंदहँ हरि-हरहं मणि णिवसइ, सो परहँ जि परतरु णाणमउ पर-लोउ वुच्चइ ।।११०।।** जो आत्मदेव मुनीश्वरो के समूह के तथा इन्द्र वा वासुदेव रुद्रों के चित्त में रहता है, वह उत्कृष्ट से भी उत्कृष्ट ज्ञानमयी परलोक कहा जाता है। पर अर्थात् उत्कृष्ट वीतरागचिदानन्द शुद्ध स्वभाव आत्मा, उसका लोक अर्थात् अवलोकन निर्विकल्पसमाधि मे अनुभवन, यह परलोक शब्द का अर्थ है। अथवा जिसके परमात्मस्वरूप मे या केवलज्ञान मे जीवादि पदार्थ देखे जाते है, वह लोक होता है और श्रेष्ठ उत्कृष्ट लोक परलोक है। व्यवहारनय की अपेक्षा स्वर्ग-मोक्ष को परलोक कहा जाता है। **तात्पर्य** यह है कि यहां परलोक शब्द से वाच्य जो परमात्मा है, वही उपादेय है ।।११०।।

अथ—

अब ऐसा कहते है कि जिसका मन निज आत्मा मे बस रहा है, वही ज्ञानी जीव परलोक है —

**सो पर वुच्चइ लोउ परु जसु मइ तित्थु वसेइ ।**
**जहिँ मइ तहिँ गइ जीवहु जि णियमें जेण हवेइ ।।१११।।**

स पर उच्यते लोक पर यस्य मति तत्र वसति ।
यत्र मति तत्र गति जीवस्य एव नियमेन येन भवति ।।१११।।

**सो पर वुच्चइ लोउ परु** स पर नियमेनोच्यते लोको जन । कथभूतो भण्यते । पर उत्कृष्ट । स क । **जसु मइ तित्थु वसेइ** यस्य भव्यजनस्य मतिर्मनश्चित्त तत्र निजपरमात्मस्वरूपे वसति विषयकषायविकल्पजालत्यागेन स्वसवेदनसवित्तिस्वरूपेण स्थिरीभवतीति । यस्य परमात्मतत्त्वे मतिस्तिष्ठति स कस्मात्परो भवतीति चेत् **जहिं मइ तहिं जीवहं जि णियमें जेण हवेइ** येन कारणेन यत्र स्वशुद्धात्मस्वरूपे मतिस्तत्रैव गति । कस्यैव । जीव-जीवस्यैव अथवा बहुवचनपक्षे जीवानामेव निश्चयेन भवतीति । अयमत्र भावार्थ । यद्यार्तरौद्राधीनतया स्वशुद्धात्मभावनाच्युतो भूत्वा परभावेन परिणमति तदा दीर्घससारी भवति, यदि पुनर्निश्चयरत्नत्रयात्मके परमात्मतत्त्वे भावना करोति तर्हि निर्वाण प्राप्नोति इति ज्ञात्वा सर्वरागादिविकल्पत्यागेन तत्रैव भावना कर्तव्येति ।।१११।। अथ—

**जसु मइ तित्थु वसेइ सो परु पर लोउ वुच्चइ, जेण जहिँ मइ तहिँ जीवहु गइ जि णियमें हवेइ ।।१११।।** जिस भव्यजीव की बुद्धि उस निज परमात्मस्वरूप मे बस रही है यानी विषय-कषाय-विकल्प-जाल के त्याग से स्वसवेदन-ज्ञान स्वरूप से स्थिर हो रही है, वह पुरुष निश्चय से उत्कृष्ट जन कहा जाता है क्योंकि जैसी बुद्धि होती है वैसी ही जीव की गति निश्चय से होती है। शुद्धात्मस्वरूप

मे जिस जीव की बुद्धि हो उसकी वैसी ही गति होती है अर्थात् उसको निज पद की प्राप्ति होती है। जो आर्त्तध्यान, रौद्रध्यान की आधीनता से अपने शुद्धात्म की भावना से रहित हुआ रागादिक परभावरूप परिणमन करता है, वह दीर्घसंसारी होता है और जो निश्चयरत्नत्रयात्मक परमात्मतत्त्व मे भावना करता है, वह निर्वाण को प्राप्त करता है। ऐसा जान कर सब रागादिविकल्पो का त्याग कर उसी परमात्मतत्त्व की भावना करनी चाहिए ।।१११।।

**जहिँ मइ तहिँ गइ जीव तुहुँ मरणु वि जेण लहेहि।**
**तेँ परबंभु मुएवि मइँ मा पर-दव्वि करेहि ।।११२।।**

यत्र मतिः तत्र गति जीव त्वं मरणमपि येन लभसे।
तेन परब्रह्म मुक्त्वा मति मा परद्रव्ये कार्षी. ।।११२।।

**जहिं मइ तहिं गइ जीव तुहुं मरणु वि जेण लहेवि** यत्र मतिस्तत्र गति'। हे जीव त्वं मरणेन कृत्वा येन कारणेन लभसे **तें परबंभु मुएवि मइं मा परदव्वि करेहि** तेन कारणेन परब्रह्मशब्दवाच्य शुद्धद्रव्यार्थिकनयेन टङ्कोत्कीर्णज्ञायकैकस्वभाव वीतरागसदानन्दैकसुखामृतरसपरिणत निजशुद्धात्मतत्त्व मुक्त्वा मतिं चित्त परद्रव्ये देहरागादिषु मा कार्षीरिति तात्पर्यार्थ ।।११२।। एव सूत्रचतुष्टयेनान्तरस्थले परलोकशब्दव्युत्पत्त्या परलोकशब्दवाच्यस्य परमात्मनो व्याख्यान गतम्।

**जीव! जहिँ मइ तहिँ गइ जेण तुहुँ मरणु वि लहेहि तेँ परबंभु मुएवि परदव्वि मइँ मा करेहि** ।।११२।। हे जीव! जहाँ तेरी मति है वही तेरी गति है, उसको जिस कारण से तू मर कर पावेगा, इसलिए तू परब्रह्म को छोडकर पर-द्रव्य मे बुद्धि मत लगा। शुद्ध द्रव्यार्थिक नय से टंकोत्कीर्ण ज्ञायक-स्वभाव, वीतराग, सदाआनन्दरूप, अद्वितीय अतीन्द्रिय सुख रूप, अमृतरसतृप्त ऐसे निज शुद्धात्मतत्त्व को छोडकर अपने चित्त को परद्रव्य में—द्रव्यकर्म, भावकर्म, नोकर्म मे या देहादि परिग्रहो मे मत लगा, यह **भावार्थ है** ।।११२।। इस प्रकार चार दोहो सूत्रो से अन्तरस्थल मे परलोक शब्द की व्युत्पत्ति मे परलोक शब्द का अर्थ परमात्मा करने वाला व्याख्यान किया।

तदनन्तर किं तत् परद्रव्यमिति प्रश्ने प्रत्युत्तर ददाति—

अब, वह परद्रव्य क्या है, ऐसा प्रश्न होने पर प्रत्युत्तर देते हैं—

**जं णियदव्वहँ भिण्णु जडु तं पर-दव्वु वियाणि।**
**पुग्गलु धम्माधम्मु णहु कालु वि पंचमु जाणि ।।११३।।**

यत् निजद्रव्याद् भिन्न जडं तत् परद्रव्य जानीहि।
पुद्गल' धर्माधर्मः नभः काल अपि पञ्चम जानीहि ।।११३।।

जमित्यादि। पदखण्डनारूपेण व्याख्यानं क्रियते। **जं** यत् **णियदव्वहं** निज-

द्रव्यात् **भिण्णु** भिन्नं पृथग्भूतं **जडु** जडं **तं** तत् **परदव्वु वियाणि** परद्रव्यं जानीहि । तच्च किम् । **पुग्गलु धम्माधम्मु णहु** पुद्गलधर्माधर्मनभोरूपं **कालु वि** कालमपि **पंचमु जाणि** पञ्चमं जानीहीति । अनन्तचतुष्टयस्वरूपान्निजद्रव्याद्बाह्यं भावकर्मद्रव्यकर्मनो-कर्मरूपं जीवसंबद्धं शेषं पुद्गलादिपञ्चभेदं यत्सर्वं तद्धेयमिति ॥११३॥

**जं णियदव्वहँ भिण्णु जडु तं परदव्वु वियाणि । पुग्गलु धम्माधम्मु णहु कालु वि पंचमु जाणि ॥११३॥** जो निज आत्मद्रव्य से भिन्न जड पदार्थ है, उसे परद्रव्य जानो। पुद्गल, धर्म, अधर्म, आकाश और पाँचवें कालद्रव्य को परद्रव्य जानो। अनन्त चतुष्टय स्वरूप निज आत्मद्रव्य से भिन्न अनादि से जीव से सम्बद्ध भाव कर्म रूप रागादिक, द्रव्यकर्मरूप ज्ञानावरणादि आठ कर्म और नोकर्मरूप शरीरादिक को तथा पुद्गलादि पाँच भेदो को हेय जानो। आत्मतत्त्व ही उपादेय है ॥११३॥

अथ वीतरागनिर्विकल्पसमाधिरन्तर्मुहूर्तेनापि कर्मजालं दहतीति ध्यानसामर्थ्यं दर्शयति—

अब, वीतरागनिर्विकल्प समाधि एक अन्तर्मुहूर्त मे कर्मजाल को जला डालती है, ध्यान की ऐसी शक्ति है, सो दिखाते है—

**जइ णिविसद्धु वि कु वि करइ परमप्पइ अणुराउ ।**
**अग्गि-कणी जिम कट्ठ-गिरी डहइ असेसु वि पाउ ॥११४॥**

यदि निमिषार्धमपि कोऽपि करोति परमात्मनि अनुरागम् ।
अग्निकणिका यथा काष्ठगिरिं दहति अशेषमपि पापम् ॥११४॥

जइ इत्यादि । **जइ णिविसद्धु वि** यदि निमिषार्धमपि **कु वि करइ** कोऽपि कश्चित् करोति । किं करोति । **परमप्पइ अणुराउ** परमात्मन्यनुरागम् । तदा किं करोति । **अग्गिकणी जिम कट्ठगिरी** अग्निकणिका यथा काष्ठगिरिं दहति तथा **डहइ असेसु वि पाउ** दहत्यशेषं पापमिति । तथाहि—ऋद्धिगौरवरसगौरवकवित्ववादित्व-गमकत्ववाग्मित्वचतुर्विधशब्दगौरवस्वरूपप्रभृतिसमस्तविकल्पजालत्यागरूपेण महावातेन प्रज्वलिता निजशुद्धात्मतत्त्वध्यानाग्निकणिका स्तोकाग्निकेन्धनराशिमिवान्तर्मुहूर्तेनापि चिरसंचितकर्मराशिं दहतीति । अत्रैवंविधं शुद्धात्मध्यानसामर्थ्यं ज्ञात्वा तदेव निरन्तरं भावनीयमिति भावार्थः ॥११४॥

**जइ कु वि णिविसद्धु वि परमप्पइ अणुराउ करइ, जिम अग्गिकणी कट्ठ-गिरी डहइ, असेसु वि पाउ ॥११४॥** जो कोई आधे निमेष मात्र भी परमात्मा में अनुराग करे तो जैसे अग्निकणिका काठ के पहाड को जला देती है, उसी तरह सम्पूर्ण पापों को जला डाले। **भावार्थ**—ऋद्धि का गर्व, रसायन का गर्व अर्थात् पारा आदि धातुओ के भस्म करने का मद अथवा नव-रस के जानने का गर्व,

कवित्व का मद, वाद में जीतने का मद, शास्त्र की टीका लिखने का मद, शास्त्र के व्याख्यान का मद, इन चार तरह के शब्द गौरव स्वरूप आदि समस्त विकल्प जालों के त्याग रूप प्रचण्ड पवन से प्रज्वलित, निज शुद्धात्मतत्त्व के ध्यान रूप अग्नि की करणी अन्तर्मुहूर्त मे ही चिर-सचित कर्मराशि को जला डालती है जैसे अग्नि की करणी ईन्धन के ढेर को शीघ्र जला देती है। **भावार्थ** यह है कि शुद्धात्मा के ध्यान की ऐसी सामर्थ्य जान कर सदैव उसी ध्यान की भावना करनी चाहिए ॥११४॥

अथ हे जीव चिन्ताजालं मुक्त्वा शुद्धात्मस्वरूपं निरन्तर पश्येति निरूपयति—

अब, हे जीव ! चिन्ताओ को छोड कर शुद्धात्म स्वरूप का निरन्तर अवलोकन कर, ऐसा कहते है—

**मेल्लिवि सयल अवक्खडी जिय णिच्चिंतउ होइ ।**
**चित्तु णिवेसहि परमपए देउ णिरंजणु जोइ ॥११५॥**

मुक्त्वा सकला चिन्ता जीव निश्चिन्त भूत्वा ।
चित्त निवेशय परमपदे देव निरञ्जन पश्य ॥११५॥

मेल्लिवि इत्यादि । **मेल्लिवि** मुक्त्वा **सयल** समस्तं **अवक्खडी** देशभाषया चिन्ता **जिय** हे जीव **णिच्चिंतउ होइ** निश्चिन्तो भूत्वा । किं कुरु । **चित्तु णिवेसहि** चित्तं निवेशय धारय । क्व । **परमपए** निजपरमात्मपदे । पश्चात् किं कुरु । **देउ णिरंजणु जोइ** देव निरञ्जन पश्येति । तद्यथा । हे जीव दृष्टश्रुतानुभूतभोगाकाक्षास्वरूपापध्यानादि समस्तचिन्ताजाल मुक्त्वा निश्चिन्तो भूत्वा चित्तं परमात्मस्वरूपे स्थिर कुरु, तदनन्तर भावकर्मद्रव्यकर्मनोकर्माञ्जनरहित देवं परमाराध्य निजशुद्धात्मान ध्यायेति भावार्थ. । **अपध्यानलक्षणं** कथ्यते—"[1]**बन्धवधच्छेदादेर्द्वेषाद्रागाच्च परकलत्रादेः । आध्यानमपध्यानं शासति जिनशासने विशदाः ॥"** ॥११५॥

**जिय सयल अवक्खडी मेल्लिवि णिच्चिंतउ होइ चित्तु परमपए णिवेसहि, णिरंजणु देउ जोइ** ॥११५॥ हे जीव ! सम्पूर्ण चिन्ताओ का परित्याग कर निश्चित होकर तू अपने चित्त को परम पद मे लगा और निरजनदेव को देख । हे जीव ! देखे-सुने और भोगे हुए भोगो की वाछा रूप पापध्यानादि समस्त चिन्ताजाल को छोड कर निश्चिन्त हो कर अपने चित्त को परमात्म स्वरूप मे स्थिर कर । तदनन्तर भावकर्म, द्रव्यकर्म और नोकर्म रूप अञ्जन से रहित निरजनदेव परमाराध्य निज शुद्धात्मा का ध्यान कर, यह **भावार्थ है** । पापध्यान या अपध्यान का लक्षण कहा है—निर्मल बुद्धि वाले पुरुष जिनशासन मे उसे अपध्यान कहते हैं जो द्वेष से पर को मारने का, बाँधने का अथवा छेदने का चिन्तन करे और राग भाव से परस्त्री आदि का चिन्तन करे ॥११५॥

अथ शिवशब्दवाच्ये निजशुद्धात्मनि ध्याते यत्सुखं भवति तत्सूत्रत्रयेण प्रतिपादयति—

---

१. समन्तभद्र रत्नकरण्ड श्रावकाचार श्लोक ७८ ।

**अब**, शिव शब्द से कहे गये निज शुद्धात्मा के ध्यान करने पर जो सुख होता है, उस सुख का तीन दोहासूत्रों में वर्णन करते हैं—

**जं सिव-दंसणि परम-सुहु पावहि झाणु करंतु ।**
**तं सुहु भुवणि वि अत्थि णवि मेल्लिवि देउ अणंतु ।।११६।।**

यत् शिवदर्शने परमसुख प्राप्नोषि ध्यान कुर्वन् ।
तत् सुख भुवनेऽपि अस्ति नैव मुक्त्वा देव अनन्तम् ।।११६।।

जमित्यादि । पदखण्डनारूपेण व्याख्यान क्रियते—**जं** यत् **सिवदंसणि** स्वशुद्धात्मदर्शने **परमसुहु** परमसुख **पावहि** प्राप्नोषि **हे प्रभाकरभट्ट** । किं कुर्वन् सन् । **झाणु करंतु** ध्यानं कुर्वन् सन् **तं सुहु** तत्पूर्वोक्तसुख **भुवणि वि** भुवनेऽपि **अत्थि णवि** अस्ति नैव । किं कृत्वा । **मेल्लिवि** मुक्त्वा । कम् । **देउ** देवम् । कथभूतम् । **अणंतु** अनन्तशब्दवाच्यपरमात्मपदार्थमिति । तथाहि—शिवशब्देनात्र विशुद्धज्ञानस्वभावो निजशुद्धात्मा ज्ञातव्य तस्य दर्शनमवलोकनमनुभवन तस्मिन् शिवदर्शनेन परमसुखं निजशुद्धात्मभावनोत्पन्नवीतरागपरमाह्लादरूप लभसे । किं कुर्वन् सन् । वीतरागनिर्विकल्पत्रिगुप्तिसमाधि कुर्वन् । इत्थभूत सुख अनन्तशब्दवाच्यो योऽसौ परमात्मपदार्थस्त मुक्त्वा त्रिभुवनेऽपि नास्तीति । अयमत्रार्थ । शिवशब्दवाच्यो योऽसौ निजपरमात्मा स एव रागद्वेषमोहपरिहारेण ध्यात सन्ननाकुलत्वलक्षण परमसुख ददाति नान्य. कोऽपि शिवनामेति पुरुष ।।११६।। अथ—

**जं झाणु करतु सिव दंसणि परम-सुहु पावहि तं सुहु भुवणि वि अणंतु देउ मेल्लिवि णवि अत्थि ।।११६।।** ध्यान करते हुए, निज शुद्धात्मा के अवलोकन में जो परम सुख हे प्रभाकरभट्ट ! तू पा सकता है, वह सुख तीन लोक में भी परमात्म द्रव्य के सिवाय कहीं नहीं है । शिव शब्द से यहाँ विशुद्ध ज्ञान स्वभाव निज शुद्धात्मा ग्रहण करना चाहिए । उसका जो दर्शन, अवलोकन, अनुभवन है, उसमें आत्मदर्शन से निजशुद्धात्मभावना से उत्पन्न वीतराग परम आह्लादरूप परम सुख तू प्राप्त करता है । क्या करते हुए प्राप्त करता है ? वीतरागनिर्विकल्प त्रिगुप्ति समाधि करते हुए । इस प्रकार का सुख जो अनन्त शब्द से वाच्य है वह परमात्म तत्त्व ही है, उसे छोड़ कर तीन लोक में अन्य कोई नहीं है । **सारांश** यह है कि शिव नाम वाला जो निज परमात्मा है, वही रागद्वेष मोह के त्यागपूर्वक ध्यान किए जाने पर अनाकुल लक्षण वाला परम सुख प्रदान करता है, अन्य कोई शिव नाम का पुरुष नहीं है जो सुख देता हो ।।११६।।

**जं मुणि लहइ अणंत-सुहु णिय-अप्पा झायंतु ।**
**तं सुहु इंदु वि णवि लहइ देविहिँ कोडि रमंतु ।।११७।।**

यत् मुनि लभते अनन्तसुख निजात्मान ध्यायन् ।
तत् सुख इन्द्रोऽपि नैव लभते देवीना कोटि रम्यमाण ।।११७।।

जमित्यादि । **जं** यत् **मुणि** मुनिस्तपोधनः **लहइ** लभते **अणंतसुहु** अनन्तसुखम् । किं कुर्वन् सन् । **णियअप्पा झायंतु** निजात्मानं ध्यायन् सन् **तं सुहु** तत्पूर्वोक्तं सुख **इंदु वि णवि लहइ** इन्द्रोऽपि नैव लभते । कि कुर्वन् सन् । **देविहिं कोडि रमंतु** देवीनां कोटिं रमयन् अनुभवन्निति । अयमत्र तात्पर्यार्थः । बाह्याभ्यन्तरपरिग्रहरहितः स्वशुद्धात्मतत्त्वभावनोत्पन्नवीतरागपरमानन्दसहितो मुनिर्यत्सुख लभते तद्देवेन्द्रादयोऽपि न लभन्त इति । तथा चोक्तम्—**"दह्यमाने जगत्यस्मिन्महता मोहवह्निना । विमुक्तविषयासंगाः सुखायन्ते तपोधनाः"** ।।११७।।

**णिय अप्पा झायंतु मुणि ज अणंत सुहु लहइ, तं सुहु इंदु वि देविहिं कोडि रमंतु णवि लहइ** ।।११७।। अपनी आत्मा का ध्यान करते हुए मुनि जिस अनन्तसुख को प्राप्त करते है, उस सुख को करोडो देवियो के साथ रमण करता हुआ इन्द्र भी नही पाता है । **भावार्थ**—बाह्याभ्यन्तर परिग्रह से रहित मुनि निज शुद्धात्मा की भावना से उत्पन्न हुआ वीतराग परमानन्द सहित जो सुख प्राप्त करता है, वह सुख इन्द्रादिक भी नही प्राप्त करते । कहा भी है—"महामोहरूपी अग्नि से जलते हुए इस जगत् मे विषयसुखो के सग का परित्याग करने वाले तपस्वी ही सुखी है ।" ।।११७।।

**अप्पा-दंसणि जिणवरहँ जं सुहु होइ अणंतु ।**
**तं सुहु लहइ विराउ जिउ जाणंतउ सिउ संतु ।।११८।।**

आत्मदर्शने जिनवराणा यत् सुखं भवति अनन्तम् ।
तत् सुख लभते विराग जीव जानन् शिवं शान्तम् ।।११८।।

अप्पा इत्यादि । **अप्पादंसणि** निजशुद्धात्मदर्शने **जिणवरहं** छद्मस्थावस्थायां जिनवराणा **जं सुहु होइ अणंतु** यत्सुख भवत्यनन्तं **तं सुहु** तत्पूर्वोक्तसुख **लहइ** लभते । कोऽसौ । **विराउ जिउ** वीतरागभावनापरिणतो जीव. किं कुर्वन् सन् । **जाणंतउ** जानन्ननुभवन् सन् । कम् । **सिउ** शिवशब्दवाच्य निजशुद्धात्मस्वभावम् । कथभूतम् । **संतु** शान्तं रागादिविभावरहितमिति । अयमत्र भावार्थः । दीक्षाकाले शिवशब्दवाच्यस्वशुद्धात्मानुभवने यत्सुख भवति जिनवराणा वीतरागनिर्विकल्पसमाधिरतो जीवस्तत्सुखं लभत इति ।।११८।।

**अप्पा दंसणि जिणवरहँ जं अणंतु सुहु होइ तं सुहु विराउ जिउ सिउ संतु जाणंतउ लहइ** ।।११८।। निज शुद्धात्मा के दर्शन में (मुनि अवस्था मे) जिनवरों के जो अनन्त सुख होता है, वह सुख विरक्त जीव (मुनि) निज शुद्धात्म स्वभाव को तथा रागादि विभावरहित शान्तभाव को जानते हुए प्राप्त करता है । **भावार्थ**—दीक्षा के समय जिनवरदेव निज शुद्धात्मा का अनुभव करते हुए जो निर्विकल्प सुख प्राप्त करते हैं, वही सुख वीतराग निर्विकल्प समाधि में रत जीव (विरक्त मुनि) प्राप्त करते हैं ।।११८।।

अथ कामक्रोधादिपरिहारेण शिवशब्दवाच्य परमात्मा दृश्यत इत्यभिप्रायं मनसि संप्रधार्य सूत्रमिद कथयन्ति—

अब, काम-क्रोधादि के परिहार से शिवशब्द से वाच्य परमात्मा दृष्टिगत होता है, ऐसा अभिप्राय मन मे रख कर यह सूत्र कहते है—

**जोइय णिय-मणि णिम्मलए पर दीसइ सिउ संतु ।**
**अंबरि णिम्मलि घण-रहिए भाणु जि जेम फुरंतु ।।११९।।**

योगिन् निजमनसि निर्मले पर दृश्यते शिव शान्त ।
अम्बरे निर्मले घनरहिते भानु इव यथा स्फुरन् ।।११९।।

जोइय इत्यादि । **जोइय** हे योगिन् **णियमणि** निजमनसि । कथभूते । **णिम्मलए** निर्मले **पर** नियमेन **दीसइ** दृश्यते । कोऽसौ । कर्मतापन्न **सिउ** शिवशब्द-वाच्यो निजपरमात्मा । कथभूत । **संतु** शान्त रागादिरहित । दृष्टान्तमाह । अम्बरे आकाशे । कथभूते । **णिम्मलि** निर्मले । पुनरपि कथभूते । **घणरहिए** घनरहिते । क इव । **भाणु जि** भानुरिव यथा । कि कुर्वन् । **फुरंतु** स्फुरन् प्रकाशमान इति । अयमत्र तात्पर्यार्थ. । यथा घनघटाटोपविघटने सति निर्मलाकाशे दिनकर प्रकाशते तथा शुद्धात्मानुभूतिप्रतिपक्षभूताना कामक्रोधादिविकल्परूपघनाना विनाशे सति निर्मल-चित्ताकाशे केवलज्ञानाद्यनन्तगुणकरकलित निजशुद्धात्मादित्य प्रकाश करोतीति ।।११९।।

**जोइय ! णिम्मलए णिय मणि सिउ सतु पर दीसइ । जेम घणरहिए णिम्मलि अंबरि भाणु जि फुरंतु ।।११९।।** हे योगी ! निर्मल अपने मन मे निज परमात्मा रागादि रहित, नियम से उसी प्रकार दिखाई देता है जिस प्रकार बादलो से रहित निर्मल स्वच्छ आकाश मे सूर्य प्रकाशमान दिखाई देता है । जैसे बादलो के घटाटोप के विघटित होने पर निर्मल आकाश मे दिनकर प्रकाशित होता है वैसे ही शुद्धात्मा की अनुभूति के विपरीत काम-क्रोधादि विकल्प रूप मेघो के नष्ट हो जाने पर निर्मल चित्त रूपी आकाश मे केवलज्ञानादि अनन्त गुण रूपी किरणो से सुशोभित निज शुद्धात्मा रूपी सूर्य प्रकाशित होता है ।।११९।।

अथ यथा मलिने दर्पणे रूप न दृश्यते तथा रागादिमलिनचित्ते शुद्धात्मस्वरूप न दृश्यत इति निरूपयति—

अब कहते है कि जैसे मलिन दर्पण मे प्रतिबिम्ब नही दिखाई देता, उसी प्रकार रागादि से मलिन चित्त मे शुद्धात्मस्वरूप नही दिखाई देता—

**राएँ रंगिए हियवडए देउ ण दीसइ संतु ।**
**दप्पणि मइलए बिंबु जिम एहउ जाणि णिभंतु ।।१२०।।**

रागेन रञ्जिते हृदये देव: न दृश्यते शान्त: ।
दर्पणे मलिने बिम्ब यथा एतत् जानीहि निर्भ्रान्तम् ।।१२०।।

राएं इत्यादि । **राएं रंगिए हियवडए** रागेन रञ्जिते हृदये **देउ ण दीसइ** देवो न दृश्यते । किंविशिष्ट: **संतु** शान्तो रागादिरहित: । दृष्टान्तमाह । **दप्पणि मइलए** दर्पणे मलिने **बिंबु जिम** बिम्ब यथा **एहउ** एतत् जानीहि **हे प्रभाकरभट्ट णिभंतु** निर्भ्रान्तं यथा भवतीति । अयमत्राभिप्राय. । यथा मेघपटलप्रच्छादितो विद्यमानोऽपि सहस्रकरो न दृश्यते तथा केवलज्ञानकिरणैर्लोकालोकप्रकाशकोऽपि कामक्रोधादिविकल्पमेघप्रच्छादित: सन् देहमध्ये शक्तिरूपेण विद्यमानोऽपि निजशुद्धात्मा दिनकरो न दृश्यते इति ।।१२०।।

**राएँ रंगिए हियवडए संतु देउ ण दीसइ जिम मइलए दप्पणि बिंबु, एहउ णिभंतु जाणि ।।१२०।।** राग से रंजित हृदय मे शान्त-रागादिरहित देव नही दिखाई देता, जैसे कि मैले दर्पण मे प्रतिबिम्ब दिखाई नही देता । हे प्रभाकरभट्ट ! यह बात तू सन्देहरहित जान । **अभिप्राय** यह है कि जैसे मेघसमूह मे आच्छादित होने के कारण आकाश मे विद्यमान भी सूर्य नही दिखाई देता वैसे ही केवलज्ञान रूपी किरणो से लोकालोक का प्रकाशक होते हुए भी, देह मे शक्तिरूप से विद्यमान भी निज शुद्धात्म रूप सूर्य काम-क्रोधादि विकल्प मेघो से ढका होने पर दिखाई नही देता ।।१२०।।

अथानन्तर विषयासक्तानां परमात्मा न दृश्यत इति दर्शयति—

अब कहते है कि विषयासक्तों को परमात्मा दिखाई नही देता—

**जसु हरिणच्छी हियवडए तसु णवि बंभु वियारि ।**
**एक्कहिँ केम समंति वढ बे खंडा पडियारि ।।१२१।।**

यस्य हरिणाक्षी हृदये तस्य नैव ब्रह्म विचारय ।
एकस्मिन् कथं समायातौ वत्स द्वौ खड्गौ प्रत्याकारे (?) ।।१२१।।

जसु इत्यादि । **जसु** यस्य पुरुषस्य **हरिणच्छी** हरिणाक्षी स्त्री **हियवडए** हृदये वसतीति क्रियाध्याहार, **तसु** तस्य **णवि** नैवास्ति । कोऽसौ । **बंभु** ब्रह्मशब्दवाच्यो निज-परमात्मा **वियारि** एव विचारय त्वं **हे प्रभाकरभट्ट** । अत्रार्थे दृष्टान्तमाह । **एक्कहिं केम** एकस्मिन् कथं **समंति** सम्यग्मिमाते सम्यगवकाशं कथं लभेते **वढ वत बे खंडा** द्वौ खड्गौ असी । क्वाधिकरणभूते । **पडियारी** प्रतिकारे (?) कोशशब्दवाच्ये इति । तथाहि । वीतरागनिर्विकल्पपरमसमाधिसंजातानाकुलत्वलक्षणपरमानन्दसुखामृतप्रतिबन्धकैराकुल-त्वोत्पादकै: स्त्रीरूपावलोकनचिन्तादिसमुत्पन्नहावभावविभ्रमविलासविकल्पजालैर्मूर्च्छिते वासिते रञ्जिते परिणते चित्ते त्वेकस्मिन् प्रतिहारे (?) खड्गद्वयवत्परमब्रह्मशब्दवाच्य-

निजशुद्धात्मा कथमवकाशं लभते न कथमपीति भावार्थः । हावभावविभ्रमविलासलक्षण कथ्यते । **"हावो मुखविकारः स्याद्भावश्चित्तोत्थ उच्यते । विलासो नेत्रजो ज्ञेयो विभ्रमो भ्रूयुगान्तयोः ।"** ।।१२१।।

**जसु हियडइ हरिणच्छी तसु बंभु णवि, वढ वियारि ; एक्कहिँ पडियारि केम बे खंडा समंति ।।१२१।।** जिसके हृदय में मृगनयनी (स्त्री) बस रही है, उसके अपना शुद्धात्मा नहीं है **अर्थात्** उसे शुद्धात्मा का दर्शन नहीं होता, हे वत्स प्रभाकरभट्ट ! तू विचार कर कि एक म्यान मे दो तलवारे कैसे समा सकती है ? **भावार्थ**–वीतराग निर्विकल्प परम समाधि मे उत्पन्न अनाकुलता रूप परम आनन्द अतीन्द्रिय सुखरूप अमृत है, उसको रोकने वाले तथा आकुलता पैदा करने वाले जो स्त्री रूप के देखने की अभिलाषादि से उत्पन्न हुए हाव-भाव-विभ्रम-विलासरूप विकल्प समूह है उन-से मूर्छित, रजित, परिणत चित्त मे ब्रह्म (निज शुद्धात्मा) का रहना कैसे हो सकता है, जैसे कि एक म्यान में दो तलवारे कैसे रह सकती है । कदापि नही रह सकती । हाव-भाव-विभ्रम-विलास का लक्षण कहते है—"हाव मुख के विकार हैं, भाव चित्त के विकार है और विलास-विभ्रम नेत्रो और भौहो मे उत्पन्न विकार जानने चाहिए ।" ।।१२१।।

अथ रागादिरहिते निजमनसि परमात्मा निवसतीति दर्शयति—

अब कहते हैं कि रागादि रहित निज मन मे परमात्मा निवास करता है -

**णिय-मणि णिम्मलि णाणियहँ णिवसइ देउ अणाइ ।**
**हंसा सरवरि लीणु जिम महु एहउ पडिहाइ ।।१२२।।**

निजमनसि निर्मले ज्ञानिना निवसति देव अनादि ।
हंस सरोवरे लीन यथा मम ईदृश प्रतिभाति ।।१२२।।

णियमणि इत्यादि । **णियमणि** निजमनसि । किंविशिष्टे । **णिम्मलि** निर्मले रागादिमलरहिते । केषां मनसि । **णाणियहं** ज्ञानिना **णिवसइ** निवसति । कोऽसौ । **देउ** देव आराध्य किंविशिष्ट । **अणाइ** अनादि । क इव कुत्र । **हंसा सरवरि लीणु जिम** हस सरोवरे लीनो यथा **हे प्रभाकरभट्ट** महु एहउ **पडिहाइ** ममैव प्रतिभातीति । तथाहि । पूर्वसूत्रकथितेन चित्ताकुलोत्पादकेन स्त्रीरूपावलोकनसेवनचिन्तादिसमुत्पन्नेन रागादिकल्लोलमालाजालेन रहिते निजशुद्धात्मद्रव्यसम्यक्श्रद्धानसहजसमुत्पन्नवीतराग-परमसुखसुधारसस्वरूपेण निर्मलनीरेण पूर्णे वीतरागस्वसवेदनजनितमानससरोवरे परमा-त्मा लीनस्तिष्ठति । कथभूतः । निर्मलगुणसादृश्येन हस इव हसपक्षी इव । कुत्र प्रसिद्ध । सरोवरे । हंस इवेत्यभिप्रायो भगवता श्रीयोगीन्द्रदेवानाम् ।।१२२।।

**णाणियहँ णिम्मलि णियमणि अणाइ देउ णिवसइ । जिम सरवरि लीणु हंसा, महु एहउ पडिहाइ ।।१२२।।** ज्ञानियो के रागादि मल रहित निज मन मे अनादि देव-आराध्य शुद्धात्मा निवास

कर रहा है। जैसे सरोवर में लीन हुआ हंस रहता है। ऐसा मुझे मालूम पड़ता है। **भावार्थ**-पूर्व दोहे में कथित, चित्त की आकुलता को उपजाने वाले स्त्रीरूप के दर्शन सेवन चिन्तन आदि से समुत्पन्न रागादि तरंगों के समूह से रहित, निजशुद्धात्मद्रव्य का सम्यक् श्रद्धान, स्वाभाविक ज्ञान, उससे उत्पन्न वीतरागपरमसुख रूप अमृत रस रूपी निर्मल नीर से परिपूर्ण ज्ञानियो के वीतराग स्वानुभव जनित मानसरोवर मे परमात्मा रूपी हंस निरन्तर रहता है। निर्मल गुणो की समानता के कारण वह आत्मदेव हंस के समान है। हंस मानसरोवर में रहते हैं वैसे ही ब्रह्म का निवास-स्थान ज्ञानियो का निर्मल चित्त है ।।१२२।।

उक्तं च--

**देउ ण देउले णवि सिलए णवि लिप्पइ णवि चित्ति ।**
**अखउ णिरंजणु णाणमउ सिउ संठिउ सम-चित्ति ।।१२३।।**

देव न देवकुले नैव शिलायां नैव लेप्ये नैव चित्रे ।
अक्षयः निरञ्जन ज्ञानमय शिव संस्थित समचित्ते ।।१२३।।

देउ इत्यादि । **देउ देवः** परमाराध्यः **ण** नास्ति कस्मिन् कस्मिन् नास्ति । **देउले** देवकुले देवतागृहे **णवि सिलए** नैव शिलाप्रतिमायां, **णवि लिप्पइ** नैव लेपप्रतिमायां, **णवि चित्ति** नैव चित्रप्रतिमायाम् । तर्हि क्व तिष्ठति । निश्चयेन **अखउ** अक्षयः **णिरंजणु** कर्माञ्जनरहित । पुनरपि किंविशिष्ट । **णाणमउ** ज्ञानमय केवलज्ञानेन निर्वृत्तः **सिउ** शिवशब्द वाच्यो निजपरमात्मा । एवंगुणविशिष्टः परमात्मा देव इति । **संठिउ** संस्थित **समचित्ति** समभावे समभावपरिणतमनसि इति । तद्यथा । यद्यपि व्यवहारेण धर्मवर्तनानिमित्त स्थापनारूपेण पूर्वोक्तगुणलक्षणो देवो देवगृहादौ तिष्ठति तथापि निश्चयेन शत्रुमित्रसुखदुःखजीवितमरणादिसमतारूपं वीतरागसहजानन्दैकरूपपरमात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभूतिरूपाभेदरत्नत्रयात्मकसमचित्ते समशब्दवाच्य परमात्मा तिष्ठतीति भावार्थ ।। तथा चोक्तं समचित्तपरिणतश्रमणलक्षणम्—"**समसत्तुबंधुवग्गो समसुहदुक्खो पसंसणिंदसमो । समलोहकंचणो वि य जीवियमरणे समो समणो ।।**" ।।१२३।। इत्येकत्रिंशत्सूत्रैश्चूलिकास्थलं गतम् ।

**देउ देउले ण, सिलए णवि, लिप्पइ णवि, चित्ति णवि, अखउ, णिरंजणु, णाणमउ सिउ समचित्ति संठिउ ।।१२३।।** आत्मदेव देवालय (मन्दिर) मे नही है, पाषाण की प्रतिमा में भी नही है, लेप में भी नही है और चित्र मे भी नही है। वह देव अविनाशी है, निरंजन है, ज्ञानमय है, ऐसा निज परमात्मा समभाव मे तिष्ठता है अर्थात् समभाव को परिणत हुए जीवो में विराज रहा है, अन्यत्र नही। **भावार्थ**-यद्यपि व्यवहारनय से धर्मप्रवृत्ति के लिए पूर्वोक्तगुणलक्षण देव स्थापना रूप से देवालय में विराजते हैं तथापि निश्चय नय से शत्रु-मित्र, सुख-दुःख, जीवित-मरणादि जिसमें समान है तथा वीतराग सहजानन्दरूप परमात्म तत्त्व की सम्यक् श्रद्धान ज्ञान चारित्ररूप लीनता

जिसमें है—ऐसे ज्ञानी के समचित्त मे परमात्मा तिष्ठता है। अन्यत्र भी समचित्त को परिणत हुए श्रमण का लक्षण ऐसा कहा है —[1]"जिसे शत्रु और बन्धु वर्ग समान है, सुख दुःख समान है, प्रशंसा और निन्दा समान है, मिट्टी और सोना समान है, तथा जीवन और मरण भी समान है, वह श्रमण है।" ॥१२३॥ इस प्रकार इकतीस दोहों का चूलिकास्थल कहा।

**अथ** स्थलसंख्याबाह्यं प्रक्षेपकद्वयं कथ्यते—

**अब**, स्थलसख्या से अलग दो प्रक्षेपक दोहे कहते है—

**मणु मिलियउ परमेसरहँ परमेसरु वि मणस्स।**
**बीहि वि समरसि हूवाहँ पुज्ज चडावउँ कस्स॥१२३*२॥**

मन मिलितं परमेश्वरस्य परमेश्वर अपि मनस।
द्वयोरपि समरसीभूतयो पूजा समारोपयामि कस्य॥१२३*२॥

मणु इत्यादि। **मणु** मनो विकल्परूप **मिलियउ** मिलित तन्मय जातम्। कस्य संबन्धित्वेन। **परमेसरहं** परमेश्वरस्य **परमेसरु वि मणस्स** परमेश्वरोऽपि मन सबन्धित्वेन लीनो जातः **बीहि वि समरसिहूवाहं** एव द्वयोरपि समरसीभूतयो **पुज्ज** पूजां **चडावउं** समारोपयामि। **कस्स** कस्य निश्चयनयेन न कस्यापीति। अयमत्र भावार्थ। यद्यपि व्यवहारनयेन गृहस्थावस्थाया विषयकषायदुर्ध्यानवञ्चनार्थं धर्मवर्धनार्थं च पूजाभिषेकदानादिव्यवहारोऽस्ति तथापि वीतरागनिर्विकल्पसमाधिरताना तत्काले बहिरङ्गव्यापाराभावात् स्वयमेव नास्तीति॥१२३*२॥

**मणु परमेसरहँ मिलियउ, परमेसरु वि मणस्स। बीहि वि समरसि हूवाहँ कस्स पुज्ज चडावउँ॥१२३*२॥** विकल्परूप मन परमेश्वर से मिल गया और परमेश्वर भी मन मे मिल गया तो दोनों ही को समरस (परस्पर एकमेक) हो जाने पर मैं अब किसकी पूजा करूँ यानी निश्चयनय से किसी को पूजना नहीं रहा। **भावार्थ** यद्यपि व्यवहारनय से गृहस्थावस्था मे विषय-कषाय रूप दुर्ध्यान को हटाने के लिए और धर्म को बढ़ाने के लिए पूजा-अभिषेक दानादि का व्यवहार है तो भी वीतरागनिर्विकल्पसमाधि में रत योगीश्वरों को उस समय मे बाह्य व्यापार का अभाव होने से स्वय ही द्रव्यपूजा का प्रसग उपस्थित नहीं होता॥१२३*२॥

**जेण णिरंजणि मणु धरिउ विसय-कसायहिँ जंतु।**
**मोक्खहँ कारणु एत्तडउ अण्णु ण तंतु ण मंतु॥१२३*३॥**

येन निरञ्जने मनः धृत विषयकषायेषु गच्छत्।
मोक्षस्य कारणं एतावदेव अन्य न तन्त्र न मन्त्र॥१२३*३॥

---

१. कुन्दकुन्द प्रवचनसार गाथा २४१।

**जेरा** इत्यादि । येन येन पुरुषेण कर्तृभूतेन **रिगरंजरिग** कर्माञ्जनरहिते परमात्मनि **मणु** मनः **धरिउ** धृतम् । किं कुर्वत् सत् । **विसयकसायहि जंतु** विषयकषायेषु गच्छत् सत् । विसयकसायहि तृतीयान्तं पदं सप्तम्यन्तं कथं जातमिति चेत् । परिहारमाह । प्राकृते क्वचित्कारक-व्यभिचारो भवति लिङ्गव्यभिचारश्च । इदं सर्वत्र ज्ञातव्यम् । **मोक्खहं कारणु** मोक्षस्य कारणं **एत्तडउ** एतावदेव । विषयकषायरतचित्तस्य व्यावर्तनेन स्वात्मनि स्थापनं **अण्णु ण** अन्यत् किमपि न मोक्षकारणम् । अन्यत् किम् । **तन्तु** तन्त्रं शास्त्रमौषधं वा **मंतु** मन्त्राक्षरं चेति । तथाहि । शुद्धात्मतत्त्वभावनाप्रतिकूलेषु विषयकषायेषु गच्छत् सत् मनो वीतरागनिर्विकल्पस्वसंवेदनज्ञानबलेन व्यावर्त्य निज-शुद्धात्मद्रव्ये स्थापयति यः स एव मोक्षं लभते नान्यो मन्त्रतन्त्रादिबलिष्ठोऽपीति भावार्थः ॥१२३*३॥

**जेरा विसयकसायहिँ जंतु मणु रिगरंजरिग धरिउ, एत्तडउ मोक्खहँ कारणु अण्णु तंतु ण मंतु ण** ॥१२३*३॥ जिसने विषयकषायों में जाते हुए मन को कर्मांजन से रहित भगवान में रखा, ये ही मोक्ष के कारण हैं, दूसरा कोई भी तंत्र नहीं है और न मंत्र है । विषयकषायादि परपदार्थों से मन को रोक कर परमात्मा में मन को लगाना ही मोक्ष का कारण है । **भावार्थ**—जो कोई जीव शुद्धात्मतत्त्व की भावना से प्रतिकूल विषय-कषायों में जाते हुए मन को वीतरागनिर्विकल्प स्वसंवेदन-ज्ञान के बल से पीछे हटा कर निज शुद्धात्मद्रव्य में स्थापित करता है, वही मोक्ष प्राप्त करता है, दूसरा कोई मंत्र-तंत्रादि में बलिष्ठ होने पर भी मोक्ष नहीं पाता ॥१२३*३॥

एवं **परमात्मप्रकाशवृत्तौ** प्रक्षेपकत्रयं विहाय त्र्यधिकविंशत्युत्तरशतदोहकसूत्रैस्त्रिविधात्मप्रति-पादकनामा **प्रथममहाधिकारः** समाप्तः ॥ १ ॥

इस प्रकार परमात्मप्रकाश की टीका में तीन प्रक्षिप्त दोहों को छोड़कर एक सौ तेईस दोहा-सूत्रों में बहिरात्मा-अन्तरात्मा और परमात्मारूप त्रिविध आत्मा का प्रतिपादक प्रथम महाधिकार पूर्ण हुआ ॥१॥

॥ इति प्रथम महाधिकार ॥

# द्वितीय-महाधिकारः

अत ऊर्ध्वं स्थलसंख्याबहिर्भूतान् प्रक्षेपकान् विहाय चतुर्दशाधिकशतद्वयप्रमितैर्दोहकसूत्रैर्मोक्षमोक्षफलमोक्षमार्गप्रतिपादनमुख्यत्वेन द्वितीयमहाधिकार. प्रारभ्यते । तत्रादौ सूत्रदशकपर्यन्तं मोक्षमुख्यतया व्याख्यान करोति । तद्यथा—

अब आगे प्रकरणसख्या से बाह्य प्रक्षेपक दोहो के अतिरिक्त दो सौ चौदह दोहा सूत्रो मे मोक्ष, मोक्षफल और मोक्षमार्ग के प्रतिपादन की मुख्यता से दूसरा महाधिकार प्रारम्भ करते है। पहले दस दोहो तक मोक्ष की मुख्यता से व्याख्यान करते है

**सिरिगुरु अक्खहि मोक्खु महु मोक्खहँ कारणु तत्थु ।**
**मोक्खहँ केरउ अण्णु फलु जेँ जाणउँ परमत्थु ।।१।।**

श्रीगुरो आख्याहि मोक्ष मम मोक्षस्य कारण तथ्यम् ।
मोक्षस्य सबन्धि अन्यत् फल येन जानामि परमार्थम् ।।१।।

सिरिगुरु इत्यादि । **सिरिगुरु** हे श्रीगुरो **योगीन्दुदेव अक्खहि** कथय **मोक्खु** मोक्ष **महु** मम, न केवल मोक्ष **मोक्खहं कारणु** मोक्षस्य कारणम् । कथभूतम् । **तत्थु** तथ्यम् **मोक्खहं केरउ** मोक्षस्य सबन्धि **अण्णु** अन्यत् । किम् । **फलु** फलम् । एतत्त्रयेन ज्ञातेन किं भवति । **जें जाणउं** येन त्रयस्य व्याख्यानेन जानाम्यह कर्ता । कम् । **परमत्थु** परमार्थमिति । तद्यथा । **प्रभाकरभट्टः श्रीयोगीन्दुदेवान्** विज्ञाप्य मोक्ष मोक्षफल मोक्षकारणमिति त्रय पृच्छतीति भावार्थ ।।१।।

**सिरिगुरु महु मोक्खु तत्थु मोक्खहँ कारणु अण्णु मोक्खहँ केरउ फलु अक्खहि जेँ परमत्थु जाणउँ** ।।१।। हे श्रीगुरो ! मुझे मोक्ष, सत्यार्थ मोक्ष का कारण और मोक्ष का फल कहो जिसमे मैं परमार्थ को जान सकूँ । **भावार्थ**-प्रभाकरभट्ट श्री योगीन्दुदेव से मोक्ष, मोक्ष का कारण और मोक्ष का फल इन तीनो के सम्बन्ध मे पूछते है ।।१।।

अथ तदेव त्रय क्रमेण भगवान् कथयति—

अब उन तीनो को क्रम से भगवान् कहते है —

**जोइय मोक्खु वि मोक्ख-फलु पुच्छिउ मोक्खहँ हेउ ।**
**सो जिण-भासिउ णिसुणि तुहुँ जेण वियाणहि भेउ ।।२।।**

योगिन् मोक्षोऽपि मोक्षफल पृष्ट मोक्षस्य हेतु ।
तत् जिनभाषित निशृणु त्व येन विजानासि भेदम् ।।२।।

जोइय इत्यादि । **जोइय** हे योगिन् **मोक्खु वि** मोक्षोऽपि **मोक्खफलु** मोक्षफलं **पुच्छिउ** पृष्टं त्वया कर्तृभूतेन । पुनरपि कः पृष्टः । **मोक्खहं हेउ** मोक्षस्य हेतुः कारणम् । तत्त्रयं **जिणभासिउ** जिनभाषितं **णिसुणि** निश्चयेन शृणु समाकर्णय **जेण वियाणहि भेउ** विजानासि भेदं त्रयाणां सम्बन्धिनमिति । अयमत्र तात्पर्यार्थः । **श्रीयोगीन्दुदेवाः** कथयन्ति **हे प्रभाकरभट्ट** शुद्धात्मोपलम्भलक्षणं मोक्ष केवलज्ञानाद्यनन्तचतुष्टयव्यक्तिरूपं मोक्षफल भेदाभेदरत्नत्रयात्मकं मोक्षमार्ग च क्रमेण प्रतिपादयाम्यहं त्वं शृण्विति ॥२॥

**जोइय मोक्खु वि मोक्खफलु मोक्खहं हेउ पुच्छिउ सो जिणभासिउ तुहुँ णिसुणि जेण भेउ वियाणहि ॥२॥** हे योगी ! तूने मोक्ष और मोक्ष का फल तथा मोक्ष का कारण पूछा है । उसे जैसा जिनेन्द्र भगवान् ने कहा है, वैसा सुन जिससे तू अच्छी तरह भेद जान सके । श्री योगीन्दुदेव अपने शिष्य से कहते हैं कि हे प्रभाकरभट्ट ! शुद्धात्मा की उपलब्धि रूप मोक्ष, केवलज्ञानादि अनन्तचतुष्टय के प्रकटपने रूप मोक्षफल, तथा भेदाभेद (निश्चय व्यवहार) रत्नत्रयरूप मोक्ष का मार्ग—इन तीनों के सम्बन्ध में मैं जिनाज्ञा प्रमाण कहता हूँ—सो तू सुन, उससे तुझे सब भेद ज्ञात हो जायेगा ॥२॥

अथ धर्मार्थकाममोक्षाणां मध्ये सुखकारणत्वान्मोक्ष एवोत्तम इति अभिप्रायं मनसि संप्रधार्य सूत्रमिद प्रतिपादयति—

अब धर्म, अर्थ, काम और मोक्ष इनमें से सुख का कारण होने से मोक्ष ही सबसे उत्तम है, ऐसा अभिप्राय मन में धारण कर यह दोहा कहते हैं—

**धम्महं अत्थहं कामहं वि एयहं सयलहं मोक्खु ।**
**उत्तमु पभणहिं णाणि जिय अण्णें जेण ण सोक्खु ॥३॥**

धर्मस्य अर्थस्य कामस्यापि एतेषा सकलाना मोक्षम् ।
उत्तम प्रभणन्ति ज्ञानिन जीव अन्येन येन न सौख्यम् ॥३॥

धम्महं इत्यादि । **धम्महं** धर्मस्य धर्माद्वा **अत्थहं** अर्थस्य अर्थाद्वा **कामहं वि** कामस्यापि कामाद्वा **एयहं सयलहं** एतेषां सकलानां सबन्धित्वेन एतेभ्यो वा सकाशात् **मोक्खु** मोक्ष **उत्तमु पभणहिं** उत्तम विशिष्टं प्रभणन्ति । के कथयन्ति । **णाणि** ज्ञानिनः । **जिय** हे जीव । कस्मादुत्तम प्रभणन्ति मोक्षम् । **अण्णइं** अन्येन धर्मार्थकामादिना **जेण** येन कारणेन **ण सोक्खु** नास्ति परमसुखम् इति । तद्यथा—धर्मशब्देनात्र पुण्य कथ्यते अर्थशब्देन तु पुण्यफलभूतार्थो राज्यादिविभूतिविशेषः, कामशब्देन तु तस्यैव राज्यस्य मुख्यफलभूत. स्त्रीवस्त्रगन्ध-माल्यादिसंभोगः । एतेभ्यस्त्रिभ्यः सकाशान्मोक्षमुत्तम

कथयन्ति । के ते । वीतरागनिर्विकल्पस्वसंवेदनज्ञानिनः । कस्मात् । आकुलत्वोत्पादकेन वीतरागपरमानन्दसुखामृतरसास्वादविपरीतेन धर्मार्थकामादिना मोक्षादन्येन येन कारणेन सुखं नास्तीति भावार्थः ।।३।।

**जिय ! धम्मह अत्थहँ कामहँ वि एयहँ सयलहँ मोक्खु उत्तमु णाणि पभरणहिँ जेण अण्णेँ सोक्खु ण ।।३।।** हे जीव ! धर्म, अर्थ, काम और मोक्ष इन सब पुरुषार्थों में ज्ञानी पुरुष मोक्ष को उत्तम कहते हैं क्योंकि अन्य धर्म अर्थ कामादि में परम सुख नहीं है । **विशेषार्थ**—धर्म शब्द से यहाँ पुण्य का कथन है, अर्थ शब्द से पुण्य का फल राज्यादिविभूति विशेष जानना और काम शब्द से उस राज्य का मुख्य फल स्त्री, वस्त्र, गन्धमाल्यादि वस्तु रूप भोग जानना । इन तीनों में परमसुख नहीं है । इसीलिए वीतरागनिर्विकल्पस्वसंवेदनज्ञानी मोक्ष को इनमें उत्तम कहते हैं । क्योंकि मोक्ष से भिन्न धर्म-अर्थ-काम आकुलता के उत्पादक हैं और वीतराग परमानन्द सुखामृत के रसास्वाद से विपरीत हैं, इसलिए सुख के करने वाले नहीं हैं, ऐसा जानना ।।३।।

अथ धर्मार्थकामेभ्यो यद्युत्तमो न भवति मोक्षस्तर्हि तत्त्रयं मुक्त्वा परलोकशब्द-वाच्यं मोक्षं किमिति जिना गच्छन्तीति प्रकटयन्ति——

आगे, यदि मोक्ष धर्म, अर्थ और काम इन तीनों से उत्तम नहीं होता तो इन तीनों को छोड़कर जिनेश्वरदेव मोक्ष क्यों जाते ? यह कहते हैं

**जइ जिय उत्तमु होइ णवि एयहँ सयलहँ सोइ ।**
**तो किं तिण्णि वि परिहरवि जिण वच्चहिँ पर-लोइ ।।४।।**

यदि जीव उत्तमो भवति नैव एतेभ्यः सकलेभ्यः स एव ।
ततः किं त्रीण्यपि परिहृत्य जिना व्रजन्ति परलोके ।।४।।

जइ इत्यादि । **जइ** यदि चेत् **जिय** हे जीव **उत्तमु होइ णवि** उत्तमो भवति नैव । केभ्यः । **एयहं सयलहं** एतेभ्यः पूर्वोक्तेभ्यो धर्मादिभ्यः । कतिसंख्योपेतेभ्यः । सकलेभ्यः **सो वि** स एव पूर्वोक्तो मोक्षः **तो** ततः कारणात् **किं** किमर्थं **तिण्णि वि परिहरवि** त्रीण्यपि परिहृत्य त्यक्त्वा **जिण** जिनाः कर्तारः **वच्चहिं** व्रजन्ति गच्छन्ति । कुत्र गच्छन्ति । **परलोइ** परलोकशब्दवाच्ये परमात्मध्याने न तु कायमोक्षे चेति । तथाहि—परलोकशब्दस्य व्युत्पत्त्यर्थः कथ्यते । परः उत्कृष्टो मिथ्यात्वरागादिरहितः केवलज्ञाना-द्यनन्तगुणसहितः परमात्मा परशब्देनोच्यते तस्यैवगुणविशिष्टस्य परमात्मनो लोको लोकनमवलोकनं वीतरागपरमानन्दसमरसीभावानुभवनं लोक इति परलोकशब्दस्यार्थः । अथवा पूर्वोक्तलक्षणः परमात्मा परशब्देनोच्यते । निश्चयेन परमशिवशब्दवाच्यो मुक्तात्मा शिव इत्युच्यते तस्य लोकः शिवलोक इति । अथवा परमब्रह्मशब्दवाच्यो मुक्तात्मा परमब्रह्म इति तस्य लोको ब्रह्मलोक इति । अथवा परम विष्णुशब्दवाच्यो

मुक्तात्मा विष्णुरिति तस्य लोको विष्णुलोक इति परलोकशब्देन मोक्षो भण्यते परश्चासौ लोकश्च परलोक इति । परलोकशब्दस्य व्युत्पत्त्यर्थो ज्ञातव्यः न चान्यः कोऽपि परकल्पितः शिवलोकादिरस्तीति । अत्र स एव परलोकशब्दवाच्यः परमात्मोपादेय इति तात्पर्यम् ।।४।।

**जिय जइ एयहँ सयलहँ सोइ उत्तमु णवि होइ तो जिण तिण्णि वि परिहरवि परलोइ किं वच्चहिँ ।।४।।** हे जीव ! जो इन सबसे—धर्म अर्थ काम से—मोक्ष उत्तम ही नही होता तो श्री जिनवरदेव इन तीनो को छोडकर मोक्ष क्यों जाते ? **भावार्थ**–पर अर्थात् उत्कृष्ट मिथ्यात्व रागादि रहित, केवलज्ञानादि अनन्त गुण महित परमात्मा वह पर है, उस परमात्मा का लोक अर्थात् अवलोकन वीतराग परमानन्द समरसीभाव का अनुभव वह परलोक कहा जाता है । अथवा परमात्मा को परमशिव कहते है, उसका जो अवलोकन वह शिवलोक है, अथवा परमात्मा का ही नाम परमब्रह्म है, उसका लोक है, वह ब्रह्मलोक है । अथवा उसी का नाम परमविष्णु है, उसका लोक अर्थात् स्थान वह विष्णुलोक है, ये सब मोक्ष के नाम हैं यानी जितने परमात्मा के नाम हैं उनके आगे 'लोक' लगाने से मोक्ष के नाम हो जाते है, दूसरा कोई कल्पित शिवलोक, ब्रह्मलोक या विष्णुलोक नही है । साराश यह है कि परलोकशब्द से वाच्य परमात्मा ही उपादेय है, अन्य कोई नही ।।४।।

अथ तमेव मोक्ष सुखदायकं दृष्टान्तद्वारेण द्रढयति—

अब, वह मोक्ष सुखदायक है, इस बात को दृष्टान्त से पुष्ट करते हैं—

**उत्तमु सुक्खु ण देइ जइ उत्तमु मुक्खु ण होइ ।**
**तो किं इच्छहिँ बंधणहिँ बद्धा पसुय वि सोइ ।।५।।**

उत्तम सुख न ददाति यदि उत्तमो मोक्षो न भवति ।
ततः किं इच्छन्ति बन्धनै बद्धा पशवोऽपि तमेव ।।५।।

उत्तमु इत्यादि । **उत्तमु** उत्तम **सुक्खु** सुख **ण देइ जइ** न ददाति यदि चेत् **उत्तमु मुक्खु ण होइ** उत्तमो मोक्षो न भवति **तो** तस्मात्कारणात् **किं** किमर्थ **इच्छहिँ** इच्छन्ति **बंधणहिँ** बन्धनैः **बद्धा** निबद्धा । **पसुय वि** पशवोऽपि । किमिच्छन्ति । **सोइ** तमेव मोक्षमिति । अयमत्र भावार्थः । सुखकारणत्वाद्धेतोः बन्धनबद्धा पशवोऽपि मोक्षमिच्छन्ति तेन कारणेन केवलज्ञानाद्यनन्तगुणाविनाभूतस्योपादेयरूपस्यानन्तसुखस्य कारणत्वादिति ज्ञानिनो विशेषेण मोक्षमिच्छन्ति ।।५।।

**जइ मुक्खु उत्तमु सुक्खु ण देइ, उत्तमु ण होइ । तो बंधणहिँ बद्धा पसुय वि सोइ किं इच्छहिँ ।।५।।** जो मोक्ष उत्तम सुख को देने वाला न होवे तो उत्तम नही होवे और यदि मोक्ष उत्तम ही न हो तो फिर बन्धनों में बद्ध पशु भी उस मोक्ष की ही इच्छा क्यों करे ? सुख का कारण होने से बन्धन में बँधे पशु भी छूटना (मोक्ष-मुक्ति) चाहते है अतः केवलज्ञानादि अनन्तगुणों से तन्मयी

उपादेयरूप अनन्त सुख का कारण होने से ज्ञानी पुरुष विशेषरूप से मोक्ष की ही इच्छा करते है, यह **भावार्थ** है ।।५।।

**अथ यदि तस्य मोक्षस्याधिकगुणगणो न भवति तर्हि लोको निजमस्तकस्योपरि तं किमर्थं धरतीति निरूपयति—**

**अब** कहते है कि यदि मोक्ष मे अधिक गुणो का समूह नही होता तो मोक्ष को लोक अपने मस्तक पर क्यो धारण करता ?

**अणु जइ जगहँ वि अहिययरु गुण-गणु तासु ण होइ ।**
**तो तइलोउ वि किं धरइ णिय-सिर-उप्परि सोइ ।।६।।**

अन्यद् यदि जगतोऽपि अधिकतर गुणगण तस्य न भवति ।
तत त्रिलोकोऽपि कि धरति निजशिर उपरि तमेव ।।६।।

अणु इत्यादि । **अणु** पुन. **जइ** यदि चेत् **जगहँ वि** जगतोऽपि सकाशात् **अहिययरु** अतिशयेनाधिक अधिकतर । कोऽसौ । **गुणगणु** गुणगण **तासु** तस्य मोक्षस्य **ण होइ** न भवति । **तो** तत. कारणात् **तइलोउ वि** त्रिलोकोऽपि कर्ता । **किं धरइ** किमर्थं धरति । कस्मिन् । **णियसिरउप्परि** निजशिरसि उपरि । **किं धरइ** कि धरति । **सोइ** तमेव मोक्षमिति । तद्यथा । यदि तस्य मोक्षस्य पूर्वोक्त सम्यक्त्वादिगुणगणो न भवति तर्हि लोक कर्ता निजमस्तकस्योपरि तत्कि धरतीति । अत्रानेन गुणगणस्थापनेन कि कृतं भवति, बुद्धिसुखदु खेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराभिधानाना नवाना गुणानामभाव मोक्ष मन्यन्ते ये वृद्ध**वैशेषिका**स्ते निषिद्धा । ये च प्रदीपनिर्वाणवज्जीवाभाव मोक्ष मन्यन्ते **सौगता**स्ते च निरस्ता । यच्चोक्त **सांख्यैः** सुप्तावस्थावत् सुखज्ञानरहितो मोक्षस्तदपि निरस्तम् । लोकाग्रेतिष्ठतीति वचनेन तु **मण्डिक**सज्ञा **नैयायिक**मतान्तर्गता यत्रैव मुक्तस्तत्रैव तिष्ठतीति वदन्ति तेऽपि निरस्ता इति । जैनमते पुनरिन्द्रियजनितज्ञानसुखस्याभावे न चानीन्द्रियज्ञानसुखस्येति कर्मजनितेन्द्रियादिदशप्राणसहितस्याशुद्धजीवस्याभावेन न पुन. शुद्धजीवस्येति भावार्थ ।।६।।

**अणु जइ जगहँ वि अहिययरु गुणगणु तासु ण होइ तो तइलोउ वि णिय सिर उप्परि सोइ किं धरइ ?** ।।६।। यदि मोक्ष मे सबलोक से अधिक गुणो का समूह नही होता तो तीनो लोक भी उसे अपने मस्तक के ऊपर क्यो धारण करते ? **विशेषार्थ**–मोक्ष लोक के शिखर पर विराजित है क्योकि उसमे बहुत गुण है । कोई किसी को अपने सिर पर धारण करता है तो अपने से अधिक गुणी जान कर ही धारण करता है । यदि मोक्ष मे क्षायिक सम्यक्त्व, केवलदर्शनादि अनन्त गुण न होते तो मोक्ष सब के सिर पर नही होता, मोक्ष से ऊपर अन्य कोई स्थान नही है । मोक्ष के आगे अनन्त अलोक है और वह भी सिद्धो के ज्ञान मे भासित है । यहाँ मोक्ष मे अनन्त गुणों की स्थापना

करने से मिथ्यादृष्टियों का खण्डन किया। कोई मिथ्यादृष्टि **वैशेषिकादि** ऐसा कहते है कि बुद्धि, सुख, दु.ख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म, संस्कार इन नौ गुणों के अभाव रूप मोक्ष है, उनका निषेध किया। क्योकि इन्द्रियजन्य बुद्धि का तो अभाव है परन्तु केवलज्ञान का अभाव नही है; इन्द्रियजनित सुखो का अभाव है किन्तु अतीन्द्रिय सुख की पूर्णता है, दु ख-इच्छा-द्वेष प्रयत्न इन विभावरूप गुणों का तो अभाव ही है, केवलरूप परिणमन है, व्यवहार धर्म का अभाव ही है और वस्तु का स्वभावरूप धर्म वही है, अधर्म का तो अभाव ठीक ही है और पर-द्रव्य रूप सस्कार सर्वथा नही है, स्वभाव संस्कार ही है। जो मूढ इन गुणों का अभाव मानते हैं, वे व्यर्थ कहते है, मोक्ष तो अनन्त गुणरूप है। इस तरह निर्गुणवादियो का निषेध किया। **बौद्धमती** जीव के अभाव को मोक्ष कहते है। वे ऐसा मानते है कि जैसे दीपक का बुझना, उसी तरह जीव का अभाव वही मोक्ष है। ऐसे बौद्ध मत को भी निरस्त किया क्योकि यदि जीव का ही अभाव हो गया तो फिर मोक्ष किसे हुआ ? जीव का शुद्ध होना मोक्ष है, अभाव कहना अनुचित है। **सांख्यमती** मानते है कि जो सुप्तावस्था है, वही मोक्ष है, जिस जगह न सुख है, न ज्ञान है, उनकी इस मान्यता का भी निरसन किया। मण्डिक सज्ञा वाले नैयायिक मत के अन्तर्गत यह माना जाता है कि जीव जहाँ मे मुक्त हुआ वही पर ठहरता है, ऊपर गमन नही करता, ऐसे नैयायिक के कथन का 'लोकशिखर पर तिष्ठना है' ऐसा कह कर निषेध किया। जैनमत मे तो इन्द्रियजनित ज्ञान (मति श्रुत अवधि मन पर्यय) और इन्द्रियजनित सुख (स्पर्श, रस, गन्ध, रूप, शब्द) का अभाव माना है न कि अतीन्द्रियज्ञान (केवलज्ञान) और अतीन्द्रिय सुख का। शुद्ध मुक्त जीव के कर्मजनित इन्द्रियादि दस प्राणो (पाँच इन्द्रियाँ, मन, वचन, काय, आयु, श्वासोच्छ्वास) का भी अभाव है, ज्ञानादि निज प्राणो का अभाव नही है। जीव की अशुद्धता का अभाव है, शुद्धपने का अभाव नही, यह निश्चय से जानना ॥६॥

अथोत्तम सुखं न ददाति यदि मोक्षस्तर्हि सिद्धाः कथ निरन्तरं सेवन्ते तमिति कथयति—

अब कहते है कि यदि मोक्ष उत्तम सुख नही प्रदान करे तो सिद्ध उसका निरन्तर सेवन क्यो करे ?

**उत्तमु सुक्खु ण देइ जइ उत्तमु मुक्खु ण होइ।**
**तो किं सयलु वि कालु जिय सिद्ध वि सेवहिँ सोइ ॥७॥**

उत्तम सुख न ददाति यदि उत्तम. मोक्षो न भवति।
तत किं सकलमपि काल जीव सिद्धा अपि सेवन्ते तमेव ॥७॥

उत्तमु इत्यादि। **उत्तमु सुक्खु** उत्तमं सुखं **ण देइ** न ददाति **जइ** यदि चेत्। **उत्तमु** उत्तमो **मुक्खु** मोक्ष. **ण होइ** न भवति। **तो** तत कारणात्, **किं** किमर्थं, **सयलु वि कालु** सकलमपि कालम्। **जिय** हे जीव। **सिद्ध वि** सिद्धा अपि **सेवहिं** सेवन्ते **सोइ** तमेव मोक्षमिति। तथाहि। यद्यतीन्द्रियपरमाह्लादरूपमविनश्वर सुखं न ददाति मोक्षस्तर्हि कथमुत्तमो भवति उत्तमत्वाभावे च केवलज्ञानादिगुणसहिताः सिद्धा भगवन्तः किमर्थं निरन्तरं सेवन्ते च चेत्। तस्मादेव ज्ञायते तत्सुखमुत्तम ददातीति। उक्तं च सिद्धसुखम्—

"आत्मोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालं, वृद्धिह्रासव्यपेतं विषयविरहितं निःप्रतिद्वन्द्वभावम् । अन्यद्रव्यानपेक्षं निरुपममितं शाश्वतं सर्वकालमुत्कृष्टानन्तसारं परमसुखमतस्तस्य सिद्धस्य जातम् ॥" अत्रेदमेव निरन्तरमभिलषणीयमिति भावार्थः ॥७॥

**जइ उत्तमु मुक्खु ण देइ, मुक्खु उत्तमु ण होइ । तो जिय सिद्ध वि सयलु वि कालु सोइ किं सेवहिँ ॥७॥** यदि मोक्ष उत्तम सुख नहीं देवे तो फिर वह उत्तम भी नहीं हो सकता । यदि मोक्ष में उत्तम सुख-परमानन्द नहीं होता तो हे जीव ! सिद्ध परमेष्ठी भी सदा काल उस मोक्ष का ही सेवन क्यों करते ? **भावार्थ**–मोक्ष अखण्ड अविनाशी शाश्वत सुख देता है । मोक्ष परम आह्लादरूप है, अविनश्वर है, मन और इन्द्रियों से रहित है, इसीलिए उसे सदा काल सिद्ध सेवते हैं, केवलज्ञानादि गुण सहित सिद्ध परमेष्ठी निरन्तर वहीं निवास करते हैं, इसी से ज्ञान होता है कि मोक्ष उत्तम सुख का दाता है । सिद्धों का सुख अन्यत्र भी इस प्रकार कहा है—"सिद्धों का सुख अपनी उपादान शक्ति से उत्पन्न हुआ है, पर की सहायता से नहीं, स्वयं ही अतिशय रूप है, सब बाधाओं से रहित है, विस्तीर्ण है, वृद्धि-ह्रास से रहित है, विषयविकार से रहित है, भेदभाव से रहित है, निर्द्वन्द्व है, अन्यद्रव्य की उसे अपेक्षा नहीं है, निरुपम है, अनन्त है, शाश्वत है, सर्वकाल उत्कृष्ट है और अनन्त श्रेष्ठता लिए हुए है, ऐसा परमसुख सिद्धों के है, अन्य किसी के नहीं ।" (पूज्यपाद-सिद्ध-भक्ति-७) अभिप्राय यह है कि मोक्षसुख ही सदा अभिलाषा करने योग्य है, अन्य सब हेय है ॥७॥

अथ सर्वेषां परमपुरुषाणां मोक्ष एव ध्येय इति प्रतिपादयति—

अब कहते हैं कि सभी महान् पुरुषों के मोक्ष ही ध्यातव्य है—

**हरि-हर-बंभु वि जिणवर वि मुणि-वर-विंद वि भव्व ।**
**परम-णिरंजणि मणु धरिवि मुक्खु जि झायहिँ सव्व ॥८॥**

हरिहरब्रह्माणोऽपि जिनवरा अपि मुनिवरवृन्दान्यपि भव्याः ।
परमनिरञ्जने मनः धृत्वा मोक्षं एव ध्यायन्ति सर्वे ॥८॥

हरिहर इत्यादि । **हरिहरबंभु वि** हरिहरब्रह्माणोऽपि **जिणवर वि** जिनवरा अपि **मुणिवरविंद वि** मुनिवरवृन्दान्यपि **भव्व** शेषभव्या अपि । एते सर्वे किं कुर्वन्ति । **परम-णिरंजणि** परमनिरञ्जनाभिधाने निजपरमात्मस्वरूपे । **मणु** मनः **धरिवि** विषयकषायेषु गच्छत् सद् व्यावृत्य धृत्वा पश्चात् **मुक्खु जि** मोक्षमेव **झायहिं** ध्यायन्ति **सव्व** सर्वेऽपि इति । तद्यथा । हरिहरादयः सर्वेऽपि प्रसिद्धपुरुषाः ख्यातिपूजालाभादिसमस्तविकल्पजालेन शून्ये, शुद्धबुद्धैकस्वभावनिजात्मद्रव्यसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकनिर्वि-कल्पसमाधिसमुत्पन्नवीतरागसहजानन्दैकसुखरसानुभवेन पूर्णकलशवत् भरितावस्थे निर-ञ्जनशब्दाभिधेयपरमात्मध्याने स्थित्वा मोक्षमेव ध्यायन्ति । अयमत्र भावार्थः । यद्यपि

व्यवहारेण सविकल्पावस्थायां वीतरागसर्वज्ञस्वरूपं तत्प्रतिबिम्बानि तन्मन्त्राक्षराणि तदाराधकपुरुषांश्च ध्येया भवन्ति तथापि वीतरागनिर्विकल्पत्रिगुप्तिगुप्तपरमसमाधिकाले निजशुद्धात्मैव ध्येय इति ।।८।।

**हरि-हर-बंभु वि, जिणवर वि, मुणिवर विंद वि भव्व परम-णिरंजणि मणु धरिवि सव्व मुक्खु जि झायहिं** ।।८।। हरि-हर-ब्रह्मा, श्री जिनेन्द्रदेव, मुनीश्वरो के समूह तथा अन्य भी भव्यजीव परम निरंजन मे मन रख कर सभी मोक्ष को ही ध्याते है। विषयकषायों में जाते हुए मन को लौटा कर अपने स्वरूप मे स्थिर करते है। **विशेषार्थ**—हरिहरादिक सभी प्रसिद्ध पुरुष ख्याति-पूजा-लाभादि समस्त विकल्पसमूहो मे रहित, अपने शुद्ध ज्ञान अखण्ड स्वभाव जो निज आत्मद्रव्य है उसका सम्यक् श्रद्धान, ज्ञान, आचरणरूप जो अभेद रत्नत्रयमय समाधि से उत्पन्न वीतराग सहजानन्द अतीन्द्रिय सुखरस, उसके अनुभव से पूर्ण कलश की तरह भरे हुए निरन्तर निराकार निजस्वरूप परमात्मा के ध्यान मे स्थिर होकर मुक्त होते है। **भावार्थ**—यह है कि यद्यपि व्यवहारनय मे सविकल्प अवस्था में वीतरागसर्वज्ञस्वरूप उनके बिम्ब अथवा वीतराग के नाममत्र के अक्षर अथवा वीतराग के सेवक महामुनि ध्यावने योग्य है तथापि वीतराग निर्विकल्प त्रिगुप्तिरूप परमसमाधि के काल मे निजशुद्धात्मा ही ध्यान करने योग्य है, अन्य कोई भी पदार्थ उस काल मे ध्यातव्य नही है ।।८।।

अथ भुवनत्रयेऽपि मोक्ष मुक्त्वा अन्यत्परमसुखकारणं नास्तीति निश्चिनोति—

अब निश्चय करते है कि तीनो लोको में मोक्ष को छोडकर अन्य कोई भी परम सुख का कारण नही है—

**तिहुयणि जीवहँ अत्थि णवि सोक्खहँ कारणु कोइ ।**
**मुक्खु मुएविणु एक्कु पर तेणवि चिंतहि सोइ ।।६।।**

त्रिभुवने जीवाना अस्ति नैव सुखस्य कारणं किमपि ।
मोक्ष मुक्त्वा एक पर तेनैव चिन्तय तमेव ।।६।।

तिहुयणि इत्यादि । **तिहुयणि** त्रिभुवने **जीवहं** जीवाना **अत्थि णवि** अस्ति नेव । कि नास्ति । **सोक्खहं कारणु** सुखस्य कारणम् । **कोइ** किमपि वस्तु । कि कृत्वा । **मुक्खु मुएविणु एक्कु** मोक्ष मुक्त्वैक **पर** नियमेन **तेणवि** तेनैव कारणेन **चिंतहि** चिंतय **सोइ** तमेव मोक्षमिति । तथाहि । त्रिभुवनेऽपि मोक्ष मुक्त्वा निरन्तरातिशय सुखकारणमन्यत्पञ्चेन्द्रियविषयानुभवरूप किमपि नास्ति तेन कारणेन हे **प्रभाकरभट्ट** वीतरागनिर्विकल्पपरमसामायिके स्थित्वा निजशुद्धात्मस्वभाव ध्याय त्वमिति । अत्राह **प्रभाकरभट्टः** हे भगवन्नतीन्द्रियमोक्षमुख निरन्तर वर्ण्यते भवद्भिस्तच्च न ज्ञायते जनै. । भगवानाह हे **प्रभाकरभट्ट** कोऽपि पुरुषो निर्व्याकुलचित्त प्रस्तावे पञ्चेन्द्रियभोगसेवा-रहितस्तिष्ठति स केनापि देवदत्तेन पृष्ट. सुखेन स्थितो भवान् । तेनोक्त सुखमस्तीति तत्सुखमात्मोत्थम् । कस्मादिति चेत् । तत्काले स्त्रीसेवादिस्पर्शविषयो नास्ति भोजना-

दिजिह्वे न्द्रियविषयो नास्ति विशिष्टरूपगन्धमाल्यादिघ्राणेन्द्रियविषयो नास्ति दिव्यस्त्रीरूपावलोकनादिलोचनविषयो नास्ति श्रवणरमणीयगीतवाद्यादिशब्दविषयोऽपि नास्तीति तस्मात् ज्ञायते तत्सुखमात्मोत्थमिति । किं च । एकदेशविषयव्यापाररहितानां तदेकदेशेनात्मोत्थसुखमुपलभ्यते वीतरागनिर्विकल्पस्वसंवेदनज्ञानरतानां पुनर्निरवशेषपञ्चेन्द्रियविषयमानसविकल्पजालनिरोधे सति विशेषेणोपलभ्यते । इदं तावत् स्वसंवेदनप्रत्यक्षगम्यं सिद्धात्मनां च सुखं पुनरनुमानगम्यम् । तथाहि । मुक्तात्मनां शरीरेन्द्रियव्यापाराभावेऽपि सुखमस्तीति साध्यम् । कस्माद्धेतो इदानीं पुनर्वीतरागनिर्विकल्पसमाधिस्थानां परमयोगिनां पञ्चेन्द्रियविषय–व्यापाराभावेऽपि स्वात्मोत्थवीतरागपरमानन्दसुखोपलब्धिरिति । अत्रेत्थंभूतं सुखमेवोपादेयमिति भावार्थः । तथागमे चोक्तमात्मोत्थमतीन्द्रियसुखम्—"अइसयमादसमुत्थं विसयातीदं अणोवममणंतं । अव्वुच्छिण्णं च सुहं सुद्धुवओगप्पसिद्धाणं ।।" ।।६।।

**तिहुयणि जीवहँ मुक्खु मुएविणु कोइ सोक्खहँ कारणु णवि अत्थि । तेणवि पर एक्कु सोइ चिंतहि ।।६।।** तीनों लोकों में जीवों के मोक्ष को छोड़कर अन्य कोई भी वस्तु सुख का कारण नहीं है, सुख का कारण एक मोक्ष ही है, इस कारण तू नियम से एक मोक्ष का ही चिन्तन कर । **विशेषार्थ**—तीनों लोकों में मोक्ष के सिवाय निरन्तर अतिशय सुख का कारणभूत दूसरा कोई पंचेन्द्रियविषयानुभवरूप कुछ भी नहीं है अतः हे प्रभाकर भट्ट ! वीतरागनिर्विकल्प परम सामायिक में स्थित होकर तू निज शुद्धात्मस्वभाव का ही ध्यान कर । इस पर प्रभाकरभट्ट कहते हैं—हे भगवन् ! आपने निरन्तर अतीन्द्रिय मोक्षसुख का ही कथन किया, सो ये सांसारिक जन उस सुख को जानते ही नहीं हैं, इन्द्रियसुख को ही सुख मानते हैं । तब गुरु कहते हैं—हे प्रभाकरभट्ट ! कोई एक पुरुष निराकुल चित्त है, पंचेन्द्रियों के भोगों का सेवन न करते हुए अकेला बैठा है, उसे देवदत्त ने पूछा कि आप सुखी हैं ? तब उसने कहा कि हाँ, सुखी हूँ । उस समय विषयसेवनादि सुख तो है ही नहीं, फिर उसने यह क्यों कहा कि हाँ सुखी हूँ । अतः यह ज्ञात होता है कि वह सुख आत्मोत्थ है, व्याकुलता रहित का है । कैसे ? उस समय भोजनादि जिह्वा इन्द्रिय का विषय भी नहीं है, स्त्रीसेवनादि स्पर्श का विषय भी नहीं है, गंधमाल्यादिक घ्राणेन्द्रिय का विषय भी नहीं है, दिव्य स्त्रियों का रूप अवलोकनादि नेत्र का विषय भी नहीं है और कानों का मनोज्ञ गीत वादित्रादि शब्द विषय भी नहीं है, अतः ज्ञात होता है कि सुख आत्मा में ही है, ऐसा तू निश्चय कर । जो एकदेश (आंशिक) विषयव्यापार से रहित है, उनके एकदेश आत्मोत्थ सुख है तो वीतरागनिर्विकल्प स्वसंवेदन ज्ञानियों के समस्त पंचेन्द्रियों के विषय और मन के विकल्प समूहों की रुकावट होने पर विशेषता से निराकुल सुख उत्पन्न होता है । ये दो बातें प्रत्यक्ष ही दृष्टिगत होती हैं - जो पुरुष नीरोग और चिन्ता रहित है, उसके विषयसामग्री के बिना ही सुख भासता है और जो महामुनि शुद्धोपयोग अवस्था में ध्यानारूढ़ हैं, उनके अनाकुलता प्रकट ही दिखाई दे रही है, वे इन्द्रादिक देवों से भी अधिक सुखी हैं । अतः जब संसारावस्था में ही सुख का मूल निराकुलता दिखाई देती है तो फिर सिद्धों के सुख की तो बात ही क्या है ! यद्यपि वे सिद्ध दृष्टिगम्य नहीं हैं तो भी अनुमान से ऐसा जाना जाता है कि सिद्धों के भावकर्म, द्रव्यकर्म, नोकर्म नहीं है, विषयों की प्रवृत्ति नहीं है कोई भी विकल्प जाल नहीं

है, केवल अतीन्द्रिय आत्मीक सुख ही है, वही सुख उपादेय है। आगम में आत्मोत्थ अतीन्द्रिय सुख के सम्बन्ध में कहा है--"शुद्धोपयोग से निष्पन्न हुए (शुद्धोपयोग के फल को प्राप्त हुए) आत्माओं का (अरहन्त सिद्धों का) सुख अतिशय, आत्मा से उत्पन्न, विषयो से रहित, अनुपम, अनन्त और अविच्छिन्न है।" कुन्दकुन्द प्रवचनसार १/१३ ॥९॥

अथ यस्मिन् मोक्षे पूर्वोक्तमतीन्द्रियसुखमस्ति तस्य मोक्षस्य स्वरूपं कथयति---

अब, जिस मोक्ष मे पूर्वोक्त अतीन्द्रिय सुख है, उस मोक्ष का स्वरूप कहते है—

**जीवहँ सो पर मोक्खु मुणि जो परमप्पय-लाहु।**
**कम्म-कलंक-विमुक्काहँ णाणिय बोल्लहिँ साहू ॥१०॥**

जीवाना त पर मोक्ष मन्यस्व य परमात्मलाभ।
कर्मकलङ्कविमुक्ताना ज्ञानिन ब्रुवन्ति साधव ॥१०॥

जीवहु इत्यादि। **जीवहं** जीवानां **सो** त **परं मोक्खु** मोक्ष **मुणि** मन्यस्व जानीहि हे **प्रभाकरभट्ट**। त कम्। जो **परमप्पयलाहु** य परमात्मलाभ। इत्थंभूतो मोक्षः केषा भवति। **कम्मकलंकविमुक्काहं** ज्ञानावरणाद्यष्टविधकर्मकलङ्कविमुक्तानाम्। इत्थभूत मोक्ष के ब्रुवन्ति। **णाणिय बोल्लहि** वीतरागस्वसवेदनज्ञानिनो ब्रुवन्ति। ते के। **साहू** साधव इति। तथाहि। केवलज्ञानाद्यनन्तगुणव्यक्तिरूपस्य कार्यसमयसारभूतस्य हि परमात्मलाभो मोक्षो भवतीति। स च केषाम्। पुत्रकलत्रममत्वस्वरूपप्रभृतिसमस्तविकल्परहितध्यानेन भावकर्मद्रव्यकर्मकलङ्करहितानां भव्याना भवतीति ज्ञानिनः कथयन्ति। अत्रायमेव मोक्ष पूर्वोक्तस्यानन्तसुखस्योपादेयभूतस्य कारणत्वादुपादेय इति भावार्थ ॥१०॥ एव मोक्षमोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये सूत्रदशकेन मोक्षस्वरूपनिरूपणस्थल समाप्तम्।

**कम्मकलंकविमुक्काहँ जीवहँ जो परमप्पय लाहु सो पर मोक्खु मुणि, णाणिय साहू बोल्लहिँ** ॥१०॥ हे प्रभाकरभट्ट! ज्ञानावरणादि अष्टविध कर्मकलक मे विमुक्त जीवो को जो परमात्म की प्राप्ति है, उसी को तू नियम से मोक्ष जान, ऐसा ज्ञानी साधु कहते है। **विशेषार्थ**–केवलज्ञानादि अनन्तगुण प्रकटरूप जो कार्य समयसार है अर्थात् शुद्धपरमात्मा है, उसका लाभ मोक्ष है। वह मोक्ष किनके होता है? पुत्र-कलत्रादि पर-वस्तुओ के ममत्वरूप सब विकल्पो से रहित ध्यान से– भावकर्म और द्रव्यकर्मों से रहित भव्य जीवो के वह मोक्ष होता है, ऐसा ज्ञानी कहते है। यहाँ पूर्वोक्त अनन्त सुख का कारण होने से यह मोक्ष ही उपादेय है ॥१०॥ इस प्रकार मोक्ष, मोक्षमार्ग और मोक्षफल के प्रतिपादक दूसरे महाधिकार मे दस दोहो में मोक्ष के स्वरूप का वर्णन पूर्ण हुआ।

अथ तस्यैव मोक्षस्यानन्तचतुष्टयस्वरूपं फलं दर्शयति---

अब, उसी मोक्ष के अनन्तचतुष्टय रूप फल का वर्णन करते हैं—

**दंसणु णाणु अणंत-सुहु समउ ण तुट्टइ जासु।**
**सो पर सासउ मोक्ख-फलु बिज्जउ अत्थि ण तासु ।।११।।**

दर्शनं ज्ञानं अनन्तसुखं समयं न त्रुट्यति यस्य।
तत् परं शाश्वतं मोक्षफलं द्वितीयं अस्ति न तस्य ।।११।।

दंसणु इत्यादि। **दंसणु** केवलदर्शनं **णाणु** केवलज्ञानं **अणंतसुहु** अनन्तसुखम् एतदुपलक्षणमनन्तवीर्याद्यनन्तगुणा **समउ ण तुट्टइ** एतद्गुणकदम्बकमेकसमयमपि यावन्न त्रुट्यति न नश्यति **जासु** यस्य मोक्षपर्यायस्याभेदेन तदाधारजीवस्य वा **सो पर** तदेव केवलज्ञानादिस्वरूपं **सासउ मोक्खफलु** शाश्वतं मोक्षफलं भवति। **बिज्जउ अत्थि ण तासु** तस्यानन्तज्ञानादिमोक्षफलस्यान्यद् द्वितीयमधिकं किमपि नास्तीति। अयमत्र भावार्थः। अनन्तज्ञानादिमोक्षफलं ज्ञात्वा समस्तरागादित्यागेन तदर्थमेव निरन्तरं शुद्धात्मभावना कर्तव्येति ।।११।। एवं द्वितीयमहाधिकारे मोक्षफलकथनरूपेण स्वतन्त्रसूत्रमेकं गतम्।

**जासु दंसणु णाणु अणंत सुहु समउ ण तुट्टइ, तासु सो पर सासउ मोक्खफलु अत्थि बिज्जउ ण ।।११।।** जिस मोक्षपर्याय के धारक शुद्धात्मा के केवलदर्शन, केवलज्ञान, अनन्त सुख और अनन्तवीर्य इन अनन्त चतुष्टय को आदि देकर अनन्त गुणों का समूह एक समय मात्र भी नष्ट नहीं होता अर्थात् जिसमें हमेशा अनन्त गुण विद्यमान रहते है, उस शुद्धात्मा के वही निश्चय से सदा रहने वाला मोक्ष का फल है, इसके सिवाय दूसरा कोई इससे अधिक फल नहीं है। **भावार्थ**–मोक्ष का फल अनन्तज्ञानादि जान कर समस्त रागादिक का त्याग करके उसी के लिए निरन्तर शुद्धात्मा की भावना करनी चाहिये ।।११।। इस प्रकार द्वितीयमहाधिकार में मोक्षफल के कथन की मुख्यता से एक स्वतन्त्र दोहासूत्र कहा।

अथानन्तरमेकोनविंशतिसूत्रपर्यन्तं निश्चयव्यवहारमोक्षमार्गव्याख्यानस्थलं कथ्यते तद्यथा––

अब, उन्नीस दोहासूत्रों तक निश्चय और व्यवहार मोक्षमार्ग का कथन करते है -

**जीवहँ मोक्खहँ हेउ वरु दंसणु णाणु चरित्तु।**
**ते पुणु तिण्णि वि अप्पु मुणि णिच्छइएँ एहउ वुत्तु ।।१२।।**

जीवानां मोक्षस्य हेतुः वरं दर्शनं ज्ञानं चारित्रम्।
तानि पुनः त्रीण्यपि आत्मानं मन्यस्व निश्चयेन एवं उक्तम् ।।१२।।

जीवहं इत्यादि। **जीवहं** जीवानां अथवा एकवचनपक्षे '**जीवहो**' जीवस्य **मोक्खहं हेउ** मोक्षस्य हेतुः कारणं व्यवहारनयेन भवतीति क्रियाध्याहारः। कथंभूतम्। **वरु** वरमुत्कृष्टम्। किं तत्। **दंसणु णाणु चरित्तु** सम्यग्दर्शनज्ञानचारित्रत्रयम्। **ते पुणु** तानि

पुन: **तिण्णि वि** त्रीण्यपि सम्यग्दर्शनज्ञानचारित्राणि **अप्पु** आत्मानमभेदनयेन **मुणि** मन्यस्व जानीहि त्वं हे **प्रभाकरभट्ट णिच्छएं** निश्चयनयेन **एहउ वुत्तु** एवमुक्तं भणितं तिष्ठतीति । इदमत्र तात्पर्यम् । भेदरत्नत्रयात्मको व्यवहारमोक्षमार्ग: साधको भवति अभेदरत्नत्रयात्मक: पुनर्निश्चयमोक्षमार्ग: साध्यो भवति, एवं निश्चयव्यवहारमोक्षमार्गयो: साध्यसाधकभावो ज्ञातव्य: सुवर्णसुवर्णपाषाणवत् इति । तथा चोक्तम्—"सम्मद्दंसणणाणं चरणं मोक्खस्स कारणं जाणे । ववहारा णिच्छयदो तत्तियमइओ णिओ अप्पा ।।" ।।१२।।

**जीवहं मोक्खहं हेउ वरु दंसणु णाणु चरित्तु । ते पुणु तिण्णि वि णिच्छएं अप्पु मुणि, एहउ वुत्तु ।।१२।।** जीवो के मोक्ष का कारण उत्कृष्ट दर्शन ज्ञान और चारित्र है । फिर उन तीनो को निश्चयनय से आत्मा के ही जानो । ऐसा श्री वीतराग देव ने कहा है। भेदरत्नत्रयात्मक व्यवहार मोक्ष-मार्ग साधक है और अभेदरत्नत्रयात्मक निश्चयमोक्षमार्ग साध्य है । इस प्रकार निश्चय व्यवहार मोक्षमार्ग का साध्य-साधकभाव सुवर्ण और सुवर्णपाषाणवत् जानना । कहा भी है—"सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र (इन तीनो के समुदाय) को व्यवहारनय से मोक्ष का कारण जानो । सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्रमयी निज आत्मा को निश्चयनय से मोक्ष का कारण जानो ।" वृ द्रव्यसग्रह ३/३९ ।।१२।।

अथ निश्चयरत्नत्रयपरिणतो निजशुद्धात्मैव मोक्षमार्गो भवतीति प्रतिपादयति—

अब कहते है कि निश्चयरत्नत्रयरूप परिणत निज शुद्धात्मा ही मोक्ष का मार्ग है—

**पेच्छइ जाणइ अणुचरइ अप्पिं अप्पउ जो जि ।**
**दंसणु णाणु चरित्तु जिउ मोक्खहं कारणु सो जि ।।१३।।**

पश्यति जानाति अनुचरति आत्मना आत्मानं य एव ।
दर्शनं ज्ञानं चारित्रं जीव मोक्षस्य कारणं स एव ।।१३।।

पेच्छइ इत्यादि । **पेच्छइ** पश्यति **जाणइ** जानाति **अणुचरइ** अनुचरति । केन कृत्वा । **अप्पइं** आत्मना करणभूतेन । कं कर्मतापन्नम् । **अप्पउ** निजात्मानम् । **जो जि** य एव कर्ता **दंसणु णाणु चरित्तु** दर्शनज्ञानचारित्रत्रयं भवतीति क्रियाध्याहार: । कोऽसौ भवति । **जिउ** जीव: य एवाभेदनयेन सम्यग्दर्शनज्ञानचारित्रत्रयं भवतीति **मोक्खहं कारणु** निश्चयेन मोक्षस्य कारणं एक एव **सो जि** स एव निश्चयरत्नत्रयपरिणतो जीव इति । तथाहि । य: कर्ता निजात्मानं मोक्षस्य कारणभूतेन पश्यति निर्विकल्परूपेण-वलोकयति । अथवा तत्त्वार्थश्रद्धानापेक्षया चलमलिनावगाढपरिहारेण शुद्धात्मैवोपादेय इति रुचिरूपेण निश्चिनोति न केवलं निश्चिनोति वीतरागस्वसंवेदनलक्षणाभेदज्ञानेन

**जानाति परिच्छिनत्ति** । न केवल परिच्छिनत्ति । अनुचरति रागादिसमस्तविकल्पत्यागेन **तत्रैव निजस्वरूपे स्थिरीभवतीति** स निश्चयरत्नत्रयपरिणत पुरुष एव निश्चयमोक्षमार्गो **भवतीति** । अत्राह **प्रभाकरभट्टः** । तत्त्वार्थश्रद्धानरुचिरूप सम्यग्दर्शन मोक्षमार्गो भवति नास्ति दोषः, पश्यति निर्विकल्परूपेणावलोकयति इत्येव यदुक्त तत्सत्तावलोकदर्शन कथं मोक्षमार्गो भवति यदि भवति चेत्तर्हि तत्सत्तावलोकदर्शनमभव्यानामपि विद्यते तेषामपि मोक्षो भवति स चागमविरोध इति । परिहारमाह । तेषा निर्विकल्पसत्तावलोक-दर्शनं बहिर्विषये विद्यते न चाभ्यन्तरशुद्धात्मतत्त्वविषये । कस्मादिति चेत् । तेषामभ-व्यानां मिथ्यात्वादिसप्तप्रकृत्युपशमक्षयोपशमक्षयाभावात् शुद्धात्मोपादेय इति रुचिरूपं सम्यग्दर्शनमेव नास्ति चारित्रमोहोदयात् पुनर्वीतरागचारित्ररूप निर्विकल्पशुद्धात्मसत्ताव-लोकनमपि न सभवतीति भावार्थ । निश्चयेनाभेदरत्नत्रयपरिणतो निजशुद्धात्मैव मोक्षमार्गो भवतीत्यस्मिन्नर्थे सवादगाथामाह—"रयणत्तय ण वट्टइ अप्पाणं मुइत्तु अण्णदवियम्हि । तम्हा तत्तियमइओ होदि हु मोक्खस्स कारण आदा ॥" ॥१३॥

**जो जि अप्पि अप्पउ पेच्छइ जाणइ अणुचरइ, सो जि दंसणु णाणु चरित्तु जिउ मोक्खहँ कारणु ॥१३॥** जो अपने से आपको देखता है, जानता है, आचरण करता है, वही विवेकी दर्शन ज्ञान चारित्र रूप परिणत हुआ जीव मोक्ष का कारण है। **विशेषार्थ**-जो सम्यग्दृष्टि जीव अपनी आत्मा को मोक्ष के कारण रूप मे निर्विकल्प भाव मे देखता है अथवा तत्त्वार्थश्रद्धान की अपेक्षा चल, मलिन और अवगाढ दोषो का परिहार कर शुद्धात्मा ही उपादेय है इस प्रकार रुचिरूप निश्चय करता है, न केवल निश्चय करता है अपितु वीतराग स्वसवेदनलक्षण ज्ञान मे जानता है, और न केवल जानता है अपितु रागादि समस्त विकल्पो का त्याग कर अपने स्वरूप मे स्थिर होता है, इस प्रकार निश्चयरत्नत्रयरूप परिणत वह पुरुष ही निश्चय मोक्षमार्ग है। गुरु के मुख से यह सुनकर प्रभाकरभट्ट **प्रश्न** करते है कि तत्त्वार्थश्रद्धान रुचिरूप सम्यग्दर्शन मोक्ष का मार्ग होता है, इसमे तो कोई दोष नही परन्तु आपने जो यह कहा कि निर्विकल्परूप मे देखता है यानी सत्तावलोकन देखने रूप दर्शन कैसे मोक्षमार्ग हो सकता है और यदि होता है तो फिर देखना तो अभव्यो के भी होता है, उनको भी मोक्ष हो जावेगा परन्तु आगम का यहा विरोध है। आगम मे तो उल्लेख है कि अभव्य को मोक्ष नही होता। गुरुदेव **उत्तर** देते है कि अभव्यो के देखने रूप जो दर्शन है, वह बाह्यपदार्थों का है, अन्तरग शुद्धात्मतत्त्व का दर्शन तो अभव्यो के नही होता क्योकि उन अभव्यो के मिथ्यात्व आदि सात प्रकृतियो का उपशम, क्षयोपशम, क्षय नही है तथा शुद्धात्मा ही उपादेय है ऐसी रुचिरूप सम्यग्दर्शन भी उनके नही है और चारित्रमोह के उदय मे वीतराग चारित्ररूप निर्विकल्प शुद्धात्म का सत्तावलोकन भी उनके सम्भव नही है। **तात्पर्य** यह है कि निश्चयापेक्षा अभेद रत्नत्रय को परिणत हुआ निजशुद्धात्मा ही मोक्ष का मार्ग है। इसी अर्थ मे **बृहद्द्रव्यसंग्रह मे** भी यह गाथा (४०) कही है—"आत्मा को छोडकर अन्य द्रव्य मे रत्नत्रय नही रहता, इस कारण रत्नत्रयमयी आत्मा ही निश्चय से मोक्ष का कारण है" ॥१३॥

अथ भेदरत्नत्रयात्मक व्यवहारमोक्षमार्ग दर्शयति—

अब भेदरत्नत्रयात्मक व्यवहार मोक्षमार्ग का कथन करते है—

**जं बोल्लइ ववहारु-णउ दंसणु णाणु चरित्तु ।**
**तं परियाणहि जीव तुहुँ जें परु होहि पवित्तु ।।१४।।**

यद् ब्रूते व्यवहारनयः दर्शनं ज्ञानं चारित्रम् ।
तत् परिजानीहि जीव त्वं येन परं भवसि पवित्रः ।।१४।।

जं इत्यादि । **जं** यत् **बोल्लइ** ब्रूते । **कोऽसौ कर्ता । ववहारणउ** व्यवहारनयः । यत् किं ब्रूते । **दंसणु णाणु चरित्तु** सम्यग्दर्शनज्ञानचारित्रत्रयं **तं** पूर्वोक्तं भेदरत्नत्रयस्वरूपं **परियाणहि** परि समन्तात् जानीहि । **जीव तुहुं** हे जीव त्वं कर्ता । **जें** येन भेदरत्नत्रयपरिज्ञानेन **परु होहि** परः उत्कृष्टो भवसि त्वम् । पुनरपि किंविशिष्टस्त्वम् । **पवित्तु** पवित्रः सर्वजनपूज्य इति । तद्यथा । हे जीव सम्यग्दर्शनज्ञानचारित्ररूपनिश्चयरत्नत्रयलक्षणनिश्चयमोक्षमार्गसाधकं व्यवहारमोक्षमार्गं जानीहि । त्वं येन ज्ञातेन कथंभूतो भविष्यसि । परंपरया पवित्रः परमात्मा भविष्यसि इति । व्यवहारनिश्चयमोक्षमार्गस्वरूपं कथ्यते । तद्यथा । वीतरागसर्वज्ञप्रणीतषड्द्रव्यादिसम्यक्श्रद्धानज्ञानव्रताद्यनुष्ठानरूपो व्यवहारमोक्षमार्गः निजशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपो निश्चयमार्गः । अथवा साधको व्यवहारमोक्षमार्गः, साध्यो निश्चयमोक्षमार्गः । अत्राह शिष्यः । निश्चयमोक्षमार्गो निर्विकल्पः तत्काले सविकल्पमोक्षमार्गो नास्ति कथं साधको भवतीति । अत्र परिहारमाह । भूतनैगमनयेन परंपरया भवतीति । अथवा सविकल्पनिर्विकल्पभेदेन निश्चयमोक्षमार्गो द्विधा, तत्रानन्तज्ञानरूपोऽहमित्यादि सविकल्पसाधको भवति, निर्विकल्पसमाधिरूपो साध्यो भवतीति भावार्थः ।। सविकल्पनिर्विकल्पनिश्चयमोक्षमार्गविषये संवादगाथामाह—"जं पुण सगयं तच्चं सवियप्पं होइ तह य अवियप्पं । सवियप्पं सासवयं णिरासवं विगयसंकप्पं ।" ।।१४।। एवं पूर्वोक्तैकोनविंशतिसूत्रप्रमितमहास्थलमध्ये निश्चयव्यवहारमोक्षमार्गप्रतिपादनरूपेण सूत्रत्रयं गतम् । इदानीं चतुर्दशसूत्रपर्यन्तं व्यवहारमोक्षमार्गप्रथमावयवभूतव्यवहारसम्यक्त्वं मुख्यवृत्त्या प्रतिपादयति । तद्यथा—

**जीव ! ववहारु णउ जं दंसणु णाणु चरित्तु बोल्लइ तं तुहुँ परियाणहि जें परु पवित्तु होहि** ।।१४।। हे जीव ! व्यवहारनय जो दर्शन ज्ञान चारित्र इन तीनों को मोक्षमार्ग कहता है, उस व्यवहार रत्नत्रय को तू जान जिससे कि तू उत्कृष्ट और पवित्र (सर्वजनपूज्य) हो सके । **विशेषार्थ**—हे जीव ! तू व्यवहार मोक्षमार्ग को सम्यग्दर्शन ज्ञान चारित्ररूप निश्चय रत्नत्रयलक्षण वाले निश्चय मोक्षमार्ग का साधक जान ! ऐसा जानने से तू कैसा होगा ? इनके जानने से तू परम्परा से पवित्र परमात्मा हो जाएगा । व्यवहार और निश्चय मोक्षमार्ग का स्वरूप कहते हैं—वीतराग सर्वज्ञदेव कथित छह द्रव्य, सात तत्त्व, नौ पदार्थ, पंचास्तिकाय इनका श्रद्धान, इनके स्वरूप का ज्ञान और व्रतादि अनुष्ठानरूप आचरण व्यवहार मोक्षमार्ग है और निजशुद्ध आत्मा का सम्यक् श्रद्धान, ज्ञान और स्वरूप का आचरण यह निश्चय मोक्षमार्ग है । अथवा व्यवहार मोक्षमार्ग साधक है और

**निश्चय मोक्षमार्ग** साध्य है। यह सुनकर शिष्य पुन **शङ्का** करता है—हे प्रभो! निश्चयमोक्षमार्ग तो निर्विकल्प है, उस समय सविकल्प मोक्षमार्ग नही है, यदि विकल्प दशा हो तो वह निर्विकल्पपने की साधक कैसे होती है? अब इसका **समाधान** करते है कि भूतनैगमनय की अपेक्षा सविकल्पदशा निर्विकल्पदशा की परम्परा मे साधक होती है। अर्थात् परम्परा मे व्यवहार रत्नत्रय को मोक्ष का कारण कहा है। सविकल्प और निर्विकल्प के भेद से निश्चयमोक्षमार्ग भी दो प्रकार का है—मैं अनन्तज्ञानरूप हूँ, शुद्ध हूँ, एक हूँ, ऐसा चिन्तन सविकल्प निश्चयमोक्षमार्ग है, उसे साधक कहते है और जहां पर कुछ चिन्तन नही है, कुछ बोलना नही है और कुछ चेष्टा नही है, वह निर्विकल्पसमाधि-रूप साध्य है। सविकल्प और निर्विकल्प निश्चयमोक्षमार्ग के विषय मे सवाद गाथा इस प्रकार है—"जो स्वतत्त्व है, वह सविकल्प तथा अविकल्प होता है। सविकल्प स्वतत्त्व आस्रव सहित है और निर्विकल्पतत्त्व आस्रव रहित है।" तत्त्वसार-५ ॥१४॥ इस प्रकार पूर्वोक्त उन्नीस दोहो वाले महा-स्थल मे निश्चय व्यवहार मोक्षमार्ग का प्रतिपादन करने वाले तीन दोहासूत्र कहे। अब १४ दोहो पर्यन्त व्यवहार मोक्षमार्ग के प्रथम अग व्यवहार सम्यक्त्व का मुख्यता से प्रतिपादन करते है—

**दव्वइँ जाणइ जहठियइँ तह जगि मण्णइ जो जि।**
**अप्पहँ केरउ भावडउ अविचलु दंसणु सो जि ॥१५॥**

द्रव्याणि जानाति यथास्थितानि तथा जगति मन्यते य एव।
आत्मन सम्बन्धी भाव अविचल दर्शन स एव ॥१५॥

दव्वइ इत्यादि। **दव्वइं** द्रव्याणि **जाणइ** जानाति। कथभूतानि। **जहठियइं** यथास्थितानि वीतरागस्वसवेदनलक्षणस्य निश्चयसम्यग्ज्ञानस्य परपरया कारणभूतेन परमागमज्ञानेन परिच्छिनत्तीति। न केवल परिच्छिनत्ति **तह** तथैव **जगि** इह जगति **मण्णइ** मन्यते निजात्मद्रव्यमेवोपादेयमिति रुचिरूपं यन्निश्चयसम्यक्त्व तस्य परपरया कारणभूतेन—"मूढत्रय मदाश्चाष्टौ तथानायतनानि षट्। अष्टौ शङ्कादयश्चेति दृग्दोषाः-पञ्चविंशति."[1] इति श्लोककथितपञ्चविंशतिसम्यक्त्वमलत्यागेन श्रद्दधातीति। एव द्रव्याणि जानाति श्रद्दधाति। कोऽसौ। **अप्पहं केरउ भावडउ** आत्मन सबन्धिभाव. परिणाम.। किंविशिष्टो भाव। **अविचलु** अविचलोऽपि चलमलिनावगाढदोषरहित· **दंसणु** दर्शन सम्यक्त्व भवतीति। क एव। **सो जि** स एव पूर्वोक्तो जीवभाव इति। अयमत्र भावार्थ। इदमेव सम्यक्त्व चिन्तामणिरिदमेव कल्पवृक्ष इदमेव कामधेनुरिति मत्वा भोगाकांक्षास्वरूपादिसमस्तविकल्पजालं वर्जनीयमिति। तथा चोक्तम्—"हस्ते चिन्तामणिर्यस्य गृहे यस्य सुरद्रुम·। कामधेनुर्धन यस्य तस्य का प्रार्थना परा॥" ॥१५॥

---

१. सोमदेव यशस्तिलकचम्पू पृ. ३२४

**जो जि दव्वइँ जहठियइँ जाणइ तह जगि मण्णइ । सो जि अप्पहँ केरउ अविचलु भावडउ दंसण ॥१५॥** जो द्रव्यों को जैसा उनका स्वरूप है, वैसा जाने, और उसी तरह इस जगत् में निर्दोष श्रद्धान करे, वही आत्मा का अविचल (चल, मलिन, अवगाढ, दोषरहित) निश्चलभाव है, यही आत्मभाव सम्यग्दर्शन है। **भावार्थ**–जगत् के छह द्रव्यो को अच्छी तरह जान कर श्रद्धान करे, जिसमे सन्देह नही वह सम्यग्दर्शन है, यह सम्यग्दर्शन आत्मा का निज स्वभाव है। वीतरागनिर्विकल्प स्वसंवेदन निश्चयसम्यग्ज्ञान का परम्परा कारणभूत परमागम का ज्ञान है, उसे अच्छी तरह जानो, और मन मे यह निश्चय करो कि इन सब द्रव्यो मे निज आत्मद्रव्य ही उपादेय है, ऐसी रुचिरूप जो निश्चय सम्यक्त्व है, उसका परम्परा कारण व्यवहारसम्यक्त्व है– वह व्यवहार सम्यक्त्व तीनमूढता, आठमद, छह अनायतन और आठ शकादि दोष रूप पच्चीस दोषो से रहित है। इन दोषो को छोडकर तत्त्वो की श्रद्धा करना वह व्यवहार सम्यग्दर्शन कहा गया है। जहाँ अस्थिर बुद्धि नही है, परिणामो की मलिनता नही है और शिथिलता नही है, वह सम्यक्त्व है। यही पूर्वोक्त सम्यग्दर्शन जीव का निजभाव है। यही सम्यग्दर्शन चिन्तामणि है, कल्पवृक्ष है और कामधेनु है, ऐसा मानकर भोगो की वाछा रूप समस्त विकल्पजाल को छोड़ना चाहिए। कहा भी है—"जिसके हाथ मे चिन्तामणि है, घन मे कामधेनु है और घर मे कल्पवृक्ष है, उसको किसी अन्य प्रकार की प्रार्थना की क्या आवश्यकता है ?" ॥१५॥

अथ यै षड्द्रव्यै. सम्यक्त्वविषयभूतैस्त्रिभुवन भृत तिष्ठति तानीदृक् जानीहीत्यभिप्राय मनसि सप्रधार्य सूत्रमिद कथयति—

अब, सम्यक्त्व के विषयभूत जिन छह द्रव्यो से ये तीनो लोक भरे हुए है, उनको यथार्थ जानो, ऐसा अभिप्राय मन मे रखकर यह गाथासूत्र कहते हैं—

**दव्वइँ जाणहि ताइँ छह तिहुयणु भरियउ जेहिँ ।**
**आइ-विणास-विवज्जियहिँ णाणिहि पभणियएहिँ ॥१६॥**

द्रव्याणि जानीहि तानि षट् त्रिभुवन भृत यै. ।
आदिविनाशविवर्जितै ज्ञानिभि प्रभणितै ॥१६॥

दव्वइ इत्यादि । **दव्वइं** द्रव्याणि **जाणहि** त्वं **हे प्रभाकरभट्ट ताइं** तानि परमागमप्रसिद्धानि । कतिसंख्योपेतानि **छह** षडेव । यै· द्रव्यै कि कृतम् । तिहुयणु **भरियउ** त्रिभुवन भृतम् । **जेहिं** यैः कर्तृभूतैः । पुनरपि किविशिष्टै । **आइविणासविवज्जियहिं** द्रव्यार्थिकनयेनादिविनाशविवर्जितै पुनरपि कथंभूतै । **णाणिहि पभणियएहि** ज्ञानिभि· प्रभणितैः कथितैश्चेति । अयमत्राभिप्रायः । एतैः षड्भिर्द्रव्यैर्निष्पन्नोऽयं लोको न चान्य· कोऽपि लोकस्य हर्ता कर्ता रक्षको वास्तीति । किं च । षड्द्रव्याणि व्यवहारसम्यक्त्वविषयभूतानि भवन्ति तथापि शुद्धनिश्चयेन शुद्धात्मानुभूति रूपस्य वीतरागसम्यक्त्वस्य नित्यानन्दैकस्वभावो निजशुद्धात्मैव विषयो भवतीति ॥१६॥

**ताइँ छह दव्वइँ जाणहि जेहिँ तिहुयणु भरियउ। णाणिहि आइ-विणास-विवज्जियहिँ णाणिएहिँ** ॥१६॥ हे प्रभाकरभट्ट ! तू उन छहो द्रव्यो को जान जिनसे ये तीनो लोक भरे है। ज्ञानियो ने द्रव्यार्थिकनय से इन्हे आदि-अन्त से रहित कहा है। **भावार्थ**–यह लोक छह द्रव्यो से भरा है, अनादिनिधन है, इस लोक का आदि अन्त नही है तथा इसका कर्ता, हर्ता व रक्षक कोई नही है। यद्यपि ये छह द्रव्य व्यवहारसम्यक्त्व के कारण है तो भी शुद्धनिश्चयनय से शुद्धात्मानुभूति रूप वीतरागसम्यक्त्व का कारण नित्य आनन्द स्वभाव निजशुद्धात्मा ही है ॥१६॥

अथ तेषामेव षड्द्रव्याणा सज्ञा चेतनाचेतनविभाग च कथयति—

अब, उन छह द्रव्यो के नाम तथा उनके चेतन-अचेतन विभाग का कथन करते है —

**जीउ सचेयणु दव्वु मुणि पंच अचेयण अण्ण।**
**पोग्गलु धम्माधम्मु णहु कालें सहिया भिण्ण ॥१७॥**

जीव सचेतन द्रव्य मन्यस्व पञ्च अचेतनानि अन्यानि।
पुद्गल धर्माधर्मौ नभ कालेन सहितानि भिन्नानि ॥१७॥

जीउ इत्यादि। **जीउ सचेयणु दव्वु** चिदानन्दैकस्वभावो जीवश्चेतनाद्रव्य भवति। **मुणि** मन्यस्व जानीहि तम्। **पंच अचेयणु** पञ्चाचेतनानि **अण्ण** जीवादन्यानि। तानि कानि। **पोग्गलु धम्माधम्मु णहु** पुद्गलधर्माधर्मनभासि कथभूतानि तानि **कालें सहिया** कालद्रव्येण सहितानि। पुनरपि कथभूतानि। **भिण्ण** स्वकीयस्वकीयलक्षणेन परस्पर भिन्नानि इति। तथाहि। द्विधा सम्यक्त्व भण्यते सरागवीतरागभेदेन। सरागसम्यक्त्वलक्षण कथ्यते। प्रशमसवेगानुकम्पास्तिक्याभिव्यक्तिलक्षण सरागसम्यक्त्व भण्यते, तदेव व्यवहारसम्यक्त्वमिति तस्य विषयभूतानि षड्द्रव्याणीति। वीतरागसम्यक्त्वं निजशुद्धात्मानुभूतिलक्षण वीतरागचारित्राविनाभूत तदेव निश्चयसम्यक्त्वमिति। अत्राह **प्रभाकरभट्टः**। निजशुद्धात्मैवोपादेय इति रुचिरूपं निश्चयसम्यक्त्व भवतीति बहुधा व्याख्यान पूर्व भवद्भि, इदानी पुन वीतरागचारित्राविनाभूत निश्चयसम्यक्त्व व्याख्यातमिति पूर्वापरविरोध कस्मादिति चेत्। निजशुद्धात्मैवोपादेय इति रुचिरूप निश्चयसम्यक्त्व गृहस्थावस्थाया तीर्थकरपरमदेवभरतसगररामपाण्डवादीना विद्यते, न च तेषा वीतरागचारित्रमस्तीति परस्परविरोध, अस्ति चेत्तर्हि तेषामसयतत्व कथमिति पूर्वपक्ष। तत्र परिहारमाह। तेषा शुद्धात्मोपादेयभावनारूप निश्चयसम्यक्त्व विद्यते पर किन्तु चारित्रमोहोदयेन स्थिरता नास्ति व्रतप्रतिज्ञाभङ्गो भवतीति तेन कारणेनासयता वा भण्यन्ते। शुद्धात्मभावनाच्युता सन्त भरतादयो निर्दोषिपरमात्मनामर्हत्सिद्धाना गुणस्तववस्तुस्तवरूपस्तवनादिक कुर्वन्ति तच्चरितपुराणादिक च समाकर्णयन्ति तदाराधकपुरुषाणामाचार्योपाध्यायसाधूना विषयकषायदुर्ध्यानवञ्चनार्थ ससारस्थितिच्छेदनार्थ च दानपूजादिकं

कुर्वन्ति तेन कारणेन शुभरागयोगात् सरागसम्यग्दृष्टयो भवन्ति। या पुनस्तेषां सम्यक्त्वस्य निश्चयसम्यक्त्वसंज्ञा वीतरागचारित्राविनाभूतस्य निश्चयसम्यक्त्वस्य परंपरया-साधकत्वादिति। वस्तुवृत्त्या तु तत्सम्यक्त्वं सरागसम्यक्त्वाख्य व्यवहारसम्यक्त्वमेवेति भावार्थ. ॥१७॥

**जीउ सचेयणु दव्वु मुणि अण्ण पोग्गलु धम्माधम्मु णहु काले सहिया पंच अचेयण भिण्ण** ॥१७॥ जीव चेतनद्रव्य है, ऐसा मानो और अन्य पुद्गल, धर्म, अधर्म, आकाश और काल सहित जो पाँच द्रव्य है वे अचेतन है और जीव से भिन्न है तथा ये सब अपने-अपने लक्षणों से आपस में भी भिन्न है। **भावार्थ**–सराग और वीतराग के भेद से सम्यक्त्व दो प्रकार का है। सरागसम्यक्त्व का लक्षण इस प्रकार है–प्रशम (शान्तपना), संवेग (धर्मरुचि तथा जगत् से अरुचि), अनुकम्पा (दया भाव) और आस्तिक्य (देवगुरुधर्म और षड् द्रव्यो की श्रद्धा) लक्षण वाला सरागसम्यक्त्व है। यही व्यवहार सम्यक्त्व भी है। इसके विषयभूत छह द्रव्य है। वीतरागसम्यक्त्व निजशुद्धात्मानुभूति रूप वीतरागचारित्र से अविनाभूततन्मयी है, यही निश्चय सम्यक्त्व है। यहाँ प्रभाकर भट्ट **प्रश्न** करता है—हे गुरुदेव ! निजशुद्धात्मा ही उपादेय है, ऐसी रुचिरूप निश्चय सम्यक्त्व का कथन पहले आपने अनेक बार किया, फिर अब वीतरागचारित्र से तन्मयी निश्चय सम्यक्त्व है, ऐसा व्याख्यान करते है, सो यह तो पूर्वापर विरोध है। क्योंकि निजशुद्धात्मा ही उपादेय है, ऐसी रुचिरूप निश्चय सम्यक्त्व तो गृहस्थावस्था मे तीर्थंकर परमदेव, भरत, सगर, राम, पाण्डवादिक के भी रहता है, परन्तु उनके वीतरागचारित्र तो नही है यह परस्पर विरोध है। यदि उनके वीतरागचारित्र माना जावे तो गृहस्थपना क्यो कहा ? गुरुदेव इसका **उत्तर** देते है–उनके 'शुद्धात्मा उपादेय है' ऐसी भावना रूप निश्चयसम्यक्त्व तो है, परन्तु चारित्रमोह के उदय मे स्थिरता नही है, व्रत प्रतिज्ञाभंग होता है, इस कारण से वे असंयत कहे जाते है। शुद्धात्मा की भावना से रहित हुए भरत, सगर आदि निर्दोष परमात्मा अरहन्त सिद्धों के गुणस्तवन, वस्तुस्तवनरूप स्तोत्रादि करते है और उनके चारित्रपुराणादिक सुनते है तथा उनको आज्ञा के आराधक जो महान् पुरुष आचार्य, उपाध्याय, साधु है, उनको भक्तिपूर्वक आहारदानादि करते है, पूजा करते है। विषयकषायरूप खोटे ध्यान को रोकने के लिए तथा संसार की स्थिति का नाश करने के लिए ऐसी शुभ क्रिया करते है, इसलिए शुभराग के सम्बन्ध से सम्यग्दृष्टि होते है और इनके सम्यक्त्व को निश्चय सम्यक्त्व भी कहा जा सकता है क्योंकि वीतरागचारित्र मे तन्मयी निश्चय सम्यक्त्व के परम्पराय साधकपना है। यथार्थ मे विचार किया जावे तो गृहस्थावस्था मे इनके सरागसम्यक्त्व ही है, और जो सरागसम्यक्त्व है, वह व्यवहार सम्यक्त्व ही है ॥१७॥

अथानन्तरं सूत्रचतुष्टयेन जीवादिषड्द्रव्याणां क्रमेण प्रत्येक लक्षण कथ्यते—

आगे चार दोहों मे जीवादि छह द्रव्यों में से क्रम से प्रत्येक का लक्षण कहते हैं—

**मुत्ति-विहूणउ णाणमउ परमाणंद-सहाउ ।**
**णियमिं जोइय अप्पु मुणि णिच्चु णिरंजणु भाउ ॥१८॥**

मूर्तिविहीन ज्ञानमय. परमानन्दस्वभाव ।
नियमेन योगिन् आत्मानं मन्यस्व नित्य निरञ्जनं भावम् ॥१८॥

मुत्तिविहूणउ इत्यादि । **मुत्तिविहूणउ** अमूर्त शुद्धात्मनो विलक्षणया स्पर्शरसगन्धवर्णवत्या मूर्त्या विहीनत्वात् मूर्तिविहीन. । **णाणमउ** क्रमकरणव्यवधानरहितेन लोकालोकप्रकाशकेन केवलज्ञानेन निर्वृत्तत्वात् ज्ञानमय. । **परमाणंदसहाउ** वीतरागपरमानन्दैकरूपसुखामृतरसास्वादेन समरसीभावपरिणतस्वरूपत्वात् परमानन्दस्वभाव । **णियमिं** शुद्धनिश्चयेन । **जोइय** हे योगिन् । **अप्पु** तमित्थभूतमात्मान **मुणि** मन्यस्व जानीहि त्वम् । पुनरपि किंविशिष्ट जानीहि । **णिच्चु** शुद्धद्रव्यार्थिकनयेन टङ्कोत्कीर्णज्ञायकैकस्वभावत्वान्नित्यम् । पुनरपि किंविशिष्टम् । **णिरंजणु** मिथ्यात्वरागादिरूपाञ्जनरहितत्वान्निरञ्जनम् । पुनश्च कथंभूतमात्मान जानीहि । **भाउ** भाव विशिष्टपदार्थम् इति । अत्रैवंगुणविशिष्ट· शुद्धात्मैवोपादेय अन्यद्धेयमिति तात्पर्यार्थ ॥१८॥ अथ––

**जोइय ! णियमिं अप्पु मुणि – मुत्ति विहूणउ, णाणमउ, परमाणद-सहाउ, णिच्चु णिरंजणु भाउ ॥१८॥** हे योगी ! निश्चय से तू आत्मा को ऐसा जान आत्मा अमूर्तिक है, शुद्धात्मा से भिन्न जो स्पर्श रस गन्ध वर्ण वाली मूर्ति है, उससे रहित है । क्रम, करण (इन्द्रिय) और व्यवधान रहित लोकालोकप्रकाशक केवलज्ञान से परिपूर्ण होने के कारण ज्ञानमय है, वीतराग परमानन्द रूप, अतीन्द्रिय सुख स्वरूप अमृत रस के आस्वाद से समरसी भाव को परिणत होने से परमानन्द स्वभाव वाला है, शुद्ध द्रव्यार्थिक नय से नित्य टंकोत्कीर्ण ज्ञायक स्वभाव वाला है, तथा मिथ्यात्व रागादिरूप अंजन से रहित होने के कारण निरंजन है तथा विशिष्ट है, अन्य सब पदार्थो से श्रेष्ठ है । इन गुणो से मण्डित शुद्धात्मा ही उपादेय है, और सब हेय है, यह **तात्पर्यार्थ** है ॥१८॥

**पुग्गलु छव्विहु मुत्तु वढ इयर अमुत्तु वियाणि ।**
**धम्माधम्मु वि गयठियहँ कारणु पभणहिँ णाणि ॥१९॥**

पुद्गल षड्विध मूर्त वत्स इतराणि अमूर्तानि विजानीहि ।
धर्माधर्ममपि गतिस्थित्यो कारण प्रभणन्ति ज्ञानिन ॥१९॥

पुग्गलु इत्यादि । **पुग्गलु** पुद्गलद्रव्य **छव्विहु** षड्विधम् । तथा चोक्तम्–– "पुढवी जल च छाया चउरिंदियविसय कम्मपाउग्गा । कम्मातीदा एव छब्भेया पुग्गला होंति ॥" एव तत्कथ भवति **मुत्तु** स्पर्शरसगन्धवर्णवती मूर्तिरिति वचनान्मूर्तम् । वढ वत्स पुत्र । **इयर** इतराणि पुद्गलात् शेषद्रव्याणि **अमुत्तु** स्पर्शाद्यभावादमूर्तानि **वियाणि** विजानीहि त्वम् । **धम्माधम्मु वि** धर्माधर्मद्वयमपि **गइठियहं** गतिस्थित्यो. **कारणु** कारण निमित्त **पभणहिं** प्रभणन्ति कथयन्ति । **के** कथयन्ति । **णाणि** वीतरागस्वसवेदनज्ञानिन इति । अत्र द्रष्टव्यम् । यद्यपि वज्रवृषभनाराचसहननरूपेण पुद्गलद्रव्य मुक्तिगमनकाले सहकारिकारण भवति तथापि धर्मद्रव्य च गतिसहकारिकारण भवति, अधर्मद्रव्य च लोकाग्रे स्थितस्य स्थितिसहकारिकारण भवति । यद्यपि

मुक्तात्मप्रदेशमध्ये परस्परैकक्षेत्रावगाहेन तिष्ठन्ति तथापि निश्चयेन विशुद्धज्ञानदर्शनस्वभावपरमात्मनः सकाशाद्भिन्नस्वरूपेण मुक्तौ तिष्ठन्ति । तथात्र संसारे चेतनाकारणानि हेयानीति भावार्थः ।।१६।। अथ—

**वह पुग्गलु छव्विहु मुत्तु इयर अमुत्तु वियाणि, धम्माधम्मु वि गयठियहँ कारणु णाणि पभणहिँ** ।।१६।। हे वत्स ! पुद्गल द्रव्य छह प्रकार का है और मूर्तिक है, अन्य सब द्रव्य अमूर्त है, तुम ऐसा जानो । धर्म और अधर्म द्रव्यो को क्रमश गति-स्थिति का सहायक कारण केवली श्रुतकेवली कहते है । **भावार्थ**-पुद्गल द्रव्य के छह भेद 'पुढवी जल' इत्यादि गाथा से कहते है—इसका अर्थ यह है कि १ बादरबादर, २. बादर, ३. बादरसूक्ष्म, ४. सूक्ष्मबादर, ५ सूक्ष्म, ६ सूक्ष्मसूक्ष्म ये छह भेद पुद्गल के हैं । काष्ठपाषाणादिक स्कन्ध जो छेदन होने पर स्वय नहीं जुड सकते, **बादरबादर** है । दूध, घी, तेल, जल, रस आदि जो छेदन होने पर स्वय जुड जाते है, **बादर** है । छाया, धूप, अन्धकार, चादनी आदि स्थूल होने पर भी जिनका छेदन-भेदन अथवा हस्तादि द्वारा ग्रहण नही किया जा सकता, **बादरसूक्ष्म** है । स्पर्श, रस, गन्ध, शब्द जो कि सूक्ष्म होने पर भी स्थूल ज्ञात होते है, **सूक्ष्मबादर** है । कर्मवर्गणादि जिन्हे सूक्ष्मपना है तथा जो इन्द्रियो मे ज्ञात नही होते, वे **सूक्ष्म** है । कर्मवर्गणा से नीचे के द्वयणुक स्कन्ध तक के स्कन्ध जो अत्यन्त सूक्ष्म हैं, वे **सूक्ष्मसूक्ष्म** है । इन छहों तरह के पुद्गलो को तू अपने स्वरूप से भिन्न समझ । यह पुद्गल द्रव्य स्पर्श रस गन्ध वर्ण को धारण करता है अत मूर्तिक है । धर्म-अधर्म गति तथा स्थिति के कारण है, ऐसा वीतरागदेव ने कहा है । यहाँ यह द्रष्टव्य है कि यद्यपि वज्रवृषभनाराचसहननरूप पुद्गल द्रव्य मोक्षगमनकाल मे सहकारी कारण होता है, तथापि धर्मद्रव्य गति मे सहकारी कारण होता है और अधर्मद्रव्य सिद्धलोक मे स्थिति का सहकारी कारण है । लोकशिखर पर आकाश के प्रदेश अवकाश मे सहायक होते है । यद्यपि मुक्तात्माओ के प्रदेश परस्पर एक जगह है तो भी विशुद्ध ज्ञानदर्शन भाव भगवान सिद्धक्षेत्र मे भिन्न-भिन्न स्थित है । पुद्गलादि पाँचो द्रव्य जीव को यद्यपि निमित्त कारण कहे गए है, तो भी उपादान कारण नही हैं ।।१६।।

**दव्वइँ सयलइँ वरि ठियइँ णियमें जासु वसंति ।**
**तं णहु दव्वु वियाणि तुहुं जिणवर एउ भणंति ।।२०।।**

द्रव्याणि सकलानि उदरे स्थितानि नियमेन यस्य वसन्ति ।
तत् नभ द्रव्य विजानीहि त्व जिनवरा एतद् भणन्ति ।।२०।।

**दव्वइं** द्रव्याणि । कतिसख्योपेतानि । **सयलइं** समस्तानि **उवरि** उदरे **ठियइं** स्थितानि **णियमें** निश्चयेन **जासु** यस्य **वसंति** आधाराधेयभावेन तिष्ठन्ति **तं** तत् **णहु दव्वु** नभ आकाशद्रव्य **वियाणि** विजानीहि **तुहुं** त्वं **हे प्रभाकरभट्ट जिणवर** जिनवराः वीतरागसर्वज्ञाः **एउ भणंति** एतद्भणन्ति कथयन्तीति । अयमत्र तात्पर्यार्थः । यद्यपि परस्परैकक्षेत्रावगाहेन तिष्ठत्याकाश तथापि साक्षादुपादेयभूतादनन्तसुखस्वरूपात्परमात्मनः सकाशादत्यन्तभिन्नत्वाद्धेयमिति ।।२०।। अथ—

**जासु वरि सयलइँ दव्वइँ ठियइँ णियमें वसंति त तुहुं णहु दव्वु वियाणि एउ जिणवर भणंति ॥२०॥** जिसके उदर मे यानी जिसमे सब द्रव्य स्थित हुए निश्चय से आधार-आधेयरूप होकर रहते है, उसको तू आकाशद्रव्य जान। ऐसा जिनेन्द्रदेव कहते है। लोकाकाश आधार है, अन्य सब द्रव्य आधेय हैं। **भावार्थ**–यद्यपि ये सब द्रव्य आकाश मे परस्पर एकक्षेत्रावगाह रूप से स्थित है, तो भी साक्षात् उपादेयभूत अनन्तसुख स्वरूप परमात्मा से अत्यन्त भिन्न होने के कारण हेय ही है ॥२०॥

**कालु मुणिज्जहि दव्वु तुहुँ वट्टण-लक्खणु एउ।**
**रयणहँ रासि विभिण्ण जिम तसु अणुयहँ तह भेउ ॥२१॥**

काल मन्यस्व द्रव्य त्व वर्तनालक्षण एतत्।
रत्नाना राशि विभिन्न यथा तस्य अणना तथा भेद ॥२१॥

कालु इत्यादि। **कालु** काल **मुणिज्जहि** मन्यस्व जानीहि। कि जानीहि। **दव्वु** कालसंज्ञ द्रव्यम्। कथभूतम्। **वट्टणलक्खणु** वर्तनालक्षण स्वयमेव परिणममाणाना द्रव्याणा बहिरङ्गसहकारिकारणम्। किवदिति चेत्। कुम्भकारचक्रस्याधस्तनशिलावदिति। **एउ** एतत् प्रत्यक्षीभूत तस्य कालद्रव्यस्यासख्येयप्रमितस्य परस्परभेदविषये दृष्टान्तमाह। **रयणहं रासि** रत्नाना राशि। कथंभूत.। **विभिण्ण** विभिन्न विशेषेण स्वरूपव्यवधानेन भिन्न **तसु** तस्य कालद्रव्यस्य **अणुयहं** अणूना कालाणूना **तह** तथा **भेउ** भेद इति। अत्राह शिष्य। समय एव निश्चयकाल, अन्यन्निश्चयकालसज्ञ कालद्रव्य नास्ति। अत्र परिहारमाह। समयस्तावत्पर्याय। कस्मात्। विनश्वरत्वात्। तथा चोक्त समयस्य विनश्वरत्वम्—"**समओ उप्पण्णद्धसी**" इति। स च पर्यायो द्रव्य विना न भवति। कस्य द्रव्यस्य भवतीति विचार्यते यदि पुद्गलद्रव्यस्य पर्यायो भवति तर्हि पुद्गलपरमाणुपिण्डनिष्पन्नघटादयो यथा मूर्ता भवन्ति तथा अणोरण्वन्तरव्यतिक्रमणाज्जात समय, चक्षुसपुटविघटनाज्जातो निमिष, जलभाजनहस्तादिव्यापाराज्जाता घटिका, आदित्यबिम्बदर्शनाज्जातो दिवस, इत्यादि कालपर्याया मूर्ता दृष्टिविषया प्राप्नुवन्ति। कस्मात्। पुद्गलद्रव्योपादानकारणजातत्वाद् घटादिवत् इति। तथा चोक्तम्। उपादानकारणसदृश कार्य भवति मृत्पिण्डाद्युपादानकारणजनितघटादिवदेव न च तथा समयनिमिषघटिकादिवसादिकालपर्याया मूर्ता दृश्यन्ते। ये पुन पुद्गलपरमाणुमन्दगतिगमननयनपुटविघटनजलभाजनहस्तादिव्यापारदिनकरबिम्बगमनादिभि पुद्गलपर्यायभूतै क्रियाविशेषै समयादिकालपर्याया परिच्छिद्यन्ते, ते चाणुव्यतिक्रमणादय तेषामेव समयादिकालपर्यायाणा व्यक्तिनिमित्तत्वेन बहिरङ्गसहकारिकारणभूता एव ज्ञातव्या न चोपादानकारणभूता घटोत्पत्तौ कुम्भकारचक्रचीवरादिवत्। तस्माद् ज्ञायते तत्कालद्रव्यममूर्तमविनश्वरमस्तीति तस्य सत्पर्याया समयनिमिषादय इति। अत्रेदं तु कालद्रव्य सर्व-

प्रकारोपादेयभूतात् शुद्धबुद्धैकस्वभावाज्जीवद्रव्याद्भिन्नत्वाद्धेयमिति तात्पर्यार्थ. ।।२१।।

**तुहुँ एउ वट्टण लक्खणु कालु दव्वु मुणिज्जहि । जिम रयणहँ रासि विभिण्ण तह तसु अणुयहँ भेउ ।।२१।।** हे शिष्य ! तू इस प्रत्यक्षरूप वर्तनालक्षण वाले को कालद्रव्य जान अर्थात् अपने आप परिणमते हुए द्रव्यो को कुम्हार के चक्र की नीचे की शिला की तरह जो बहिरग सहकारी कारण है, यह कालद्रव्य असख्यात प्रदेश प्रमाण है। जैसे रत्नों की राशि भिन्न-भिन्न है, सब रत्न अलग-अलग रहते है उसी तरह उस काल के अणुओ का भेद है, एक कालाणु से दूसरा कालाणु नही मिलता। यह सुनकर शिष्य प्रश्न करता है कि समय ही निश्चयकाल है। अन्य निश्चय कालसंज्ञा वाला काल-द्रव्य नही है। इसका समाधान करते है - समय उस कालद्रव्य की पर्याय है क्योकि समय विनाशशील है। **पंचास्तिकाय** मे समय की नश्वरता के सम्बन्ध मे कहा है **'समओ उप्पण्णपद्धंसी'** अर्थात् समय उत्पन्न होता है और नष्ट होता है। पर्याय द्रव्य के बिना हो नही सकती। समय किस द्रव्य की पर्याय है। इस पर विचार करना चाहिए। यदि पुद्गल द्रव्य की पर्याय मानी जावे तो पुद्गल परमाणुओ से उत्पन्न हुए घटादि जैसे मूर्त होते है वैसे समय भी मूर्त होना चाहिए, परन्तु समय अमूर्त है इसलिए पुद्गल की पर्याय तो नही है। पुद्गल परमाणु आकाश के एक प्रदेश से दूसरे प्रदेश को जाता है, सो **समय** पर्याय काल की है, चक्षुओ के मिलने तथा विघटने से **निमिष** होता है। जलपात्र तथा हस्तादिक के व्यापार से **घटिका** होती है, सूर्यबिम्ब के उदय से **दिन** होता है, इत्यादि काल की जो पर्याये है, क्या वे मूर्त है और देखने मे आती हैं, कैसे ? पुद्गल द्रव्य उपादान कारण से उत्पन्न हुए घटादि के समान। कहा भी है उपादान कारण के सदृश कार्य होता है, जैसे मूर्त मिट्टी के ढेले मे उत्पन्न घडे वगैरह मूर्तिक होते है वैसे समय-निमिष-घटिका-दिवस आदि काल पर्याये मूर्त नही दिखाई देती। अत अमूर्तद्रव्य जो काल है, ये उसकी पर्याये है। कालद्रव्य अणुरूप अमूर्तिक अविनश्वर है और समयादिक पर्याय अमूर्तिक है परन्तु विनश्वर है। अविनश्वरपना द्रव्य मे ही है, पर्याय मे नही है, यह निश्चय से जानना इसलिए समयादिक को कालद्रव्य की पर्याय ही कहना चाहिए, पुद्गल की नही। पुद्गल पर्याय मूर्तिक है, यह कालद्रव्य सर्व प्रकार से उपादेयभूत शुद्ध बुद्ध केवलस्वभाव जीवद्रव्य से भिन्न होने से हेय है, यह **तात्पर्यार्थ** है ।।२१।।

अथजीवपुद्गलकालद्रव्याणि मुक्त्वा शेषधर्माधर्माकाशान्येकद्रव्याणीति निरूपयति-

अब कहते है कि जीव, पुद्गल और काल द्रव्य को छोडकर शेष तीन धर्म, अधर्म और आकाश द्रव्य एक-एक है--

**जीउ वि पुग्गलु कालु जिय ए मेल्लेविणु दव्व ।**
**इयर अखंड वियाणि तुहुँ अप्प-पएसहिं सव्व ।।२२।।**

जीवोऽपि पुद्गल कालः जीव एतानि मुक्त्वा द्रव्याणि ।
इतराणि अखण्डानि विजानीहि त्वं आत्मप्रदेशैः सर्वाणि ।।२२।।

जीउ वि इत्यादि । **जीउ वि** जीवोऽपि **पुग्गलु** पुद्गलः **कालु** कालः **जिय** हे जीव **ए मेल्लेविणु** एतानि मुक्त्वा **दव्व** द्रव्याणि **इयर** इतराणि धर्माधर्माकाशानि **अखंड**

अखण्डद्रव्याणि **वियाणि** विजानीहि **तुहुं** त्वं हे **प्रभाकरभट्ट**। किं कृत्वाखण्डानि विजानीहि। **अप्पपएसहिं** आत्मप्रदेशैः। कतिसंख्योपेतानि। **सव्व** सर्वाणि इति। तथाहि। जीवद्रव्याणि पृथक् पृथक् जीवद्रव्यगणनेनानन्तसंख्यानि पुद्गलद्रव्याणि तेभ्योऽप्यनन्तगुणानि भवन्ति। धर्माधर्माकाशानि पुनरेकद्रव्याण्येवेति। अत्र जीवद्रव्यमेवोपादेयं तत्रापि यद्यपि शुद्धनिश्चयेन शक्त्यपेक्षया सर्वे जीवा उपादेयास्तथापि व्यक्त्यपेक्षया पञ्च परमेष्ठिन एव, तेष्वपि मध्ये विशेषेणार्हत्सिद्धा एव तयोरपि मध्ये सिद्धा एव, परमार्थेन तु मिथ्यात्वरागादिविभावपरिणामनिवृत्तिकाले स्वशुद्धात्मैवोपादेय इत्युपादेयपरंपरा ज्ञातव्येति भावार्थः ॥२२॥

**जिय तुहुँ जीउ वि पुग्गलु कालु ए दव्व मेल्लेविणु इतराणि सव्व अप्पपएसहिं अखंड वियाणि ॥२२॥** हे जीव ! तू जीव, पुद्गल और काल इन तीन द्रव्यों को छोड कर दूसरे सब द्रव्यों को धर्म, अधर्म और आकाश को अपने प्रदेशों से अखण्डित जान। जीव द्रव्य पृथक्-पृथक् जीवों की गणना से अनन्त है, पुद्गल द्रव्य उससे भी अनन्त गुणे है, कालद्रव्याणु असंख्यात है, धर्म द्रव्य और अधर्म द्रव्य लोकव्यापी है और एक-एक है, ये दोनों द्रव्य असंख्यातप्रदेशी है। आकाशद्रव्य अलोक की अपेक्षा अनन्तप्रदेशी है तथा लोक की अपेक्षा असंख्यातप्रदेशी है। ये सब द्रव्य अपने-अपने प्रदेशों से मुक्त है, एक के प्रदेश किसी दूसरे के प्रदेशों से नहीं मिलते। इन सब द्रव्यों मे जीव द्रव्य ही उपादेय है। यद्यपि शुद्धनिश्चयनय से शक्ति की अपेक्षा सभी जीव उपादेय है तो भी व्यक्ति की अपेक्षा पंचपरमेष्ठी ही उपादेय है। उनमे भी अरहन्त सिद्ध ही विशेष उपादेय है, उन दोनों में भी सिद्ध ही विशेषोपादेय है और निश्चयनय से मिथ्यात्वरागादि विभाव परिणाम के अभाव में स्वशुद्धात्मा ही उपादेय है, यह उपादेय परम्परा जाननी चाहिए, यह **भावार्थ** है ॥२२॥

अथ जीवपुद्गलौ सक्रियौ धर्माधर्माकाशकालद्रव्याणि निःक्रियाणीति प्रतिपादयति-

अब प्रतिपादित करते है कि जीव और पुद्गल ये दोनों सक्रिय है और धर्म, अधर्म, आकाश एवं काल ये चारों निष्क्रिय है —

**दव्व चयारि वि इयर जिय गमणागमण-विहीण।**
**जीउ वि पुग्गलु परिहरिवि पभणहिँ णाण-पवीण ॥२३॥**

द्रव्याणि चत्वारि अपि इतराणि जीव गमनागमनविहीनानि।
जीवमपि पुद्गलं परिहृत्य प्रभणन्ति ज्ञानप्रवीणाः ॥२३॥

दव्व इत्यादि। **दव्व** द्रव्याणि। कतिसंख्योपेतानि एव। **चयारि वि** चत्वार्येव **इयर** जीवपुद्गलाभ्यामितराणि **जिय** हे जीव। कथंभूतान्येतानि। **गमणागमण-विहीण** गमनागमनविहीनानि निःक्रियाणि चलनक्रियाविहीनानि। किं कृत्वा। **जीउ वि पुग्गलु परिहरिवि** जीवपुद्गलौ परिहृत्य **पभणहिँ** एव प्रभणन्ति कथयन्ति। के ते।

**गाग-पवीण** भेदाभेदरत्नत्रयाराधका विवेकिन इत्यर्थ । तथाहि । जीवाना संसारावस्थायां गतेः सहकारिकारणभूताः कर्मनोकर्मपुद्गला कर्मनोकर्माभावात्सिद्धानां निःक्रियत्व भवति पुद्गलस्कन्धाना तु कालाणुरूप कालद्रव्य गतेर्बहिरङ्गनिमित्त भवति । अनेन किमुक्त भवति । अविभागिव्यवहारकालसमयोत्पत्तौ मन्दगतिपरिणतपुद्गलपरमाणु घटोत्पत्तौ कुम्भकारवद्बहिरङ्गनिमित्तेन व्यञ्जको व्यक्तिकारको भवति । कालद्रव्यं तु मृत्पिण्डवदुपादानकारण भवति । तस्य तु पुद्गलपरमाणोर्मन्दगमनकाले यद्यपि धर्मद्रव्य सहकारिकारणमस्ति तथापि कालाणुरूप निश्चयकालद्रव्यं च सहकारिकारण भवति । सहकारिकारणानि तु बहून्यपि भवन्ति मत्स्यानां धर्मद्रव्ये विद्यमानेऽपि जलवत्, घटोत्पत्तौ कुम्भकारबहिरङ्गनिमित्तेऽपि चक्रचीवरादिवत्, जीवानां धर्मद्रव्ये विद्यमानेऽपि कर्मनोकर्मपुद्गला गते सहकारिकारण, पुद्गलाना तु कालद्रव्य गते सहकारिकारणम् । कुत्र भणितमास्ते इति चेत् । **पञ्चास्तिकायप्राभृते श्रीकुन्दकुन्दाचार्यदेवैः** सक्रियनिःक्रियव्याख्यानकाले भणितमस्ति—"**जीवा पुग्गलकाया सह सक्किरिया हवंति ण य सेसा । पुग्गलकरणा जीवा खंदा खलु कालकरणेहिं ।।**" पुद्गलस्कन्धाना धर्मद्रव्ये विद्यमानेऽपि जलवत् द्रव्यकालो गते सहकारिकारणं भवतीत्यर्थ । अत्र निश्चयनयेन निःक्रियसिद्धस्वरूपसमान निजशुद्धात्मद्रव्यमुपादेयमिति तात्पर्यम् । तथा चोक्त निश्चयनयेन नि क्रियजीवलक्षणम्—"**यावत्क्रियाः प्रवर्तन्ते तावद् द्वैतस्य गोचराः । अद्वये निष्कले प्राप्ते निःक्रियस्य कुतः क्रिया ।।**" ।।२३।।

जिय ! जीउ **वि पुग्गलु परिहरिवि इयर चयारि वि दव्व गमणागमणविहीण, णाणपवीण पभणहिं** ।।२३।। हे जीव ! जीव और पुद्गल इन दोनो को छोड कर दूसरे धर्मादि चारो ही द्रव्य हलनचलनादि क्रियारहित है, जीव पुद्गल क्रियाशील है, ऐसा ज्ञानियो में चतुर भेदाभेदरत्नत्रय के धारक कहते है । **भावार्थ**–ससारावस्था मे जीवो के एक गति मे दूसरी गति मे जाने मे कर्म-नोकर्म जाति के पुद्गल सहायी है, कर्म-नोकर्म के अभाव मे सिद्धो के निष्क्रियपना है, पुद्गल स्कन्धो के गमन मे बहिरग निमित्त कारण कालाणु रूप कालद्रव्य है । इसमे क्या अभिप्राय निकला ? यही कि निश्चय काल की पर्याय समयरूप व्यवहार काल की उत्पत्ति मे मन्द गतिरूप परिणत हुआ अविभागी पुद्गल परमाणु कारण होता है । समयरूप व्यवहारकाल का उपादान कारण निश्चय काल द्रव्य है, उसी की एक समयादि व्यवहारकाल का मूल कारण निश्चय कालाणु रूप काल द्रव्य है, उसी की एक समयादिक पर्याय है । पुद्गल परमाणु की मन्दगति बहिरग निमित्त कारण है, उपादान कारण नही है, पुद्गल परमाणु आकाश के प्रदेश में मन्दगति से गमन करता है, यदि तेज गति से चले तो एक समय में चौदह राजू जाता है । जैसे घटपर्याय की उत्पत्ति मे मूल कारण तो मृत्तिका पिण्ड है और बहिरग निमित्त कुम्भकार है; वैसे ही समयपर्याय की उत्पत्ति में मूल कारण तो कालाणुरूप निश्चयकाल है और बहिरग निमित्त कारण पुद्गल परमाणु है । पुद्गल परमाणु की मन्दगतिरूप गमनसमय मे यद्यपि धर्मद्रव्य सहकारी है तो भी कालाणु रूप निश्चयकाल को परमाणु की मन्दगति का सहायक जानना । परमाणु के निमित्त से तो काल की समयपर्याय प्रकट होती है और काल

की सहायता से परमाणु मन्द गति करता है। **प्रश्न**–गति का सहकारी तो धर्म है, काल को कैसे कहा ? **उत्तर**–उपादान कारण तो एक ही होना है जबकि सहकारी कारण बहुत से होते हैं। निज द्रव्य ही अपनी गुण-पर्यायों का मूल कारण है, निमित्तकारण तो बहुत होते हैं। जैसे धर्मद्रव्य तो गति मे सहायक है ही परन्तु मछलियो को गति मे सहायक जल है तथा घट की उत्पत्ति मे बहिरग निमित्त कारण कुम्भकार है तो भी दण्ड, चक्र, चीवरादिक भी अवश्य कारण है। जीवो के गमन में सहायक धर्मद्रव्य विद्यमान है तो भी कर्म-नोकर्म पुद्गल सहकारी कारण है, इसी तरह पुद्गल को कालद्रव्य की गति मे सहकारी कारण जानना। **प्रश्न**–धर्मद्रव्य को सब जगह गति का सहायक कहा गया है और कालद्रव्य को वर्तना मे सहायक कहा गया है। गति मे सहायक कहाँ कहा है ? **उत्तर**–ऐसा श्री **कुन्दकुन्दाचार्य** ने **पचास्तिकाय** में क्रियावन्त और अक्रियावन्त के व्याख्यान मे कहा है - "जीव और पुद्गल ये दोनो क्रियावन्त है और शेष चार द्रव्य निष्क्रिय है। जीव को दूसरी गति मे गमन का कारण कर्म है, वह पुद्गल है और पुद्गल स्कन्धो के गमन मे कारण काल है।" जैसे धर्मद्रव्य के रहने पर भी मछली को गमन मे सहायक जल है, उसी तरह पुद्गल को धर्मद्रव्य के होने पर भी द्रव्यकाल गमन मे सहकारी कारण है। यहाँ निश्चयनय से गमनादि क्रिया मे रहित निष्क्रिय सिद्ध-स्वरूप के समान निष्क्रिय निर्द्वन्द्व निजशुद्धात्मा ही उपादेय है यह **भावार्थ** हुआ। निश्चयनय की अपेक्षा निष्क्रिय जीव का लक्षण अन्यत्र भी ऐसा कहा है - "जब तक इस जीव के हलन-चलनादि क्रिया है, गति से गत्यन्तर है, तभी तक दूसरे द्रव्य का सम्बन्ध है, जब दूसरे का सम्बन्ध मिटा, अद्वैत हुआ तब शरीर से रहित निष्क्रिय है। निष्क्रिय के क्रिया कहाँ से हो सकती है" अर्थात् ससारी जीव के कर्मों का सम्बन्ध रहने के कारण गमनागमन है, सिद्ध भगवान कर्मरहित निष्क्रिय है, उनके कभी गमनागमन रूप क्रिया सम्भव नही है ॥२३॥

अथ पञ्चास्तिकायसूचनार्थं कालद्रव्यमप्रदेशं विहाय कस्य द्रव्यस्य कियन्त प्रदेशाः भवन्तीति कथयति—

अब पचास्तिकाय की सूचना के लिए अप्रदेशी कालद्रव्य को छोडकर किस द्रव्य के कितने प्रदेश है, सो कहते है—

**धम्माधम्मु वि एक्कु जिउ ए जि असख-पदेस।**
**गयणु अणंत-पएसु मुणि बहु-विह पुग्गल-देस ॥२४॥**

धर्माधर्मौ अपि एकः जीवः एतानि एव असंख्यप्रदेशानि।
गगनं अनन्तप्रदेशं मन्यस्व बहुविधाः पुद्गलदेशाः ॥२४॥

धम्माधम्मु वि इत्यादि। **धम्माधम्मु वि** धर्माधर्मद्वितयमेव **एक्कु जिउ** एको विवक्षितो जीवः। **ए जि** एतान्येव त्रीणि द्रव्याणि **असंखपदेस** असंख्येयप्रदेशानि भवन्ति। **गयणु** गगनं **अणंतपएसु** अनन्तप्रदेशं **मुणि** मन्यस्व जानीहि। **बहुविह** बहुविधाः भवन्ति। के ते। **पुग्गलदेस** पुद्गलप्रदेशाः। अत्र पुद्गलद्रव्यप्रदेशविवक्षया प्रदेश-शब्देन परमाणवो ग्राह्याः न च क्षेत्रप्रदेशा इति। कस्मात्। पुद्गलस्यानन्तक्षेत्रप्रदेशा-

भावादिति । अथवा पाठान्तरम् । 'पुग्गलु तिविहु पएसु' । पुद्गलद्रव्ये संख्यातासंख्यातानन्तरूपेण त्रिविधा. प्रदेशाः परमाणवो भवन्तीति । अत्र निश्चयेन द्रव्यकर्माभावादमूर्ता मिथ्यात्वरागादिरूपभावकर्मसंकल्पविकल्पाभावात् शुद्धालोकाकाशप्रमाणेनासंख्येयाः प्रदेशा यस्य शुद्धात्मनः स शुद्धात्मा वीतरागनिर्विकल्पसमाधिपरिणतिकाले साक्षादुपादेय इति भावार्थः ।।२४।।

**धम्माधम्मु वि एक्कु जिउ, ए जि असंखपदेस, गयणु अणंतपएसु पुग्गलवेस बहुविह मुणि ।।२४।।** धर्मद्रव्य, अधर्मद्रव्य और एक जीव ये तीनो असख्यातप्रदेशी है, आकाश अनन्तप्रदेशी है, पुद्गल के प्रदेश बहुल प्रकार के जानो । परमाणु एकप्रदेशी है, स्कन्ध सख्यातप्रदेशी, असख्यातप्रदेशी तथा अनन्तप्रदेशी भी होते है । **भावार्थ**–यहाँ पुद्गल द्रव्य की प्रदेश विवक्षा में प्रदेश शब्द से परमाणु ग्रहण करना चाहिए, न कि क्षेत्रप्रदेश । क्यो ? क्योकि पुद्गल का प्रचार लोक में ही है, अलोकाकाश में नही, इसलिए अनन्त क्षेत्र मे प्रदेशो का अभाव होने से क्षेत्रप्रदेश नही जानने । जैसे-जैसे परमाणु मिल जाते है, वैसे-वैसे प्रदेशो की वृद्धि जाननी । इसी दोहे के कथन मे पाठान्तर 'पुग्गलु तिविहु पएसु' ऐसा है इसका अर्थ यह है कि पुद्गल के सख्यात, असख्यात, अनन्तप्रदेश परमाणुओ के मेल मे जानने चाहिए अर्थात् एक परमाणु एकप्रदेश, बहुत परमाणु बहुप्रदेश । निश्चय नय से द्रव्यकर्म के अभाव से यह जीव अमूर्त है और मिथ्यात्व रागादिरूप भावकर्म संकल्प-विकल्प के अभाव से शुद्ध है, लोकाकाशप्रमाण असख्यात प्रदेशवाला है, ऐसा जो निज शुद्धात्मा है,वही वीतराग निर्विकल्प समाधिदशा मे साक्षात् उपादेय है ।।२४।।

अथ लोके यद्यपि व्यवहारेणैकक्षेत्रावगाहेन तिष्ठन्ति द्रव्याणि तथापि निश्चयेन सकरव्यतिकरपरिहारेण कृत्वा स्वकीयस्वकीयस्वरूप न त्यजन्तीति दर्शयति—

अब लोक मे यद्यपि व्यवहार नय से ये सब द्रव्य एकक्षेत्रावगाही है तथापि निश्चयनय से कोई द्रव्य किसी मे नही मिलता और कोई भी अपने-अपने स्वरूप को नही छोडता—सो बताते है—

**लोयागासु धरेवि जिय कहियइँ दव्वइँ जाइँ ।**
**एक्कहिँ मिलियइँ इत्थु जगि सगुणहिँ णिवसहिँ ताइँ ।।२५।।**

लोकाकाश धृत्वा जीव कथितानि द्रव्याणि यानि ।
एकत्वे मिलितानि अत्र जगति स्वगुणेषु निवसन्ति तानि ।।२५।।

लोयागासु इत्यादि । **लोयागासु** लोकाकाश कर्मतापन्नं **धरेवि** धृत्वा मर्यादीकृत्य **जिय** हे जीव अथवा लोकाकाशमाधारीकृत्वा ठियाइं आधेयरूपेण स्थितानि । कानि स्थितानि । **कहियइं दव्वइं जाइं** कथितानि जीवादिद्रव्याणि यानि । पुन. कथंभूतानि । **एक्कहिंमिलियइं** एकत्वे मिलितानि । **इत्थु जगि** अत्र जगति **सगुणहिं णिवसहिं** निश्चयनयेन स्वकीयगुणेषु निवसन्ति 'सगुणहिं' तृतीयान्तं करणपद स्वगुणेष्वधिकरण कथं जातमिति । ननु कथित पूर्वं प्राकृते कारकव्यभिचारो लिङ्गव्यभिचारश्च क्वचिद्भव-

**तीति** । कानि निवसन्ति । ताइं पूर्वोक्तानि जीवादिषड्द्रव्याणीति । तद्यथा । यद्यप्यु-पचरितासद्भूतव्यवहारेणाधाराधेयभावेनैकक्षेत्रावगाहेन तिष्ठन्ति तथापि शुद्धपारिणामिक-परमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन सकरव्यतिकरपरिहारेण स्वकीयस्वकीयसामान्य-विशेषशुद्धगुणान्न त्यजन्तीति । अत्राह **प्रभाकरभट्टः** । हे भगवन् लोकस्तावदसख्यातप्रदेश. परमागमे भणित तिष्ठति तत्रासख्यातप्रदेशलोके प्रत्येक प्रत्येकमसख्येयप्रदेशा-न्यनन्तजीवद्रव्याणि, तत्र चैकैके जीवद्रव्ये कर्मनोकर्मरूपेणानन्तानि पुद्गलपरमाणुद्रव्याणि च तिष्ठन्ति तेभ्योऽप्यनन्तगुणानि शेषपुद्गलद्रव्याणि तिष्ठन्ति तानि सर्वाण्यसख्येयप्रदेश-लोके कथमवकाशं लभन्ते इति पूर्वपक्ष । भगवान् परिहारमाह । अवगाहनशक्तियोगा-दिति । तथाहि । यथैकस्मिन् गूढनागरसगद्याणके शतसहस्रलक्षसुवर्णसख्याप्रमितान्यव-काश लभन्ते, अथवा यथैकस्मिन् प्रदीपप्रकाशे बहवोऽपि प्रदीपप्रकाशा अवकाश लभन्ते, अथवा यथैकस्मिन् भस्मघटे जलघट सम्यगवकाश लभते, अथवा यथैकस्मिन् भूमिगृहे बहवोऽपि पटहजयघण्टादिशब्दा सम्यगवकाश लभन्ते, तथैकस्मिन् लोके विशिष्टावगाह-नशक्तियोगात् पूर्वोक्तानन्तसख्या जीवपुद्गला अवकाश लभन्ते नास्ति विरोध इति । तथा चोक्त जीवानामवगाहनशक्तिस्वरूप परमागमे—"**एगणिगोदसरीरे जीवा दव्व-प्पमाणदो दिट्ठा । सिद्धेहिं अणंतगुणा सव्वेण वितीदकालेण** ।।" पुनस्तथोक्त पुद्गलानामवगाहनशक्तिस्वरूपम्—"**ओगाढगाढणिचिदो पुग्गलकाएहिं सव्वदो लोगो । सुहुमेहिं बादरेहिं य णंताणंतेहि विविहेहिं** ।।" । अयमत्र भावार्थ । यद्यप्येकावगाहेन तिष्ठन्ति तथापि शुद्धनिश्चयेन जीवा केवलज्ञानाद्यनन्तगुणस्वरूप न त्यजन्ति पुद्गलाश्च वर्णादिस्वरूप न त्यजन्ति शेषद्रव्याणि च स्वकीयस्वकीयस्वरूप न त्यजन्ति ।।२५।।

**जिय ! इत्थु जगि जाइँ दव्वइँ कहियइँ ताइँ लोयागासु धरेवि एक्कहिँ मिलियइँ सगुणहिँ णिवसहिँ ।।२५।।** हे जीव ! इस ससार मे जितने द्रव्य कहे गये है, वे सब लोकाकाश मे स्थित है, लोकाकाश आधार है और ये सब आधेय है। ये सब द्रव्य एक ही क्षेत्र मे मिले हुए रहते है एक-क्षेत्रावगाही है, तो भी निश्चय नय से अपने-अपने गुणो मे ही निवास करते है, एक दूसरे से मिलते नही है । **भावार्थ**—यद्यपि उपचरित असद्भूत व्यवहारनय की अपेक्षा आधार-आधेय भाव से एकक्षेत्राव-गाहरूप स्थित है तथापि शुद्ध पारिणामिक परमभावग्राहक शुद्ध द्रव्यार्थिक नय से पर द्रव्य से मिलने रूप सकरदोष से रहित है और अपने-अपने सामान्य गुण तथा विशेष गुणो को नही छोडते है । यहाँ प्रभाकरभट्ट ने **प्रश्न** किया कि हे भगवन् ! परमागम मे लोक को असख्यातप्रदेशी कहा गया है, उस असख्यातप्रदेशी लोक मे अनन्त जीव कैसे रह सकते है ? क्योकि एक-एक जीव के असख्यात-असख्यात प्रदेश है और एक-एक जीव मे अनन्तानन्त पुद्गल परमाणु कर्म-नोकर्म रूप से लग रहे है, इसके सिवाय अनन्तगुणे अन्य पुद्गल भी रहते है, सो ये सब द्रव्य असख्यातप्रदेशी लोक मे कैसे रह सकते है ? इसका **उत्तर** देते हैं - क्योकि आकाश मे अवकाश देने की शक्ति है, अत रह सकते हैं । जैसे एक गूढ नागरस गुटिका मे शतसहस्रलक्ष सुवर्ण सख्या आ जाती है, अथवा एक दीपक के प्रकाश मे बहुत

दीपकों का प्रकाश जगह पाता है, अथवा जैसे राख के एक घड़े में जल का एक घड़ा अच्छी तरह अवकाश पाता है, अथवा एक भूमिघर में ढोल घण्टा आदि बहुत बाजों का शब्द अच्छी तरह समा जाता है, उसी तरह एक लोकाकाश में विशिष्ट अवगाहन शक्ति के योग से अनन्तजीव और अनन्तानन्त पुद्गल अवकाश पाते हैं, इसमें विरोध नहीं है। जीवों की अवगाहन शक्ति का स्वरूप परमागम में इस प्रकार कहा है - "द्रव्य की अपेक्षा सिद्धराशि से और सम्पूर्ण अतीतकाल के समयों से अनन्तगुणे जीव एक निगोद शरीर में रहते हैं।" (गो. सा. जीवकाण्ड १९५) पुद्गलों की अवगाहनशक्ति का स्वरूप इस प्रकार है—"सब प्रकार सब जगह यह लोक पुद्गलकायों से अवगाढ़ गाढ भरा है। ये पुद्गलकाय अनन्त है, अनेक भेद वाले है, कोई सूक्ष्म हैं, कोई बादर हैं।" (पचास्तिकाय ६४)। भावार्थ यह है कि यद्यपि सब द्रव्य एकक्षेत्रावगाह रूप से रहते हैं तो भी शुद्ध निश्चय नय से जीव केवलज्ञानादि अनन्तगुणरूप अपने स्वभाव को नहीं छोड़ते हैं, पुद्गल द्रव्य अपने वर्णादि स्वरूप को नहीं छोड़ता है और धर्मादि अन्य द्रव्य भी अपने-अपने स्वरूप को नहीं छोड़ते है ॥२५॥

अथ जीवस्य व्यवहारेण शेषपञ्चद्रव्यकृतमुपकारं कथयति, तस्यैव जीवस्य निश्चयेन तान्येव दुःखकारणानि च कथयति—

अब कहते है कि व्यवहारनय से अन्य पाँच द्रव्य जीव का उपकार करते है और निश्चय नय की अपेक्षा वे ही जीव के दुःख के कारण है—

**एयइँ दव्वइँ देहियहँ णिय-णिय-कज्जु जणंति ।**
**चउ-गइ-दुक्ख सहंत जिय तेँ संसारु भमंति ॥२६॥**

एतानि द्रव्याणि देहिना निजनिजकार्यं जनयन्ति ।
चतुर्गतिदुःख सहमाना जीवा तेन संसार भ्रमन्ति ॥२६॥

एयइं इत्यादि । **एयइं** एतानि **दव्वइं** जीवादन्यद्रव्याणि **देहियहं** देहिना संसारिजीवानाम् । किं कुर्वन्ति । **णियणियकज्जु जणंति** निजनिजकार्यं जनयन्ति येन कारणेन निजनिजकार्यं जनयन्ति । **चउगइदुक्ख सहंत जिय** चतुर्गतिदुःख सहमानाः सन्तो जीवा. **तें संसारु भमंति** तेन कारणेन ससारं भ्रमन्तीति । तथा च । पुद्गलस्तावज्जीवस्य स्वसंवित्तिविलक्षणविभावपरिणामरतस्य व्यवहारेण शरीरवाङ्मनःप्राणापाननिष्पत्तिं करोति, धर्मद्रव्यं चोपचरितासद्भूतव्यवहारेण गतिसहकारित्वं करोति, तथैवाधर्मद्रव्य स्थितिसहकारित्व करोति, तेनैव व्यवहारनयेन आकाशद्रव्यमवकाशदानं ददाति, तथैव कालद्रव्यं च शुभाशुभपरिणामसहकारित्वं करोति । एवं पञ्चद्रव्याणामुपकारं लब्ध्वा जीवो निश्चयव्यवहाररत्नत्रयभावनाच्युतः सन् चतुर्गतिदुःखं सहत इति भावार्थः ॥२६॥

**एयइँ दव्वइँ देहियहँ णिय-णिय-कज्जु जणंति, तेँ चउ-गइ-दुक्ख सहंत जिय संसारु भमंति** ॥२६॥ ये द्रव्य जीवों के अपने-अपने कार्य को उत्पन्न करते हैं, इस कारण चारों गतियों के दुःख

सहते हुए जीव ससार मे भटकते है। अन्य जीवद्रव्य का क्या उपकार करते हैं ? पुद्गल तो आत्मज्ञान से विपरीत विभाव परिणामो में लीन हुए जीव के व्यवहारनय से शरीर, वचन, मन, श्वासोच्छ्वास उत्पन्न करता है। धर्मद्रव्य उपचरित असद्भूत व्यवहारनय की अपेक्षा गतिसहायी है। अधर्मद्रव्य स्थितिसहायी है, आकाशद्रव्य अवकाश प्रदान करता है और काल द्रव्य शुभाशुभ परिणामो का सहायी है। इस प्रकार इन पाँच द्रव्यो का उपकार पाकर जीव निश्चय-व्यवहार रत्नत्रय की भावना से च्युत होकर चारों गतियो के दुःख सहता है, यह भावार्थ है ॥२६॥

अथैव पञ्चद्रव्याणां स्वरूपं निश्चयेन दुःखकारणं ज्ञात्वा हे जीव निजशुद्धात्मोपलम्भलक्षणे मोक्षमार्गे स्थीयत इति निरूपयति—

अब कहते हैं कि इन पाँच द्रव्यो का साहाय्य निश्चय से दुःख का कारण है, ऐसा जान कर हे जीव ! शुद्धात्मा की प्राप्ति रूप मोक्षमार्ग मे स्थित हो—

**दुक्खहँ कारणु मुणिवि जिय दव्वहँ एहु सहाउ ।**
**होयवि मोक्खहँ मग्गि लहु गम्मिज्जइ पर-लोउ ॥२७॥**

दुःखस्य कारणं मत्वा जीवद्रव्याणां एतत्सहायम् ।
भूत्वा मोक्षस्य मार्गे लघु गम्यते परलोकः ॥२७॥

**दुक्खहं कारणु** दुःखस्य कारणं **मुणिवि** मत्वा ज्ञात्वा **जिय** हे जीव । किं दुःखस्य कारणं ज्ञात्वा **दव्वहं एहु सहाउ** द्रव्याणामिमं शरीरवाङ्मनःप्राणापाननिष्पत्त्यादिलक्षणं पूर्वोक्तस्वभावम् । एवं पुद्गलादिपञ्चद्रव्यस्वभावं दुःखस्य कारणं ज्ञात्वा । किं क्रियते । **होयवि** भूत्वा । क्व **मोक्खहं मग्गि** मोक्षस्य मार्गे **लहु** लघु शीघ्रं पश्चात् **गम्मिज्जइ** गम्यते । कः कर्मतापन्नः । **परलोउ** परलोको मोक्ष इति । तथाहि । वीतरागसदानन्दैकस्वाभाविकसुखविपरीतस्याकुलत्वोत्पादकस्य दुःखस्य कारणानि पुद्गलादिपञ्चद्रव्याणि ज्ञात्वा हे जीव भेदाभेदरत्नत्रयलक्षणे मोक्षस्य मार्गे स्थित्वा परः परमात्मा तस्यावलोकनमनुभवनं परमसमरसीभावेन परिणमनं परलोको मोक्षस्तत्र गम्यत इति भावार्थः ॥२७॥

**जिय ! दव्वहं एहु सहाउ दुक्खहं कारणु मुणिवि मोक्खहं मग्गि होयवि लहु पर-लोउ गम्मिज्जइ** ॥२७॥ हे जीव ! द्रव्यो के इस सहाय को दुःख का कारण जान कर मोक्षमार्ग में लग कर शीघ्र ही उत्कृष्ट लोकरूप मोक्ष मे जाना चाहिए। **भावार्थ**-पूर्वोक्त पुद्गलादि द्रव्यो के उपकार शरीर, वचन, मन, श्वासोच्छ्वास आदि ये सब दुःख के कारण है क्योंकि वीतराग सदानन्द रूप स्वभाव से उत्पन्न जो अतीन्द्रिय सुख, उससे विपरीत आकुलता के उपजाने वाले है, ऐसा जान कर हे जीव ! तू भेदाभेद रत्नत्रयस्वरूप मोक्षमार्ग में प्रवृत्ति कर, परमात्मा का अनुभव परमसमरसीभाव से परिणमनरूप मोक्ष, उसमें गमन कर ॥२७॥

**अथेदं व्यवहारेण मया भणितं जीवद्रव्यादिश्रद्धानरूपं सम्यग्दर्शनमिदानीं सम्यग्ज्ञानं चारित्रं च हे प्रभाकरभट्ट शृणु त्वमिति मनसि धृत्वा सूत्रमिदं प्रतिपादयति–**

अब तक व्यवहारनय से मैंने जीवद्रव्यादि के श्रद्धानरूप सम्यग्दर्शन के सम्बन्ध में कहा है, अब हे प्रभाकरभट्ट ! तू सम्यग्ज्ञान और सम्यक्चारित्र के विषय में सुन, ऐसा मन मे रख कर यह दोहा सूत्र कहते हैं—

**णियमें कहियउ एहु मइँ ववहारेण वि दिट्ठि ।**
**एवहिँ णाणु चरित्तु सुणि जें पावहि परमेट्ठि ।।२८।।**

नियमेन कथिता एषा मया व्यवहारेणापि दृष्टिः ।
इदानी ज्ञान चारित्र शृणु येन प्राप्नोषि परमेष्ठिनम् ।।२८।।

**णियमें** नियमेन निश्चयेन **कहियउ** कथिता **एहु मइं** एषा कर्मतापन्ना मया । केनैव । **ववहारेण वि** व्यवहारनयेनैव । एषा का । **दिट्ठि** दृष्टिः । दृष्टिः कोऽर्थः, सम्यक्त्वम् । **एवहिं** इदानी **णाणु चरित्तु सुणि** हे **प्रभाकरभट्ट** क्रमेण ज्ञानचारित्रद्वय शृणु । येन श्रुतेन किं भवति । **जें पावहि** येन सम्यग्ज्ञानचारित्रद्वयेन प्राप्नोषि । किं प्राप्नोषि । **परमेट्ठि** परमेष्ठिपद मुक्तिपदमिति । अतो व्यवहारसम्यक्त्वविषयभूतानां द्रव्याणा चूलिकारूपेण व्याख्यान क्रियते । तद्यथा । **"परिणाम जीव मुत्तं संपदेसं एय खित्त किरिया य । णिच्चं कारण कत्ता सव्वगदं इदरम्हि य पवेसो ।"** परिणाम इत्यादि । 'परिणाम' परिणामिनौ जीवपुद्गलौ स्वभावविभावपरिणामाभ्यां शेषचत्वारि द्रव्याणि जीवपुद्गलवद्विभावव्यञ्जनपर्यायाभावात् मुख्यवृत्त्या पुनरपरिणामीनि इति । 'जीव' शुद्धनिश्चयनयेन विशुद्धज्ञानदर्शनस्वभाव शुद्धचैतन्यं प्राणशब्देनोच्यते तेन जीवतीति जीवः, व्यवहारनयेन पुनः कर्मोदयजनितद्रव्यभावरूपैश्चतुर्भि. प्राणैर्जीवति जीविष्यति जीवितपूर्वो वा जीवः पुद्गलादिपञ्चद्रव्याणि पुनरजीवरूपाणि । 'मुत्तं' अमूर्तशुद्धात्मनो विलक्षणो स्पर्शरसगन्धवर्णवती मूर्तिरुच्यते तद्भावान्मूर्तः पुद्गलः । जीवद्रव्यं पुनरनुपचरितासद्भूतव्यवहारेण मूर्तमपि शुद्धनिश्चयनयेनामूर्तम् । धर्माधर्माकाशकालद्रव्याणि चामूर्तानि ।

'सपदेसं' लोकमात्रप्रमितासंख्येयप्रदेशलक्षणं जीवद्रव्यमादिं कृत्वा पञ्चद्रव्याणि पञ्चास्तिकायसंज्ञानि सप्रदेशानि कालद्रव्यं पुनर्बहुप्रदेशलक्षणकायत्वाभावादप्रदेशम् । 'एय' द्रव्यार्थिकनयेन धर्माधर्माकाशद्रव्याण्येकानि भवन्ति जीवपुद्गलकालद्रव्याणि पुनरनेकानि भवन्ति । 'खेत्त' सर्वद्रव्याणामवकाशदानसामर्थ्यात् क्षेत्रमाकाशमेक शेषपञ्चद्रव्याण्यक्षेत्राणि । 'किरिया य' क्षेत्रात्क्षेत्रान्तरगमनरूपा परिस्पन्दवती चलनवती

**क्रिया सा विद्यते ययोस्तौ क्रियावन्तौ** जीवपुद्गलौ धर्माधर्माकाशकालद्रव्याणि पुनर्निष्क्रियाणि । 'णिच्च' धर्माधर्माकाशकालद्रव्याणि यद्यप्यर्थपर्यायत्वेनानित्यानि तथापि **मुख्यवृत्त्या विभावव्यञ्जनपर्यायाभावात्** नित्यानि, द्रव्यार्थिकनयेन च जीवपुद्गलद्रव्ये पुनर्यद्यपि **द्रव्यार्थिकनयापेक्षया नित्ये** तथाप्यगुरुलघुपरिणतिरूपस्वभावपर्यायापेक्षया विभावव्यञ्जनपर्यायापेक्षया चानित्ये । 'कारण' पुद्गलधर्माधर्माकाशकालद्रव्याणि व्यवहारनयेन **जीवस्य** शरीरवाङ्मनःप्राणापानादिगतिस्थित्यवगाहवर्तनाकार्याणि कुर्वन्ति इति कारणानि भवन्ति, जीवद्रव्यं पुनर्यद्यपि गुरुशिष्यादिरूपेण परस्परोपग्रहं करोति तथापि पुद्गलादिपञ्चद्रव्याणां किमपि न करोतीत्यकारणम् ।

'कत्ता' शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन यद्यपि बन्धमोक्षद्रव्यभावरूपः पुण्यपापघटपटादीनामकर्ता जीवस्तथाप्यशुद्धनिश्चयेन शुभाशुभोपयोगाभ्यां परिणतः सन् पुण्यपापबन्धयोः कर्ता तत्फलभोक्ता च भवति विशुद्धज्ञानदर्शनस्वभावनिजशुद्धात्मद्रव्यसम्यक्श्रद्धानज्ञानानुष्ठानरूपेण शुद्धोपयोगेन तत्परिणतः सन् मोक्षस्यापि कर्ता तत्फलभोक्ता च । शुभाशुभशुद्धपरिणामानां परिणमनमेव कर्तृत्वं सर्वत्र ज्ञातव्यमिति । पुद्गलादिपञ्चद्रव्याणां च स्वकीयस्वकीयपरिणामेन परिणमनमेव कर्तृत्वम् । वस्तुवृत्त्या पुनः पुण्यपापादिरूपेणाकर्तृत्वमेव । 'सव्वगद' लोकालोकव्याप्त्यपेक्षया सर्वगतमाकाशं भण्यते धर्माधर्मौ च लोकव्याप्त्यपेक्षया जीवद्रव्यं तु पुनरेकैकजीवापेक्षया लोकपूरणावस्थां विहायासर्वगतं नानाजीवापेक्षया सर्वगतमेव भवतीति । पुद्गलद्रव्यं पुनर्लोकरूपमहास्कन्धापेक्षया सर्वगतं शेषपुद्गलापेक्षया सर्वगतं न भवतीति । कालद्रव्यं पुनरेककालाणुद्रव्यापेक्षया सर्वगतं न भवति लोकप्रदेशप्रमाणनानाकालाणुविवक्षया लोके सर्वगतं भवति । 'इदरम्हि य पवेसो' यद्यपि सर्वद्रव्याणि व्यवहारेणैकक्षेत्रावगाहेनान्योन्यानुप्रवेशेन तिष्ठन्ति तथापि निश्चयनयेन चेतनादिस्वकीयस्वकीयस्वरूपं न त्यजन्तीति । तथा चोक्तम्—**"अण्णोण्णं पविसंता दिंता ओगासमण्णमण्णस्स । मेलंता वि य णिच्चं सगसब्भावं ण विजहंति ।।"** इदमत्र तात्पर्यम् । व्यवहारसम्यक्त्वविषयभूतेषु षड्द्रव्येषु मध्ये वीतरागचिदानन्दैकादिगुणस्वभावं शुभाशुभमनोवचनकायव्यापाररहितं निजशुद्धात्मद्रव्यमेवोपादेयम् ।।२८।। एवमेकोनविंशतिसूत्रप्रमितस्थले निश्चयव्यवहारमोक्षमार्गप्रतिपादकत्वेन पूर्वसूत्रत्रयं गतम् । इदं पुनरन्तरस्थलं चतुर्दशसूत्रप्रमितं षड्द्रव्यध्येयभूतव्यवहारसम्यक्त्वव्याख्यानमुख्यत्वेन समाप्तमिति ।

**मइँ ववहारेण वि एहु दिट्ठि णियमेँ कहियउ, एवहिँ णाणु चरित्तु सुणि जेँ परमेट्ठि पावहि** ।।२८।। हे प्रभाकरभट्ट ! मैंने व्यवहारनय से तुझे सम्यग्दर्शन का स्वरूप कहा, अब तू ज्ञान और

चारित्र के सम्बन्ध में सुन, जिनको धारण करने से सिद्ध परमेष्ठी का पद प्राप्त करेगा। **भावार्थ**-यहाँ व्यवहार सम्यक्त्व के कारणभूत द्रव्यों का चूलिकारूप व्याख्यान करते हैं—"परिणाम जीवमुत्तं" गाथा का अर्थ है—इन छह द्रव्यों मे विभाव परिणमन करने वाले जीव और पुद्गल दो ही हैं, अन्य चार द्रव्य अपने स्वभावरूप तो परिणमते है लेकिन जीव पुद्गल की तरह विभाव व्यजन पर्याय के अभाव से विभावपरिणमन नही है, इसलिए मुख्यता से परिणामी दो द्रव्य ही हैं। शुद्धनिश्चयनय से शुद्ध ज्ञानदर्शन स्वभाव जो शुद्ध चैतन्य प्राण उनसे जीता है, जीवेगा, पहले जी रहा था और व्यवहारनय से इन्द्रिय, बल, आयु, श्वासोच्छ्वासरूप द्रव्य प्राणों से जी रहा है, जीवेगा, पहले जी रहा था, इसलिए जीव को ही **जीव** कहा गया है, अन्य पुद्गलादि पाँच द्रव्य अजीव है। स्पर्श, रस, गन्ध, वर्णवाली मूर्ति सहित मूर्तिक एक **पुद्गलद्रव्य** ही है, अन्य पाँच द्रव्य अमूर्त्त हैं। धर्म, अधर्म, आकाश और काल ये चारो तो अमूर्त्त है ही, जीवद्रव्य अनुपचरित असद्भूतव्यवहारनय की अपेक्षा मूर्त्त भी कहा जाता है क्योकि शरीर धारण कर रहा है, तो भी शुद्ध निश्चयनय से अमूर्त्त ही है।

लोकप्रमाण असख्यातप्रदेशी जीवद्रव्य को आदि लेकर पाँच द्रव्य पचास्तिकाय है, वे सप्रदेशी है और कालद्रव्य बहुप्रदेश स्वभावकायपना न होने से अप्रदेशी है। धर्म, अधर्म और आकाशद्रव्य एक-एक है और जीव, पुद्गल, काल ये तीनो अनेक है। जीव तो अनन्त है, पुद्गल अनन्तानन्त है, काल असख्यात है, सब द्रव्यो को अवकाश देने मे समर्थ एक आकाश ही है, इसलिए आकाश क्षेत्र कहा गया है, बाकी पाँच द्रव्य अक्षेत्री है, एक क्षेत्र से दूसरे क्षेत्र मे गमन करना, यह हलन-चलनवती क्रिया कही गई है, यह क्रिया जीव और पुद्गल दोनो के ही है और धर्म-अधर्म-आकाश-काल ये चार द्रव्य निष्क्रिय है। जीवो मे भी ससारी जीव ही हलन-चलन वाले हैं, इसलिए क्रियावन्त है और सिद्ध परमेष्ठी निष्क्रिय है, उनके हलन-चलन क्रिया नही है। द्रव्यार्थिक नय की अपेक्षा सभी द्रव्य नित्य है, अर्थपर्याय जो षट्गुणी हानिवृद्धिरूप स्वभावपर्याय है, उसकी अपेक्षा सभी अनित्य है, तो भी विभावव्यञ्जनपर्याय जीव और पुद्गल इन दो को ही है अत इनको ही अनित्य कहा है, अन्य चार द्रव्य विभाव के अभाव से नित्य ही है। इस कारण यह निश्चय से जानना कि चार नित्य है, दो अनित्य है तथा द्रव्य मे सभी नित्य है, कोई भी द्रव्य नाशवान् नही है। जीव को पाँचो ही द्रव्य सहायक है, पुद्गल तो शरीरादिक का कारण है, धर्म द्रव्य और अधर्म द्रव्य गति-स्थिति मे सहायक है, आकाश द्रव्य अवकाश मे सहायक है और काल वर्तना का सहायी है। ये पाँचो द्रव्य जीव के सहायक है, जीव उनको सहायक नही है। यद्यपि जीवद्रव्य अन्य जीवो को गुरु शिष्यादिरूप परस्पर उपकार करता है तो भी पुद्गलादि पाँचो द्रव्यो का सहायी नही है और ये पाँचो उसके सहायक है।

शुद्ध पारिणामिक परमभावग्राहक शुद्ध द्रव्यार्थिक नय की अपेक्षा यह जीव यद्यपि बन्ध, मोक्ष, पुण्य, पाप का कर्त्ता नही है तो भी अशुद्धनिश्चय नय से शुभ-अशुभ उपयोगों से परिणत हुआ पुण्य-पाप के बन्ध का कर्ता होता है और उनके फल का भोक्ता होता है तथा विशुद्ध ज्ञानदर्शनरूप निज शुद्धात्म द्रव्य के श्रद्धान-ज्ञान-आचरण रूप शुद्धोपयोग से परिणत हुआ मोक्ष का भी कर्त्ता होता है और अनन्त सुख का भोक्ता होता है। इसलिए जीव को कर्त्ता भी कहा जाता है और भोक्ता भी कहा जाता है। शुभ-अशुभ-शुद्ध परिणमन ही सब जगह कर्तापना है और पुद्गलादि पाँच द्रव्यो को अपने-अपने परिणाम रूप जो परिणमन वही कर्त्तापना है, पुण्य-पापादिक का कर्त्तापना नही है। सर्वगतपना लोकालोकव्यापकता की अपेक्षा आकाश ही में है, धर्म द्रव्य और अधर्म द्रव्य ये दोनो

**लोकाकाशव्यापी हैं, अलोक में** नहीं है और जीवद्रव्य में एक जीव की अपेक्षा केवलीसमुद्घात में **लोकपूरण अवस्था में लोक में सर्वगतपना है** तथा नाना जीव की अपेक्षा सर्वगतपना नही है। पुद्गल **द्रव्य लोकप्रमाण महास्कन्ध की अपेक्षा** सर्वगत है, अन्य पुद्गल की अपेक्षा सर्वगत नही है। काल-**द्रव्य एक कालाणु की अपेक्षा** तो एक प्रदेशगत है, सर्वगत नही है और नाना कालाणुओ की अपेक्षा **लोकाकाश के सब प्रदेशो मे** कालाणु है, इसलिए सब कालाणुओ की अपेक्षा सर्वगत कह सकते हैं। **इस नयविवक्षा** से सर्वगतपने का कथन किया। मुख्यवृत्ति से विचार किया जावे तो सर्वगतपना **आकाश में ही है**। अथवा ज्ञान की अपेक्षा जीव में भी है। जीव का केवलज्ञान लोकालोकव्यापक है, **इसलिए** उसे सर्वगत कहा। ये सब द्रव्य यद्यपि व्यवहारनय की अपेक्षा एकक्षेत्रावगाही रहते है तो भी निश्चय नय की अपेक्षा अपने-अपने स्वभाव को नही छोडते। **श्री पंचास्तिकाय** मे कहा भी है— "यद्यपि ये छहो द्रव्य परस्पर प्रवेश करते हुए देखे जाते है तो भी कोई किसी में प्रवेश नही करता, यद्यपि अन्य को अन्य अवकाश देता है तो भी अपना-अपना अवकाश आपमे ही है, पर मे नही है। यद्यपि ये द्रव्य हमेशा से मिल रहे हैं तो भी अपने स्वभाव को नही छोडते। **तात्पर्य** यह है कि व्यवहार सम्यक्त्व के कारण छह द्रव्यो मे वीतराग चिदानन्द अनन्तगुणरूप जो शुद्धात्मा है, वह शुभ-अशुभ मन, वचन, काय के व्यापार से रहित हुआ ध्यान करने योग्य है ॥२८॥

इस प्रकार उन्नीस दोहो प्रमाण स्थल मे निश्चय-व्यवहार मोक्षमार्ग के प्रतिपादन की मुख्यता से तीन दोहे कहे। फिर चौदह दोहो तक व्यवहार सम्यक्त्व का कथन किया जिसमे छह द्रव्यो का श्रद्धान मुख्य है।

अथ सशयविपर्ययानध्यवसायरहित सम्यग्ज्ञान प्रकटयति—

अब सशय, विपर्यय, अनध्यवसायरहित सम्यग्ज्ञान का स्वरूप कहते हैं—

**जं जह थक्कउ दव्वु जिय तं तह जाणइ जो जि।**
**अप्पहं केरउ भावडउ णाणु मुणिज्जहि सो जि ॥२९॥**

यद् यथा स्थित द्रव्य जीव तत् तथा जानाति य एव।
आत्मन सबन्धी भाव ज्ञान मन्यस्व स एव ॥२९॥

ज इत्यादि। **जं** यत् **जह** यथा **थक्कउ** स्थित **दव्वु** द्रव्य **जिय** हे जीव **तं** तत् **तह** तथा **जाणइ** जानाति **जो जि** य एव। य एव क। **अप्पहं केरउ भावडउ** आत्मन. सबन्धी भाव. परिणाम. **णाणु मुणिज्जहि** ज्ञानं मन्यस्व जानीहि **सो जि** स एव पूर्वोक्त आत्मपरिणाम इति। तथा च यद् द्रव्य यथा स्थित सत्तालक्षण उत्पादव्यय-ध्रौव्यलक्षण वा गुणपर्यायलक्षण वा सप्तभङ्ग्यात्मक वा तत् तथा जानाति य आत्म-सबन्धी स्वपरपरिच्छेदको भाव परिणामस्तत् सम्यग्ज्ञान भवति। अयमत्र भावार्थ। व्यवहारेण सविकल्पावस्थाया तत्त्वविचारकाले स्वपरपरिच्छेदक ज्ञान भण्यते। निश्चय-नयेन पुनर्वीतरागनिर्विकल्पसमाधिकाले बहिरुपयोगो यद्यप्यनीहितवृत्त्या निरस्तस्तथापीहा-पूर्वकविकल्पाभावाद्गौणत्वमितिकृत्वा स्वसंवेदनज्ञानमेव ज्ञानमुच्यते ॥२९॥

**जिय ! जं जह थक्कउ तं तह जो जि जाणइ सो जि अप्पहं केरउ भावडउ णाणु मुणिज्जहि ॥२९॥** हे जीव ! जो ये द्रव्य जिस तरह (अनादिकाल से) विद्यमान हैं, जैसा इनका स्वरूप है, उनको वैसा ही सशयादि रहित जो जानता है, वही आत्मा का निजस्वरूप सम्यग्ज्ञान है, ऐसा मानो । जो द्रव्य है, वह सत्ता लक्षण वाला है, उत्पादव्यय ध्रौव्य रूप है, सभी द्रव्य गुणपर्याय को धारण करते है, गुणपर्याय के बिना कोई नही है । सभी द्रव्य सप्तभङ्गी स्वरूप है, ऐसा द्रव्यो का स्वरूप जो निःसन्देह जाने, आप और पर को पहचाने, ऐसा जो आत्मा का भाव—वह सम्यग्ज्ञान है । **भावार्थ** यह है कि व्यवहार नय से सविकल्प अवस्था में तत्त्व के विचार के समय स्व और पर का जानपना ज्ञान कहा है और निश्चय नय से वीतराग निर्विकल्प समाधि समय पदार्थों का ज्ञान-पना मुख्य नही लिया, केवल स्वसवेदनज्ञान ही निश्चय सम्यग्ज्ञान है । व्यवहारसम्यग्ज्ञान तो परम्परा से मोक्ष का कारण है और निश्चय सम्यग्ज्ञान साक्षात् मोक्ष का कारण है ॥२९॥

**अथ** स्वपरद्रव्य ज्ञात्वा रागादिरूपपरद्रव्यविषयसंकल्पविकल्पत्यागेन स्वस्वरूपे अवस्थान ज्ञानिना चारित्रमिति प्रतिपादयति—

अब कहते है कि स्व-पर द्रव्य को जान कर रागादिरूप जो परद्रव्य में सकल्प-विकल्प है, उनके त्याग से जो निजस्वरूप में निश्चलता होनी है, वही ज्ञानी जीवों के सम्यक्चारित्र है –

**जाणवि मण्णवि अप्पु परु जो पर-भाउ चएइ ।**
**सो णिउ सुद्धउ भावडउ णाणिहिं चरणु हवेइ ॥३०॥**

ज्ञात्वा मत्वा आत्मान पर य. परभाव त्यजति ।
स निज शुद्ध भाव ज्ञानिना चरण भवति ॥३०॥

जाणवि इत्यादि । **जाणवि** सम्यग्ज्ञानेन ज्ञात्वा न केवलं ज्ञात्वा **मण्णवि** तत्त्वार्थ-श्रद्धानलक्षणपरिणामेन मत्वा श्रद्धाय । कम् । **अप्पु परु** आत्मानं च पर च **जो** य· कर्ता **परभाउ** परभावं **चएइ** त्यजति **सो** स पूर्वोक्त· **णिउ** निजः **सुद्धउ भावडउ** शुद्धो भावो **णाणिहिं चरणु हवेइ** ज्ञानिनां पुरुषाणां चरण भवतीति । तद्यथा । वीतरागसह-जानन्दैकस्वभाव स्वद्रव्य तद्विपरीत परद्रव्य च सशयविपर्ययानध्यवसायरहितेन ज्ञानेन पूर्व ज्ञात्वा शङ्कादिदोषरहितेन सम्यक्त्वपरिणामेन श्रद्धाय च यः कर्ता मायामिथ्यानि-दानशल्यप्रभृतिसमस्तचिन्ताजालत्यागेन निजशुद्धात्मस्वरूपे परमानन्दसुखरसास्वादतृप्तो भूत्वा तिष्ठति स पुरुष एवाभेदेन निश्चयचारित्र भवतीति भावार्थः ॥३०॥ एवं मोक्ष-मोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये निश्चयव्यवहारमोक्षमार्गमुख्यत्वेन सूत्रत्रयं षड्द्रव्यश्रद्धानलक्षणव्यवहारसम्यक्त्वव्याख्यानमुख्यत्वेन सूत्राणि चतुर्दश, सम्यग्-ज्ञानचारित्रमुख्यत्वेन सूत्रद्वयमिति समुदायेनैकोनविंशतिसूत्रस्थल समाप्तम् ।

**अप्पु परु जाणवि मण्णवि जो परभाउ चएइ सो णिउ सुद्धउ भावडउ णाणिहिं चरणु हवेइ ॥३०॥** सम्यग्ज्ञान से अपने आपको और पर को जान कर तथा तत्त्वार्थश्रद्धान लक्षण परिणाम

**से स्व-पर की प्रतीति करके** जो परभाव का त्याग करता है, वह निजशुद्ध भाव ज्ञानी पुरुषों के चारित्र होता है। **भावार्थ**—वीतराग सहजानन्द अद्वितीय स्वभाव जो आत्मद्रव्य उससे विपरीत पुद्गलादि पर-द्रव्यों को सम्यग्ज्ञान से पहले तो जाने, वह सम्यग्ज्ञान संशय, विमोह और विभ्रम इन तीनों से रहित है। शंकादि दोषों से रहित जो सम्यग्दर्शन है, उससे स्व और पर की श्रद्धा करे, जान कर अच्छी तरह प्रतीति करे और माया मिथ्या निदान इन तीन शल्यों सहित समस्त चिन्ता-समूह के त्याग से निजशुद्धात्मस्वरूप में तिष्ठे है, वह परम आनन्द अतीन्द्रिय सुखरस के आस्वाद से तृप्त हुआ पुरुष ही अभेदनय से निश्चय चारित्र है ॥३०॥

इसप्रकार मोक्ष, मोक्ष का फल, मोक्षमार्ग आदि के प्रतिपादक दूसरे महाधिकार में निश्चय-व्यवहार मोक्षमार्ग की मुख्यता से तीन दोहा में व्याख्यान किया, चौदह दोहों में छह द्रव्यों की श्रद्धारूप व्यवहार सम्यक्त्व का व्याख्यान किया तथा दो दोहों में सम्यग्ज्ञान और सम्यक्चारित्र का वर्णन किया। इसप्रकार उन्नीस दोहों प्रमाण स्थल पूर्ण हुआ।

अथानन्तरमभेदरत्नत्रयव्याख्यानमुख्यत्वेन सूत्राष्टकं कथ्यते, तत्रादौ तावत् रत्न-त्रयभक्तभव्यजीवस्य लक्षणं प्रतिपादयति—

अब अभेदरत्नत्रय के व्याख्यान की मुख्यता से आठ दोहासूत्र कहते हैं। उनमें पहले रत्नत्रय के भक्त भव्य जीव का लक्षण कहते हैं—

**जो भत्तउ रयण-त्तयहँ तसु मुणि लक्खणु एउ।**
**अप्पा मिल्लिवि गुण-णिलउ तासु वि अण्णु ण झेउ ॥३१॥**

यः भक्तः रत्नत्रयस्य तस्य मन्यस्व लक्षणं एतत्।
आत्मानं मुक्त्वा गुणनिलयं तस्यापि अन्यत् न ध्येयम् ॥३१॥

जो इत्यादि। **जो** यः **भत्तउ** भक्तः। कस्य। **रयणत्तयहँ** रत्नत्रयसंयुक्तस्य **तसु** तस्य जीवस्य **मुणि** मन्यस्व जानीहि **हे प्रभाकरभट्ट**। किं जानीहि। **लक्खणु** लक्षणं **एउ** इदमग्रे वक्ष्यमाणम्। इदं किम्। **अप्पा मिल्लिवि** आत्मानं मुक्त्वा। किं विशिष्टम्। **गुणणिलउ** गुणनिलयं गुणगृहं **तासु वि** तस्यैव जीवस्य **अण्णु ण झेउ** निश्चयेनान्यत् बहिर्द्रव्यं ध्येयं न भवतीति। तथाहि। व्यवहारेण वीतरागसर्वज्ञप्रणीतशुद्धात्मतत्त्व-प्रभृतिषड्द्रव्यपञ्चास्तिकायसप्ततत्त्वनवपदार्थविषये सम्यक् श्रद्धानज्ञानाहिंसादिव्रतशील-परिपालनरूपस्य भेदरत्नत्रयस्य निश्चयेन वीतरागसदानन्दैकरूपसुखसुधारसास्वाद-परिणतनिजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणरूपस्याभेदरत्नत्रयस्य च योऽसौ भक्त-स्तस्येदं लक्षणं जानीहि। इदं किम्। यद्यपि व्यवहारेण सविकल्पावस्थायां चित्तस्थिति-करणार्थं देवेन्द्रचक्रवर्त्यादिविभूतिविशेषकारणं परंपरया शुद्धात्मप्राप्तिहेतुभूतं पञ्च-परमेष्ठिरूपस्तववस्तुस्तवगुणस्तवादिकं वचनेन स्तुत्यं भवति मनसा च तदक्षररूपादिकं

प्राथमिकानां ध्येयं भवति, तथापि पूर्वोक्तनिश्चयरत्नत्रयपरिणतिकाले केवलज्ञानाद्यनन्त-गुणपरिणतः स्वशुद्धात्मैव ध्येय इति । अत्रेदं तात्पर्यम् । योऽसावनन्तज्ञानादिगुणः शुद्धात्मा ध्येयो भणितः स एव निश्चयेनोपादेय इति ॥३१॥

**जो रयणत्तयहँ भत्तउ तसु एउ लक्खणु मुणि । गुणणिलउ अप्पा मिल्लिवि तासु वि अण्णु ण झेउ ॥३१॥** जो जीव रत्नत्रय का भक्त है, उसका यह लक्षण जानना । हे प्रभाकरभट्ट ! रत्नत्रय-धारक का यह लक्षण है—गुणो के समूह आत्मा को छोडकर आत्मा से अन्य बाह्य द्रव्य को न ध्यावे । निश्चयनय से एक आत्मा ही ध्यान करने योग्य है, अन्य नही । व्यवहारनय से वीतरागसर्वज्ञ–कथित शुद्धात्मतत्त्व आदि छह द्रव्य पाँच अस्तिकाय सात तत्त्व, नौ पदार्थ का श्रद्धान जानने योग्य है और हिंसादि पाप त्याग करने योग्य है, व्रतशीलादि पालने योग्य है, ये लक्षण व्यवहार रत्नत्रय के है या भेद रत्नत्रय के है, वीतराग सदा आनन्दरूप जो निजशुद्धात्मा आत्मीक सुखरूप सुधारस के आस्वाद मे परिणत हुआ, उसका सम्यक् श्रद्धान, ज्ञान, आचरणरूप अभेदरत्नत्रय है, उसका जो भक्त-आराधक है, उसके ये लक्षण जानो । यद्यपि व्यवहार नय से सविकल्प अवस्था में चित्त को स्थिर करने के लिए पचपरमेष्ठी का स्तवन करता है, जो देवेन्द्र चक्रवर्ती आदि विभूति का कारण है और परम्परा से शुद्धात्मतत्त्व की प्राप्ति का कारण है, अत प्रथम अवस्था मे भव्य जीवो को पच-परमेष्ठी का ध्यान करना योग्य है, उनके आत्मा का स्तवन, गुणों की स्तुति, वचन से अनेक तरह की स्तुति करनी और मनमे उनके नाम के अक्षर तथा उनका रूपादिक ध्यान करने योग्य है तो भी पूर्वोक्त निश्चय रत्नत्रय की प्राप्ति के समय केवलज्ञानादि अनन्तगुण रूप परिणत जो निजशुद्धात्मा है, वही आराधने योग्य है, अन्य नही । प्रथम अवस्था मे पंचपरमेष्ठी का ध्यान करना योग्य है और निर्विकल्पदशा मे निजस्वरूप ही ध्यान करने योग्य है, वही उपादेय है ॥३१॥

अथ ये ज्ञानिनो निर्मलरत्नत्रयमेवात्मानं मन्यन्ते शिवशब्दवाच्यं ते मोक्षपदा-राधकाः सन्तो निजात्मानं ध्यायन्तीति निरूपयति—

अब कहते है कि जो ज्ञानी निर्मल रत्नत्रय को ही आत्मस्वरूप मानते है, वे शिवशब्द से वाच्य मोक्षपद के आराधक हुए निज आत्मा का ध्यान करते है—

**जे रयण-त्तउ णिम्मलउ णाणिय अप्पु भणंति ।**
**ते आराहय सिव-पयहँ णिय-अप्पा झायंति ॥३२॥**

ये रत्नत्रयं निर्मलं ज्ञानिनः आत्मानं भणन्ति ।
ते आराधकाः शिवपदस्य निजात्मानं ध्यायन्ति ॥३२॥

**जे** इत्यादि । ये केचन **रयणत्तउ** रत्नत्रयम् । कथंभूतम् । **णिम्मलउ** निर्मलं रागादिदोषरहितम् । कथंभूता ये । **णाणिय** ज्ञानिनः । किं कुर्वन्ति । **अप्पु** पूर्वोक्त-रत्नत्रयस्वरूपमेवात्मानं, आत्मस्वरूपं कर्मतापन्नं **भणंति** मन्यन्ते **ते आराहय** ते पूर्वोक्ताः पुरुषाः आराधकाः भवन्ति । कस्य । **सिवपयहं** शिवपदस्य शिवशब्दवाच्यमोक्षस्य ।

**मोक्षपदाराधकाः** सन्त किं कुर्वन्ति । **णियअप्पा झायंति** निजात्मानं कर्मतापन्नं ध्यायन्ति इति । तथा च ये केचन वीतरागस्वसंवेदनज्ञानिनः परमात्मानं सम्यक्श्रद्धान-ज्ञानानुष्ठानलक्षणं निश्चयरत्नत्रयमेवाभेदनयेन निजशुद्धात्मानं मन्यन्ते ते शिवशब्दवाच्य-**मोक्षपदाराधका** भवन्ति । आराधका सन्त किं ध्यायन्ति । विशुद्धज्ञानदर्शनं स्व-शुद्धात्मस्वरूपं निश्चयनयेन ध्यायन्ति भावयन्तीत्यभिप्रायः ।।३२।।

**जे णाणिय णिम्मलउ रयणत्तउ अप्पु मणंति, ते सिव पयहँ आराहय णिय अप्पा झायंति ।।३२।।** जो ज्ञानी रागादि दोष रहित निर्मल रत्नत्रय को आत्मा कहते है, वे शिवपद के आराधक है, वे अपनी आत्मा का ध्यान करते हैं। **भावार्थ**-जो कोई वीतरागस्वसंवेदन ज्ञानी सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र लक्षण वाले निश्चय रत्नत्रय को यानी अभेदनय से अपनी शुद्धात्मा को परमात्मा मानते हैं, वे शिवशब्द से वाच्य मोक्षपद के आराधक होते है । आराधक होकर वे निश्चय नय से विशुद्धज्ञानदर्शनरूप स्वशुद्धात्मा का ही ध्यान करते है, उसी की भावना करते हैं, यह अभिप्राय है ।।३२।।

अथात्मानं गुणस्वरूपं रागादिदोषरहितं ये ध्यायन्ति ते शीघ्रं नियमेन मोक्षं लभन्त इति प्रकटयति—

**अब** कहते है कि जो अनन्त गुणरूप रागादिदोषरहित निज आत्मा का ध्यान करते है, वे निश्चय से शीघ्र ही मोक्ष प्राप्त करते है—

**अप्पा गुणमउ णिम्मलउ अणुदिणु जे झायंति ।**
**ते पर णियमें परम-मुणि लहु णिव्वाणु लहंति ।।३३।।**

आत्मानं गुणमयं निर्मलं अनुदिनं ये ध्यायन्ति ।
ते परं नियमेन परममुनयः लघु निर्वाणं लभन्ते ।।३३।।

अप्पा इत्यादि । **अप्पा** आत्मानं कर्मतापन्नम् । कथंभूतम् **गुणमउ** गुणमयं केवल-ज्ञानाद्यनन्तगुणनिर्वृत्तम् । पुनरपि कथंभूतम् । **णिम्मलउ** निर्मलं भावकर्मद्रव्यकर्मनो-कर्ममलरहितं **अणुदिणु** दिन दिन प्रति अनुदिनमनवरतमित्यर्थः । इत्थंभूतमात्मानं **जे झायंति** ये केचन ध्यायन्ति **ते पर** त एव नान्ये **णियमे** निश्चयेन । किंविशिष्टास्ते । **परममुणि** परममुनयः **लहु** लघु शीघ्रं **लहंति** लभन्ते । किं लभन्ते । **णिव्वाणु** निर्वाण-मिति । अत्राह **प्रभाकरभट्टः** । अत्रोक्तं भवद्भिर्य एव शुद्धात्मध्यानं कुर्वन्ति त एव मोक्षं लभन्ते न चान्ये । **चारित्रसारादौ** पुनर्भणितं द्रव्यपरमाणुं भावपरमाणुं वा ध्यात्वा केवलज्ञानमुत्पादयन्तीत्यत्र विषये अस्माकं संदेहोऽस्ति । अत्र **श्रीयोगीन्दुदेवाः** परिहार-माहुः । तत्र द्रव्यपरमाणुशब्देन द्रव्यसूक्ष्मत्वं भावपरमाणुशब्देन भावसूक्ष्मत्वं ग्राह्यं न च पुद्गलद्रव्यपरमाणुः । तथा चोक्तं **सर्वार्थसिद्धिटिप्पणिके** । द्रव्यपरमाणुशब्देन द्रव्य-

सूक्ष्मत्वं भावपरमाणुशब्देन भावसूक्ष्मत्वमिति । तद्यथा । द्रव्यमात्मद्रव्यं तस्य परमाणुशब्देन सूक्ष्मावस्था ग्राह्या । सा च रागादिविकल्पोपाधिरहिता तस्य सूक्ष्मत्वं कथमिति चेत्, निर्विकल्प-समाधिविषयत्वेनेन्द्रियमनोविकल्पातीतत्वात् । भावशब्देन स्वसंवेदनपरिणाम तस्य भावस्य परमाणुशब्देन सूक्ष्मावस्था ग्राह्या । सूक्ष्मा कथमिति चेत् । वीतरागनिर्विकल्पसमरसीभावविषयेन पञ्चेन्द्रियमनोविषयातीतत्वादिति । पुनरप्याह । इदं परद्रव्यावलम्बनं ध्यान निषिद्धं किल भवद्भिः निजशुद्धात्मध्यानेनैव मोक्ष कुत्रापि भणितमास्ते । परिहारमाह---'अप्पा झायहि णिम्मलउ' इत्यत्रैव ग्रन्थे निरन्तरं भणितमास्ते, ग्रन्थान्तरे च **समाधिशतकादौ** पुनश्चोक्त तैरेव **पूज्यपाद**-स्वामिभि —"आत्मानमात्मा आत्मन्येवात्मनासौ क्षणमुपजनयन् स स्वयंभू प्रवृत्त" अस्यार्थ । आत्मान कर्मतापन्न आत्मा कर्ता आत्मन्येवाधिकरणभूते असौ पूर्वोक्तात्मा आत्मना करणभूतेन क्षणमन्तर्मुहूर्तमात्र उपजनयन् निर्विकल्पसमाधिनाराधयन् स स्वयभू प्रवृत्त सर्वज्ञो जात इत्यर्थ । ये च तत्र द्रव्यभावपरमाणुध्येयलक्षणे शुक्लध्याने द्व्यधिकचत्वारिंशद्विकल्पा भणितास्तिष्ठन्ति ते पुनरनीहितवृत्त्या ग्राह्या । केन दृष्टान्तेनेति चेत् । यथा प्रथमौपशमिकसम्यक्त्वग्रहणकाले परमागमप्रसिद्धानधाप्रवृत्तिकरणादिविकल्पान् जीव. करोति न चात्रेहादिपूर्वकत्वेन स्मरणमस्ति तथात्र शुक्लध्याने चेति । इदमत्र तात्पर्यम् । प्राथमिकानां चित्तस्थितिकरणार्थं विषयकषायदुर्ध्यानवञ्चनार्थं च परपरया मुक्तिकारणमर्हदादिपरद्रव्य ध्येयम्, पश्चात् चित्ते स्थिरीभूते साक्षान्मुक्तिकारण स्वशुद्धात्मतत्त्वमेव ध्येय नास्त्येकान्त., एव साध्यसाधकभाव ज्ञात्वा ध्येयविषये विवादो न कर्तव्य इति ।।३३।।

**जे गुणमउ णिम्मलउ अप्पा अणुदिणु झायंति, ते परं परममुणि णियमँ णिव्वाणु लहु लहंति ।।३३।।** जो कोई केवलज्ञानादि अनन्त गुणरूप तथा भाव-द्रव्य-नो कर्ममल रहित आत्मा का अनुदिन अनवरत ध्यान करते है वे ही परममुनि नियम से शीघ्र निर्वाण को प्राप्त करते है । यहाँ प्रभाकरभट्ट **प्रश्न** करते है कि हे गुरो ! आपने यह कहा कि जो शुद्धात्मा का ध्यान करते हैं, वे ही मोक्ष पाते है, दूसरे नही, जबकि **चारित्रसारादि** ग्रन्थो में ऐसा कहा है कि जो द्रव्यपरमाणु और भावपरमाणु का ध्यान करे वे केवलज्ञान उत्पन्न करते है । इस विषय मे मुझे सन्देह है । आचार्यश्री **उत्तर** देते है—यहाँ द्रव्यपरमाणु से द्रव्य की सूक्ष्मता और भावपरमाणु से भाव की सूक्ष्मता ग्रहण करनी चाहिए न कि पुद्गल द्रव्यपरमाणु । **तत्त्वार्थसूत्र** की **सर्वार्थसिद्धि** टीका मे कहा है - द्रव्य परमाणु शब्द से द्रव्य की सूक्ष्मता और भावपरमाणु शब्द से भाव की सूक्ष्मता जानना । द्रव्य अर्थात् आत्मद्रव्य, परमाणु शब्द से उसकी सूक्ष्मावस्था ग्रहण करनी चाहिए । वह (सूक्ष्मावस्था) रागादि विकल्प की उपाधि मे रहित है उसको सूक्ष्मपना कैसे हो सकता है ? ऐसा प्रश्न करने पर श्रीयोगीन्दुदेव उत्तर देते हैं कि निर्विकल्पसमाधि का विषय होने और मन और इन्द्रियो के विकल्पो से परे होने के कारण । भावशब्द यहाँ स्वसंवेदन परिणाम का सूचक है, परमाणुशब्द से

उस भाव की सूक्ष्मावस्था लेनी चाहिए । वीतराग निर्विकल्प परमसमरसीभाव रूप होने **और मन और इन्द्रियों को अगम्य होने से सूक्ष्म है** । ऐसा सुनकर पुन शिष्य ने पूछा—आपने पर द्रव्य के **आलम्बनरूप** ध्यान का निषेध किया **और** निजशुद्धात्मा के ध्यान मे ही मोक्ष बताया । ऐसा कथन **कहीं और भी कहा है क्या** ? इसका समाधान यह है –'अप्पा झायहि णिम्मलउ' अपनी निर्मल आत्मा का ध्यान करो, ऐसा कथन इसी ग्रन्थ मे पहले कहा है और **समाधिशतकादि मे श्रीपूज्यपाद स्वामी ने कहा है**—"जीव पदार्थ अपने स्वरूप को, अपने मे ही अपने करके एक क्षणमात्र भी निर्विकल्पसमाधि से आराधता हुआ सर्वज्ञ वीतराग हो जाता है ।" जिस शुक्लध्यान मे द्रव्यपरमाणु की सूक्ष्मता और भावपरमाणु भी सूक्ष्मता ध्यान करने योग्य है, ऐसे शुक्लध्यान मे निजवस्तु और **निजभाव** का ही सहारा है, परवस्तु का नही । सिद्धान्त मे शुक्लध्यान के बयालीस भेद कहे है, वे अवाछीक वृत्ति से गौणरूप जानना, मुख्यवृत्ति से न जानना । उसका दृष्टान्त जैसे प्रथमोपशम सम्यक्त्व के ग्रहणकाल मे परमागम मे प्रसिद्ध जो अध प्रवृत्तिकरणादि विकल्प है, उनको जीव करता है, वे इच्छापूर्वक नही होते, सहज ही होते है, वैसे ही शुक्लध्यान मे भी इसी प्रकार जानना । तात्पर्य यह है कि प्राथमिको को चित्त को स्थिर करने के लिए और विषय कषाय रूप खोटे ध्यान को रोकने के लिए परम्परा मे मुक्ति के कारणरूप अर्हन्तादि परद्रव्य ध्यान करने योग्य है, फिर चित्त के स्थिर हो जाने पर साक्षात् मुक्ति का कारण जो शुद्ध निजात्मतत्त्व है, वही ध्यान करने योग्य है—यहाँ एकान्त नही है, इस प्रकार साध्य-साधक भाव जानकर ध्येय विषय मे विवाद नही करना चाहिए । पचपरमेष्ठी का ध्यान साधक है और आत्मध्यान साध्य है ॥३३॥

अथ सामान्यग्राहक निर्विकल्प सत्तावलोकदर्शन कथयति—

अब सामान्यग्राहक निर्विकल्प सत्तावलोकनरूप दर्शन के सम्बन्ध मे कहते है—

**सयल-पयत्थहँ जं गहणु जीवहँ अग्गिमु होइ ।**
**वत्थु-विसेस-विवज्जियउ तं णिय-दंसणु जोइ ॥३४॥**

सकलपदार्थाना यद् ग्रहण जीवाना अग्रिम भवति ।
वस्तुविशेषविवर्जित तत् निजदर्शन पश्य ॥३४॥

सयल इत्यादि । **सयलपयत्थहं** सकलपदार्थाना **जं गहणु** यद् ग्रहणमवलोकनम् । कस्य । **जीवहं** जीवस्य अथवा बहुवचनपक्षे 'जीवह' जीवानाम् । कथभूतमवलोकनम् । **अग्गिमु** अग्रिम सविकल्पज्ञानात्पूर्व **होइ** भवति । पुनरपि कथंभूतम् । **वत्थुविसेसविवज्जियउ** वस्तुविशेषविवर्जित शुक्लमिदमित्यादिविकल्परहित **त** तत्पूर्वोक्तलक्षणं **णियदंसणु** निज आत्मा तस्य दर्शनमवलोकन **जोइ** पश्य जानीहीति । अत्राह **प्रभाकरभट्टः** । निजात्मा तस्य दर्शनमवलोकन दर्शनमिति व्याख्यात भवद्भिरिद तु सत्तावलोकदर्शन मिथ्यादृष्टीनामप्यस्ति तेषामपि मोक्षो भवतु । परिहारमाह । चक्षुरचक्षुरवधिकेवलभेदेन चतुर्धा दर्शनम् । अत्र चतुष्टयमध्ये मानसमचक्षुर्दर्शनमात्मग्राहकं भवति, तच्च मिथ्यात्वादिसप्तप्रकृत्युपशमक्षयोपशमक्षयजनिततत्त्वार्थश्रद्धानलक्षणसम्य-

क्त्वाभावात् शुद्धात्मतत्त्वमेवोपादेयमिति श्रद्धानाभावे सति तेषां मिथ्यादृष्टीनां न भवत्येवेति भावार्थ. ॥३४॥

**जं जीवहं अग्गिमु सयल-पयत्थहं वत्थु-विसेस-विवज्जियउ गहणु तं णियदंसणु जोइ ॥३४॥**
जो जीवो के सविकल्प ज्ञान के पहले सब पदार्थों का—यह सफेद है इत्यादि विकल्परहित सामान्यरूप देखना है, वह दर्शन जानो । यहाँ प्रभाकरभट्ट **प्रश्न** करते है—आपने निजात्मा को देखना वह दर्शन है, ऐसा बहुत बार कहा है, अब सामान्य अवलोकनरूप दर्शन कहते है । ऐसा दर्शन तो मिथ्यादृष्टियो के भी होता है, उनको भी फिर मोक्ष होना चाहिए ? इसका उत्तर देते है—चक्षुदर्शन, अचक्षुदर्शन, अवधिदर्शन और केवलदर्शन ये दर्शन के चार भेद हैं । मन से देखना अचक्षुदर्शन है, आंखो से देखना चक्षुदर्शन है । इन चारो मे से आत्मा का अवलोकन छद्मस्थावस्था में मन से होता है और वह आत्मदर्शन मिथ्यात्वादि सात प्रकृतियो के उपशम, क्षयोपशम तथा क्षय से होता है । सम्यग्दृष्टि के तो यह दर्शन तत्त्वार्थश्रद्धानरूप होने से मोक्ष का कारण है, जिसमें शुद्ध आत्म तत्त्व ही उपादेय है, मिथ्यादृष्टियो के तत्त्वश्रद्धान नही होने से आत्मा का दर्शन नही होता । मिथ्यादृष्टियो के स्थूलरूप पर द्रव्य का देखना, जानना मन और इन्द्रियो के द्वारा होता है, वह सम्यग्दर्शन नही है, इसलिए मोक्ष का कारण भी नही है । भावार्थ यह है कि तत्त्वार्थश्रद्धान के अभाव से सम्यक्त्व का अभाव है और सम्यक्त्व के अभाव से मोक्ष का अभाव है । ३४॥

अथ छद्मस्थाना सत्तावलोकदर्शनपूर्वक ज्ञान भवतीति प्रतिपादयति—

अब कहते है कि छद्मस्थो के (सत्तावलोकन) दर्शनपूर्वक ज्ञान होता है—

**दंसणपुव्वु हवेइ फुडु जं जीवहं विण्णाणु ।**
**वत्थु-विसेसु मुणंतु जिय तं मुणि अविचलु णाणु ॥३५॥**

दर्शनपूर्व भवति स्फुट यत् जीवाना विज्ञानम् ।
वस्तुविशेष जानन् जीव तत् मन्यस्व अविचल ज्ञानम् ॥३५॥

दसण पुव्वु इत्यादि । **दंसणपुव्वु** सामान्यग्राहकनिर्विकल्पसत्तावलोकदर्शनपूर्वकं **हवेइ** भवति **फुडु** स्फुटं **जं** यत् **जीवहं** जीवानाम् । किं भवति । **विण्णाणु** विज्ञानम् । किं कुर्वन् सन् । **वत्थुविसेसु मुणंतु** वस्तुविशेष वर्णसंस्थानादिविकल्पपूर्वकं जानन् । **जिय** हे जीव । **तं** तत् **मुणि** मन्यस्व जानीहि । किं जानीहि **अविचलु णाणु** अविचल संशयविपर्ययानध्यवसायरहित ज्ञानमिति । तत्रेद दर्शनपूर्वकं ज्ञान व्याख्यातम् । यद्यपि शुद्धात्मभावनाव्याख्यानकाले प्रस्तुतं न भवति तथापि भणित भगवता । कस्मादिति चेत् । चक्षुरचक्षुरवधिकेवलभेदेन दर्शनोपयोगश्चतुर्विधो भवति । तत्र चतुष्टयमध्ये द्वितीयं यदचक्षुर्दर्शन मानसरूप निर्विकल्प यथा भव्यजीवस्य दर्शनमोहचारित्रमोहोपशमक्षयोपशमक्षयलाभे सति शुद्धात्मानुभूतिरुचिरूपं वीतरागसम्यक्त्व भवति तथैव च शुद्धात्मानुभूतिस्थिरतालक्षणं वीतरागचारित्रं भवति तदा काले तत्पूर्वोक्तं सत्तावलोकलक्षणं

**मानसं** निर्विकल्पदर्शनं कर्तृ पूर्वोक्तनिश्चयसम्यक्त्वचारित्रबलेन निर्विकल्पनिजशुद्धात्मानुभूतिध्यानेन सहकारिकारणं भवति पूर्वोक्तभव्यजीवस्य न चाभव्यस्य। कस्मात्। निश्चयसम्यक्त्वचारित्राभावादिति भावार्थ ॥३५॥

**जं जीवहँ विण्णाणु फुडु दंसणपुव्वु हवेइ। तं णाणु वत्थु विसेसु मुणंतु जिय अविचलु मुणि ॥३५॥** जो जीवों के ज्ञान होता है वह निश्चय से दर्शनपूर्वक होता है। वह ज्ञान वस्तु को विशेष रूप से विस्तीर्णता से जानने वाला है, उस ज्ञान को हे जीव! तू संशय विमोह विभ्रम से रहित जान। जो सामान्य को ग्रहण करता है, वह दर्शन है तथा जो वस्तु का विशेष वर्णन—वर्ण-आकारादि जानता है, वह ज्ञान है। छद्मस्थों के ज्ञान दर्शनपूर्वक होता है। यद्यपि यह व्यवहार सम्यग्ज्ञान शुद्धात्मा की भावना के व्याख्यान के समय प्रशंसनीय नहीं है तथापि प्रारम्भ में प्रशंसनीय है, ऐसा भगवान ने कहा है। क्योंकि चक्षु अचक्षु अवधि केवल के भेद से दर्शनोपयोग चार प्रकार का होता है। इन चार भेदों में दूसरा भेद अचक्षुदर्शन मनसम्बन्धी निर्विकल्प भव्यजीवों के दर्शन-मोह चारित्रमोह के उपशम तथा क्षय के होने पर शुद्धात्मानुभूति रुचिरूप वीतरागसम्यक्त्व होता है और शुद्धात्मानुभूति में स्थिरता रूप वीतरागचारित्र होता है, उस समय पूर्वोक्त सत्ता के अवलोकन-रूप मनसम्बन्धी निर्विकल्पदर्शन निश्चयचारित्र के बल से विकल्परहित निजशुद्धात्मानुभूति के ध्यान से सहकारी कारण होता है अत व्यवहारसम्यग्दर्शन और व्यवहार सम्यग्ज्ञान भव्य जीव के ही होता है, अभव्य के सर्वथा नहीं क्योंकि अभव्यजीव मुक्ति का पात्र नहीं है। जो मुक्ति का पात्र है, उसे ही व्यवहाररत्नत्रय की प्राप्ति होती है। व्यवहाररत्नत्रय परम्परा से मोक्ष का कारण है और निश्चयरत्नत्रय साक्षात् मुक्ति का कारण है, यह अभिप्राय हुआ ॥३५॥

अथ परमध्यानारूढो ज्ञानी समभावेन दुःख सहमानः स एवाभेदेन निर्जराहेतुर्भण्यते इति दर्शयति—

अब यह दर्शाते है कि परमध्यान मे आरूढ ज्ञानी समभाव से दुःख-सुख को सहता हुआ अभेद-नय से निर्जरा का कारण होता है—

**दुक्खु वि सुक्खु सहंतु जिय णाणिउ झाण-णिलीणु।**
**कम्महँ णिज्जर-हेउ तउ वुच्चइ संग-विहीणु ॥३६॥**

दुःखमपि सुखं सहमानः जीव ज्ञानी ध्याननिलीनः।
कर्मणां निर्जराहेतुः तपः उच्यते संगविहीनं ॥३६॥

दुक्खु वि इत्यादि। **दुक्खु वि सुक्खु सहंतु** दुःखमपि सुखमपि समभावेन सहमानः सन् **जिय** हे जीव। कोऽसौ कर्ता। **णाणिउ** वीतरागस्वसंवेदनज्ञानी। किंविशिष्टः। **झाण-णिलीणु** वीतरागचिदानन्दैकाग्र्यध्याननिलीनो रतः स एवाभेदेन **कम्महं णिज्जरहेउ** शुभाशुभकर्मणां निर्जराहेतुरुच्यते न केवलं ध्यानपरिणतपुरुषो निर्जराहेतुरुच्यते **तउ** परद्रव्येच्छानिरोधरूपबाह्याभ्यन्तरलक्षणं द्वादशविधं तपश्च। किंवि-

शिष्टः स तपोधनस्तत्तपश्च । **संगविहीणु** संगविहीनो बाह्याभ्यन्तरपरिग्रहरहित इति । **अत्राह प्रभाकरभट्टः** । ध्यानेन निर्जरा भणिता भवद्भिः उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमिति ध्यानलक्षण, उत्तमसंहननाभावे कथं ध्यानमिति । भगवानाह । उत्तमसहननेन यद्ध्यानं भणितं तदपूर्वगुणस्थानादिषूपशमक्षपकश्रेण्योर्यत् शुक्लध्यानं तदपेक्षया भणितम् । अपूर्वगुणस्थानादधस्तनगुणस्थानेषु धर्मध्यानस्य निषेधकं न भवति । तथाचोक्तं **तत्त्वानुशासने** ध्यानग्रन्थे-"यत्पुनर्वज्रकायस्य ध्यानमित्यागमे वच । श्रेण्योर्ध्यानं प्रतीत्योक्तं तन्नाधस्तान्निषेधकम् ॥" । किं च ।

रागद्वेषाभावलक्षणं परम यथाख्यातरूप स्वरूपे चरण निश्चयचारित्र भणन्ति इदानीं तदभावेऽन्यच्चारित्रमाचरन्तु तपोधना । तथा चोक्तं तत्रेदम्-"चरितारो न सन्त्यद्य यथाख्यातस्य सप्रति । तत्किमन्ये यथाशक्तिमाचरन्तु तपस्विन ॥" पुनश्चोक्तं **श्रीकुन्दकुन्दाचार्यदेवैः मोक्षप्राभृते**-"अज्ज वि तियरणसुद्धा अप्पा झाऊण लहहिं इंदत्त । लोयतियदेवत्त तत्थ चुदा णिव्वुदि जंति ॥" । अयमत्र भावार्थः । यथादित्रिकसंहननलक्षणवीतरागयथाख्यातचारित्राभावेऽपीदानीं शेषसंहननेनापि शेषचारित्रमाचरन्ति तपस्विन तथादिकत्रिकसहननलक्षणशुक्लध्यानाभावेऽपि शेषसहनेनापि ससारस्थितिच्छेदकारण परपरया मुक्तिकारण च धर्मध्यानमाचरन्तीति ॥३६॥

**जिय ! णाणिउ झाण णिलीणु दुक्खु वि सुक्खु सहंतु कम्महँ णिज्जर हेउ वुच्चइ संगविहीणु तउ** ॥३६॥ हे जीव ! वीतराग स्वसवेदनज्ञानी आत्मध्यान मे लीन, दु ख और सुख को समभाव मे सहता हुआ अभेदनय से शुभ-अशुभ कर्मों की निर्जरा का कारण है, ऐसा भगवान ने कहा है और बाह्य-अभ्यन्तर परिग्रह रहित परद्रव्य की इच्छा के निरोधरूप बाह्य-अभ्यन्तर अनशनादि बारह प्रकार के तपरूप भी वह ज्ञानी है । यहाँ प्रभाकरभट्ट **प्रश्न** करते है—आपने ध्यान से निर्जरा कही, ध्यान का लक्षण है— उत्तम सहनन वाले का चित्त का एकाग्रनिरोध ध्यान है । जहाँ उत्तम सहनन ही नही है, वहाँ ध्यान किस प्रकार से हो सकता है ? गुरुदेव **उत्तर** देते है—उत्तम सहनन वाले के जो ध्यान कहा है, वह आठवें गुणस्थान से लेकर उपशम क्षपक श्रेणी वालो के जो शुक्लध्यान होता है, उसकी अपेक्षा कहा गया है । उपशम श्रेणी वज्रवृषभनाराच, वज्रनाराच, नाराच इन तीन सहननवालो के होती है, उनके शुक्लध्यान का पहला पाया है । वे ग्यारहवे गुणस्थान से नीचे आते है । क्षपकश्रेणी एक वज्रवृषभनाराच सहननवाले के ही होती है । वे आठवे गुणस्थान मे क्षपकश्रेणी प्रारम्भ करते है । उनके आठवे गुणस्थान में शुक्लध्यान का पहला भेद होता है । वे आठवें, नवे, दसवे तथा दसवे से बारहवे गुणस्थान का स्पर्श करते है, ग्यारहवे का नही । बारहवे गुणस्थान मे शुक्लध्यान का दूसरा भेद होता है, उसके प्रसाद से केवलज्ञान पाता है और उसी भव में मोक्ष जाता है । इसलिए उत्तम संहनन का कथन शुक्लध्यान की अपेक्षा से है । आठवे गुणस्थान से नीचे के (चौथे से लेकर सातवें) गुणस्थानो तक शुक्लध्यान नही होता, धर्मध्यान छहो संहननवालों के है, श्रेणी के नीचे धर्मध्यान ही है, उसका निषेध किसी सहनन मे नही है । **तत्त्वा-**

**नुशासन** नामक ध्यानग्रन्थ मे कहा है- "जो वज्रकाय के ही ध्यान होता है, आगम का ऐसा वचन, दोनों श्रेणियों मे शुक्लध्यान होने की अपेक्षा है, श्रेणी के नीचे जो धर्मध्यान है, उसका निषेध किसी संहनन में नहीं कहा है, यह निश्चय से जानना।"

रागद्वेष के अभाव लक्षणवाला परम यथाख्यात स्वरूप स्वरूपाचरण ही निश्चय चारित्र है। वह इस समय (पचमकाल मे भरतक्षेत्र मे) नहीं है, अत साधुओं को अन्य चारित्र का आचरण करना चाहिए। **विशेष**–चारित्र के पाँच भेद है, सामायिक, छेदोपस्थापना, परिहारविशुद्धि, सूक्ष्म-साम्पराय और यथाख्यात। इस समय भरतक्षेत्र मे सामायिक और छेदोपस्थापना ये दो ही चारित्र होते हैं, अन्य नहीं, इसलिए मुनियों को इनका आचरण करना चाहिए। **तत्त्वानुशासन** ग्रन्थ मे कहा है कि इस समय यथाख्यात चारित्र का आचरण करने वाले मौजूद नहीं है तो क्या हुआ, अपनी शक्ति के अनुसार तपस्वीजन अन्य चारित्र (सामायिक, छेदोपस्थापना) का आचरण करे। **श्री कुन्दकुन्दाचार्य** ने भी **मोक्षपाहुड** मे ऐसा ही कहा है –"अब भी इस पचमकाल मे मन-वचन-काय की शुद्धता से आत्मा का ध्यान करके यह जीव इन्द्रपद पाता है अथवा लौकान्तिक देव होता है और वहाँ से च्युत होकर मनुष्य भव धारण करके मोक्ष जाता है ॥७७॥" **भावार्थ**–यह है कि इस समय पहले के तीन सहनन तो नहीं है परन्तु अर्धनाराच, कीलक और सृपाटिका, ये तीन सहनन है। इन तीनों से सामायिक, छेदोपस्थापना का आचरण करो तथा धर्मध्यान करो। धर्मध्यान का अभाव किसी सहनन मे नहीं है। शुक्लध्यान आद्य तीन सहननो मे ही होता है, उनमे भी पहला भेद उपशमश्रेणी सम्बन्धी तीनों सहननो मे है और दूसरा-तीसरा-चौथा भेद प्रथम सहननवाले के ही होता है, यह नियम है। अत शुक्लध्यान के अभाव मे भी हीनसहननवाले को धर्मध्यान का आचरण करना चाहिए। यह धर्मध्यान परम्परा मे मुक्ति का मार्ग है और ससार की स्थिति का छेदक है ॥३६॥

अथ सुखदु ख सहमान सन् येन कारणेन समभाव करोति मुनिस्तेन कारणेन पुण्यपापद्वयसवरहेतुर्भवतीति दर्शयति—

अब बताते है कि जो मुनि सुख-दु ख को सहते हुए समभाव रखते है, वे ही पुण्य और पाप दोनों के सवर के कारण होते है--

**बिण्णि वि जेण सहंतु मुणि मणि सम-भाउ करेइ।**
**पुण्णहँ पावहँ तेण जिय संवर-हेउ हवेइ ॥३७॥**

द्वे अपि येन सहमान मुनि मनसि समभाव करोति।
पुण्यस्य पापस्य तेन जीव सवरहेतु भवति ॥३७॥

बिण्णि वि इत्यादि। **बिण्णि वि** द्वे अपि सुखदु खे **जेण** येन कारणेन **सहंतु** सहमान सन्। कोऽसौ कर्ता। **मुणि** मुनि स्वसवेदनप्रत्यक्षज्ञानी। **मणि** अविक्षिप्त-मनसि। **समभाउ** समभाव सहजशुद्धज्ञानानन्दैकरूप रागद्वेषमोहरहित परिणाम कर्मतापन्न **करेइ** करोति परिणमति **पुण्णहं पावहं** पुण्यस्य पापस्य सबन्धी **तेण** तेन कारणेन

**जिय** हे जीव **संवरहेउ** संवरहेतुः कारणं **हवेइ** भवतीति । अयमत्र तात्पर्यार्थः । कर्मोदयवशात् सुखदुःखे जातेऽपि योऽसौ रागादिरहितमनसि विशुद्धज्ञानदर्शनस्वभावनिजशुद्धात्मसंवित्तिं न त्यजति स पुरुष एवाभेदनयेन द्रव्यभावरूपपुण्यपापसंवरस्य हेतुः कारणं भवतीति ।।३७।।

**जेण विण्णि वि सहंतु मुणि मणि समभाउ करेइ, जिय ! तेण पुण्णहं पावहं संवर हेउ हवेइ ।।३७।।** जिस कारण सुख-दुःख दोनो को ही सहते हुए स्वसंवेदन प्रत्यक्षज्ञानी मुनि स्थिर मन मे समभाव करता है अर्थात् रागद्वेषमोह रहित स्वाभाविक शुद्ध ज्ञानानन्द स्वरूप परिणमन करता है, विभावरूप नही परिणमता, इस कारण हे जीव ! वह मुनि सहज में ही पुण्य और पाप इन दोनो के संवर का कारण होता है । **भावार्थ**—कर्मोदयवश सुख-दुःख के उत्पन्न होने पर भी जो ज्ञानी, मुनि रागादिरहित मन मे शुद्धज्ञानदर्शनस्वरूप अपने निजशुद्ध स्वभाव को नही छोडता है, वही पुरुष अभेदनय से द्रव्यभावरूप पुण्य-पाप के संवर का कारण होता है ।।३७।।

अथ यावन्तं कालं रागादिरहितपरिणामेन स्वशुद्धात्मस्वरूपे तन्मयो भूत्वा तिष्ठति तावन्तं कालं संवरनिर्जरां करोतीति प्रतिपादयति—

अब कहते है कि जितने काल तक रागादिरहित परिणामो से स्वशुद्धात्मस्वरूप मे तन्मय हुआ ठहरता है, तब तक संवर और निर्जरा करता है—

**अच्छइ जित्तिउ कालु मुणि अप्प-सरूवि णिलीणु ।**
**संवर-णिज्जर जाणि तुहुं सयल-वियप्प-विहीणु ।।३८।।**

तिष्ठति यावन्तं कालं मुनिः आत्मस्वरूपे निलीनः ।
संवरनिर्जरां जानीहि त्वं सकलविकल्पविहीनम् ।।३८।।

**अत्थ(च्छ)इ** इत्यादि । **अत्थ(च्छ)इ** तिष्ठति । किं कृत्वा तिष्ठति । **जित्तिउ कालु** यावन्तं कालं प्राप्य । क्व तिष्ठति । **अप्पसरूवि** निजशुद्धात्मस्वरूपे । कथंभूतः सन् **णिलीणु** निश्चयेन लीनो द्रवीभूतो वीतरागनित्यानन्दैकपरमसमरसीभावेन परिणतः **हे प्रभाकरभट्ट** इत्थंभूतपरिणामपरिणतं तपोधनमेवाभेदेन **संवरणिज्जर जाणि तुहुँ** संवरनिर्जरास्वरूपं जानीहि त्वम् । पुनरपि कथंभूतम् । **सयलवियप्पविहीणु** सकलविकल्पहीनं ख्यातिपूजालाभप्रभृतिविकल्पजालावलीरहितमिति । अत्र विशेषव्याख्यानं यदेव पूर्वसूत्रद्वयभणितं तदेव ज्ञातव्यम् । कस्मात् । तस्यैव निर्जरासंवरव्याख्यानस्योपसंहारोऽयमित्यभिप्रायः ।।३८।। एवं मोक्षमोक्षमार्गमोक्षफलादिप्रतिपादकद्वितीयमहाधिकारोक्तसूत्राष्टकेनाभेदरत्नत्रयव्याख्यानमुख्यत्वेन स्थलं समाप्तम् । अत ऊर्ध्वं चतुर्दशसूत्रपर्यन्तं परमोपशमभावमुख्यत्वेन व्याख्यानं करोति ।

**मुरिण जित्तिउ कालु अप्प सरूवि रिगलीणु अच्छइ, तुहुँ सयल वियप्प विहीणु संवर रिगज्जर जारिग ।।३८।।** मुनि जब तक आत्मस्वरूप मे लीन हुआ रहता है अर्थात् वीतराग नित्यानन्द परम-समरसी भाव से परिणमता हुआ अपने स्वभाव मे तल्लीन होता है, उस समय हे प्रभाकरभट्ट ! तुम समस्त विकल्पसमूहों से रहित अर्थात् अपनी ख्याति, पूजा, लाभ आदि विकल्पो से रहित उस मुनि को सवरनिर्जरा स्वरूप जानो । यहाँ पर भावार्थरूप विशेष व्याख्यान जो पहले दो दोहासूत्रो मे कहा है, वही जानो । इस प्रकार सवर निर्जरा व्याख्यान का उपसहार हुआ ।।३८।। इस प्रकार मोक्ष, मोक्षमार्ग और मोक्षफल का निरूपण करने वाले दूसरे महाधिकार मे आठसूत्रो मे अभेदरत्नत्रय की व्याख्या की मुख्यता से अन्तरस्थल पूर्ण हुआ ।

तथाहि—

अब आगे चौदह दोहों में परम उपशमभाव की मुख्यता से व्याख्यान करते है—

**कम्मु पुरक्किउ सो खवइ अहिणव पेसु ण देइ ।**
**संगु मुएविणु जो सयलु उवसम-भाउ करेइ ।।३६।।**

कर्म पुराकृत स क्षपयति अभिनव प्रवेश न ददाति ।
सग मुक्त्वा य सकल उपशमभाव करोति ।।३६।।

कम्मु इत्यादि । **कम्मु पुरक्किउ** कर्म पुराकृत **सो खवइ** स एव वीतरागस्वसवेदनतत्त्वज्ञानी क्षपयति । पुनरपि कि करोति । **अहिणव पेसु ण देइ** अभिनव कर्म प्रवेश न ददाति । स क । **संगु मुएविणु जो सयलु** सग बाह्याभ्यन्तरपरिग्रह मुक्त्वा य. कर्ता समस्तम् । पश्चात्कि करोति । **उवसमभाउ करेइ** जीवितमरणलाभालाभसुख-दु खादिसमताभावलक्षण समभाव करोति । तद्यथा । स एव पुराकृत कर्म क्षपयति नवतर सवृणोति य एव बाह्याभ्यन्तरपरिग्रह मुक्त्वा सर्वशास्त्र पठित्वा च शास्त्रफल-भूत वीतरागपरमानन्दैकसुखरसास्वादरूप समभाव करोतीति भावार्थ । तथा चोक्तम्—"साम्यमेवादराद्भाव्य किमन्यैर्ग्रन्थविस्तरै । प्रक्रियामात्रमेवेद वाङ्मयं विश्वमस्य हि ।।" ।।३६।।

**सो पुरक्किउ कम्मु खवइ, अहिणव पेसु ण देइ, जो सयलु संगु मुएविणु उवसमभाउ करेइ ।।३६।।** वही वीतराग स्वसवेदनतत्त्वज्ञानी पूर्वोपार्जित कर्मो का क्षय करता है और नए कर्मो को प्रवेश नही देता है जो सम्पूर्ण बाह्य-अभ्यन्तर परिग्रह का त्याग कर परम शान्तभाव धारण करता है अर्थात् जीवन-मरण, लाभ-अलाभ, सुख-दु ख, शत्रु-मित्र आदि मे सदा समान परिणाम रखता है । **भावार्थ**—वही मुनि पूर्वकृत कर्मो का क्षय करता है और नवीन कर्मो को आने से रोकता है जो बाह्याभ्यन्तर सम्पूर्ण परिग्रह का त्याग कर और सर्वशास्त्रो को पढकर उनके फलभूत वीतराग परमानन्द सुखरस का आस्वादी हुआ समताभाव धारण करता है । ऐसा ही कथन **पद्मनन्दिपंच-विंशतिका** मे भी है – "आदरपूर्वक समभाव ही धारण करना चाहिए, अन्य ग्रन्थविस्तारो से क्या, समस्त पद तथा सकल द्वादशाग इस समभावरूप सूत्र का ही विस्तार है" ।।३६।।

अथ यः समभावं करोति तस्यैव निश्चयेन सम्यग्दर्शनज्ञानचारित्राणि नान्यस्येति दर्शयति—

अब कहते हैं कि जो समभाव धारण करता है उसी के निश्चय मे सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र होते है, किसी अन्य के नही—

**दंसणु णाणु चरित्तु तसु जो सम-भाउ करेइ ।**
**इयरहँ एक्कु वि अत्थि णवि जिणवरु एउ भणेइ ।।४०।।**

दर्शन ज्ञानं चारित्र तस्य य समभाव करोति ।
इतरस्य एकमपि अस्ति नैव जिनवर. एव भणति ।।४०।।

दसणु इत्यादि । **दंसणु णाणु चरित्तु** सम्यग्दर्शनज्ञानचारित्रत्रयं **तसु** निश्चयनयेन तस्यैव भवति । कस्य । **जो समभाउ करेइ** य. कर्ता समभाव करोति **इयरहं** इतरस्य समभावरहितस्य एक्कु **वि अत्थि णवि** रत्नत्रयमध्ये नास्त्येकमपि **जिणवरु एउ भणेइ** जिनवरो वीतराग सर्वज्ञ एव भणतीति । तथाहि । निश्चयनयेन निजशुद्धात्मैवोपादेय इति रुचिरूप सम्यग्दर्शन तस्यैव निजशुद्धात्मसवित्तिसमुत्पन्नवीतरागपरमानन्दमधुररसास्वादोऽयमात्मा निरन्तराकुलत्वोत्पादकत्वात् कटुकरसास्वादा कामक्रोधादय इति भेदज्ञान तस्यैव भवति स्वरूपे चरण चारित्रमिति वीतरागचारित्रं तस्यैव भवति । तस्य कस्य । वीतरागनिर्विकल्पपरमसामायिकभावनानुकूलं निर्दोषिपरमात्मसम्यक्श्रद्धानज्ञानानुचरणरूप य समभाव करोतीति भावार्थ ।।४०।।

**दंसणु णाणु चरित्तु तसु जो समभाव करेइ, इयरहँ एक्कु वि णवि अत्थि, एउ जिणवरु भणेइ** ।।४०।। निश्चय से सम्यग्दर्शन, ज्ञान, चारित्र उसी के होते है जो (मुनि) समताभाव धारण करता है, समताभाव से रहित अन्य के इनमे से एक भी नही होता, ऐसा जिनेन्द्रदेव कहते है । निश्चयनय से निज शुद्धात्मा ही उपादेय है, ऐसी रुचिरूप सम्यग्दर्शन उस समभावधारक के होता है और निज शुद्धात्मा की भावना मे उत्पन्न हुआ जो वीतराग परमानन्द मधुर रस का आस्वाद स्वरूप यह आत्मा है तथा निरन्तर आकुलता उत्पन्न करने वाले महाकटुकरस रूप अत्यन्त विरस काम-क्रोधादिक है, यह भेदज्ञान-सम्यग्ज्ञान भी उसी के होता है तथा स्वरूप मे आचरणरूप वीतरागचारित्र भी उसी समताभावधारी के होता है जो मुनि वीतराग निर्विकल्प परम सामायिकभावना के अनुकूल निर्दोष परमात्मा के यथार्थ श्रद्धान, यथार्थज्ञान, और यथार्थ आचरणरूप समभाव धारण करता है, यह **भावार्थ** है ।।४०।।

अथ यदा ज्ञानी जीव उपशाम्यति तदा संयतो भवति कामक्रोधादिकषायसगतः पुनरसंयतो भवतीति निश्चिनोति—

अब कहते हैं कि जब ज्ञानी जीव शान्तभाव धारण करता है, तब वह सयत होता है और जब काम-क्रोधादिक कषाय के वशीभूत होता है तब पुन असंयमी होता है —

**जांवइ णाणिउ उवसमइ तामइ संजदु होइ।**
**होइ कसायहँ वसि गयउ जीउ असंजदु सोइ ।।४१।।**

यावत् ज्ञानी उपशाम्यति तावत् संयतो भवति।
भवति कषायाणां वशं गतः जीवः असंयतः स एव ।।४१।।

जांवइ इत्यादि। **जांवइ** यदा काले **णाणिउ** ज्ञानी जीवः **उवसमइ** उपशाम्यति **तामइ** तदा काले **संजदु होइ** संयतो भवति। **होइ** भवति **कसायहं वसि गयउ** कषायवशं गतः **जीउ** जीवः। कथंभूतो भवति। **असंजदु** असंयतः। कोऽसौ। **सोइ** स एव पूर्वोक्त-जीव इति। अयमत्र भावार्थः। अनाकुलत्वलक्षणस्य स्वशुद्धात्मभावनोत्थपारमार्थिक-सुखस्यानुकूलपरमोपशमे यदा ज्ञानी तिष्ठति तदा संयतो भवति तद्विपरीत परमाकुलत्वो-त्पादककामक्रोधादौ परिणतः पुनरसंयतो भवतीति। तथा चोक्तम्—"**अकसायं तु चरित्तं कसायवसगदो असंजदो होदि। उवसमइ जम्हि काले तक्काले संजदो होदि**" ।।४१।।

**जांवइ णाणिउ उवसमइ, तामइ संजदु होइ। कसायहँ वसि गयउ सो जीउ असंजदु होइ ।।४१।।** जिस समय ज्ञानी जीव शान्तभाव को प्राप्त होता है, उस समय वह संयमी होता है और क्रोधादि कषायों के आधीन होने पर वही जीव असंयमी होता है। **भावार्थ**-अनाकुलता लक्षण वाले निज शुद्धात्मा की भावना से समुत्पन्न पारमार्थिक सुख का कारण जो परम शान्तभाव है, उसमें जिस समय ज्ञानी जीव ठहरता है, उस समय वह संयमी कहलाता है और परम आकुलता को उत्पन्न करने वाले काम-क्रोधादिक अशुद्धभावों में परिणमता हुआ जीव असंयमी होता है। ऐसा अन्यत्र भी कहा है—"कषायाभाव ही चारित्र है, कषाय के वशीभूत हुआ जीव असंयमी होता है, जब कषायों का उपशम करता है, तब वह संयमी कहलाता है।" ।।४१।।

अथ येन कषाया भवन्ति मनसि तं मोहं त्यजेति प्रतिपादयति—

अब कहते हैं कि जिस मोह से मन में कषाय उत्पन्न होती है, उस मोह का तू त्याग कर—

**जेण कसाय हवंति मणि सो जिय मिल्लहि मोहु।**
**मोह-कसाय-विवज्जियउ पर पावहि सम-बोहु ।।४२।।**

येन कषाया भवन्ति मनसि तं जीव मुञ्च मोहम्।
मोहकषायविवर्जितः परं प्राप्नोषि समबोधम् ।।४२।।

जेण इत्यादि। **जेण** येन वस्तुना वस्तुनिमित्तेन मोहेन वा। किं भवति। **कसाय हवंति** क्रोधादिकषाया भवन्ति। क्व भवन्ति। **मणि** मनसि **सो** तं **जिय** हे जीव **मिल्लहि** मुञ्च।कम्। तं पूर्वोक्तं **मोहु** मोहं मोहनिमित्तपदार्थं चेति। पश्चात् किं लभसे त्वम्। **मोहकसायविवज्जिउ** मोहकषायविवर्जितः सन् **पर** परं नियमेन **पावहि** प्राप्नोषि। कं

कर्मतापन्नम् । **समबोहु** समबोधं रागद्वेषरहित ज्ञानमिति । तथाहि । निर्मोहनिजशुद्धात्मध्यानेन निर्मोहस्वशुद्धात्मतत्त्वविपरीतं हे जीव मोहं मुञ्च, येन मोहेन मोहनिमित्तवस्तुना वा निष्कषायपरमात्मतत्त्वविनाशकाः क्रोधादिकषाया भवन्ति पश्चान्मोहकषायाभावे सति रागरहितं विशुद्धज्ञान लभसे त्वमित्यभिप्रायः । तथा चोक्तम्—"**तं वत्थुं मुत्तव्वं जं पडि उपज्जए कसायग्गी । तं वत्थुमल्लिएज्जो** (तद् वस्तु अगीकरोति, इति टिप्पणी) **जत्थुवसम्मो कसायाणं** ।।" ।।४२।।

**जिय ! जेण मणि कसाय हवंति, सो मोहु मिल्लहि । मोह कसाय विवज्जयउ पर समबोहु पावहि ।।४२।।** हे जीव ! जिस मोह से अथवा मोह उत्पन्न करने वाली वस्तु से मन मे कषाय उत्पन्न होती है, उस मोह को अथवा मोहनिमित्तक पदार्थ को तू छोड दे । मोह को छोड देने पर कषाय रहित हुआ तू नियम से रागद्वेषरहित ज्ञान को प्राप्त करेगा । **भावार्थ**—निर्मोह निजशुद्धात्मा के ध्यान मे निर्मोह-निजशुद्धात्मतत्त्व से विपरीत मोह को हे जीव ! तू छोड । जिस मोह से अथवा मोह-निमित्तक पदार्थ से कषायरहित परमात्मतत्त्वरूप ज्ञानानन्द स्वभाव के विनाशक क्रोधादि कषाय होते हैं, इन्ही से ससार है अत मोह और कषाय का अभाव होने पर ही रागादिरहित निर्मलज्ञान को तू प्राप्त कर सकेगा । ऐसा ही अन्यत्र भी कहा है—"मन-वचन-काय से उस वस्तु का परित्याग कर देना चाहिए जिससे कषायाग्नि उत्पन्न होती हो और उस वस्तु को अगीकार करना चाहिए जिससे कषायाग्नि शान्त होती हो । (भगवती आराधना २६२) ।।४२।।

अथ हेयोपादेयतत्त्व ज्ञात्वा परमोपशमे स्थित्वा येषां ज्ञानिनां स्वशुद्धात्मनि रतिस्त एव सुखिन इति कथयति—

अब कहते है कि हेयोपादेयतत्त्व को जानकर और परमशान्तभाव मे स्थित होकर जिन ज्ञानियो की स्वशुद्धात्मा मे रति हुई, वे ही सुखी है—

**तत्तातत्तु मुणेवि मणि जे थक्का सम-भावि ।**
**ते पर सुहिया इत्थु जगि जहँ रइ अप्प-सहावि ।।४३।।**

तत्त्वातत्त्व मत्वा मनसि ये स्थिता समभावे ।
ते परं सुखिन अत्र जगति येषा रति आत्मस्वभावे ।।४३।।

तत्तातत्तु इत्यादि । **तत्तातत्तु मुणेवि** अन्तस्तत्त्वं बहिस्तत्त्व मत्वा । क्व । **मणि** मनसि **जे** ये केचन वीतरागस्वसवेदनप्रत्यक्षज्ञानिनः **थक्का** स्थिता । क्व । **समभावि** परमोपशमपरिणामे **ते पर** त एव **सुहिया** सुखिन. **इत्थु जगि** अत्र जगति । के ते । **जहं रइ** येषा रति. । क्व । **अप्पसहावि** स्वकीयशुद्धात्मस्वभावे इति । तथाहि । यद्यपि व्यवहारेणानादिबन्धनबद्धं तिष्ठति तथापि शुद्धनिश्चयेन प्रकृतिस्थित्यनुभागप्रदेशबन्धरहित, यद्यप्यशुद्धनिश्चयेन प्रकृतशुभाशुभकर्मफलभोक्ता तथापि शुद्धद्रव्यार्थिकनयेन निज-

**शुद्धात्मतत्त्वभावनोत्थवीतरागपरमानन्दैकसुखामृतभोक्ता,** यद्यपि व्यवहारेण **कर्मक्षयानन्तरं मोक्षभाजनं भवति** तथापि शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन **सदा मुक्तमेव, यद्यपि** व्यवहारेणेन्द्रियजनितज्ञानदर्शनसहितं तथापि निश्चयेन सकल**विमलकेवलज्ञानदर्शनस्वभावं,** यद्यपि व्यवहारेण स्वोपात्तदेहमात्रं तथापि निश्चयेन लोकाकाशप्रमितासंख्येयप्रदेशं, यद्यपि व्यवहारेणोपसंहारविस्तारसहितं तथापि मुक्तावस्थायामुपसंहारविस्ताररहितं चरमशरीरप्रमाणप्रदेशं, यद्यपि पर्यायार्थिकनयेनोत्पादव्ययध्रौव्ययुक्तं तथापि द्रव्यार्थिकनयेन नित्यटङ्कोत्कीर्णज्ञायकैकस्वभावं निजशुद्धात्मद्रव्यं पूर्वं ज्ञात्वा तद्विलक्षणं परद्रव्यं च निश्चित्य पश्चात् समस्तमिथ्यात्वरागादिविकल्पत्यागेन **वीतरागचिदानन्दैकस्वभावे स्वशुद्धात्मतत्त्वे** ये रतास्त एव धन्या इति भावार्थः । तथा **चोक्तं** परमात्मतत्त्वलक्षणे **श्रीपूज्यपादस्वामिभिः**—"नाभावः सिद्धिरिष्टा, न निजगुणहतिस्तत् तपोभिर्न युक्ते , अस्त्यात्मानादिबद्धः, स्वकृतजफलभुक् तत्क्षयान्मोक्षभागी । ज्ञाता द्रष्टा स्वदेहप्रमितिरुपशमाहारविस्तारधर्मा, ध्रौव्योत्पत्तिव्ययात्मा स्वगुणयुत इतो नान्यथा साध्यसिद्धिः" ॥४३॥

**जे तत्तातत्तु मणि मुणेवि समभावि थक्का, जहँ रइ अप्प सहावि ते इत्थु जगि पर सुहिया ॥४३॥** जो कोई वीतराग स्वसंवेदनप्रत्यक्षज्ञानी जीव आराधने योग्य निज पदार्थ और त्यागने योग्य रागादि सकल विभावों को मन में जान कर शान्तभाव में ठहरते हैं और जिनकी प्रीति-लगन निज शुद्धात्मस्वभाव में हुई है, वे ही जीव इस संसार में सुखी हैं । **भावार्थ**-यद्यपि यह आत्मा व्यवहार नय से अनादिकाल से कर्मबन्धन में बँधा है तथापि शुद्धनिश्चयनय से प्रकृति, स्थिति, अनुभाग और प्रदेशबन्ध से रहित है, यद्यपि अशुद्ध निश्चयनय से स्वोपार्जित शुभ-अशुभ कर्मफल का भोक्ता है तथापि शुद्ध द्रव्यार्थिक नय से निज शुद्धात्मतत्त्व की भावना से उत्पन्न वीतराग परमानन्द सुखरूप अमृत का भोक्ता है । यद्यपि व्यवहारनय से कर्मों का क्षय होने के बाद मोक्ष का पात्र होता है तथापि शुद्ध पारिणामिक परमभावग्राहक शुद्ध द्रव्यार्थिकनय से सदा मुक्त ही है । यद्यपि व्यवहारनय से इन्द्रियजनित मति आदि क्षायोपशमिक ज्ञान और चक्षु आदि दर्शन सहित है तथापि निश्चयनय से सकल विमल केवलज्ञान और केवलदर्शन स्वभाव वाला है । यद्यपि व्यवहारनय से यह जीव नामकर्म से प्राप्त देहप्रमाण है तथापि निश्चयनय से लोकाकाशप्रमाण असंख्यातप्रदेशी है । यद्यपि व्यवहारनय से प्रदेशों के संकोचविस्तार सहित है तो भी सिद्धावस्था में संकोच-विस्तार से रहित चरम शरीर प्रमाण प्रदेशवाला है । यद्यपि पर्यायार्थिकनय से उत्पादव्ययध्रौव्य युक्त है तथापि द्रव्यार्थिकनय की अपेक्षा नित्य टंकोत्कीर्ण ज्ञान के अखण्ड स्वभाव से ध्रुव ही है । इस प्रकार पहले निज शुद्धात्मद्रव्य को अच्छी तरह जान कर और आत्मस्वरूप से विपरीत पुद्गलादि परद्रव्यों को भी अच्छी तरह निश्चय करके अर्थात् आप पर का निश्चय करके बाद में समस्त मिथ्यात्व रागादि विकल्पों को छोड़कर वीतराग चिदानन्द स्वभाव शुद्धात्मतत्त्व में जो लीन हुए हैं, वे ही धन्य हैं । ऐसा ही कथन परमात्मतत्त्व के लक्षण में **श्री पूज्यपाद स्वामी** ने सिद्धभक्ति में कहा है "यह आत्मा व्यवहारनय से अनादि का बँधा हुआ है और अपने किये हुए कर्मों के फल का भोक्ता है, उन कर्मों के क्षय से मोक्षपद का भोक्ता है, ज्ञाता है, देखने वाला है, अपनी देह के प्रमाण है, संसारावस्था में प्रदेशों के संकोच-विस्तार को धारण

करता है, उत्पादव्ययध्रौव्य सहित है और अपने गुणपर्याय से युक्त है। इस प्रकार से आत्मा को जानने से ही साध्य की सिद्धि है, अन्यथा नहीं ।।२।।" ।।४३।।

अथ योऽसावेवोपशमभावं करोति तस्य निन्दाद्वारेण स्तुतिं त्रिकलेन कथयति—

अब, जो इस प्रकार से उपशम भाव धारण करता है, तीन दोहों मे निन्दा द्वारा उसकी स्तुति करते हैं—

**बिण्णि वि दोस हवंति तसु जो सम-भाउ करेइ ।**
**बंधु जि णिहणइ अप्पणउ अणु जगु गहिलु करेइ ।।४४।।**

द्वौ अपि दोषौ भवतः तस्य यः समभाव करोति ।
बन्ध एव निहन्ति आत्मीय अन्यत् जगद् ग्रहिल करोति ।।४४।।

वंदउ इत्यादि। **वंदउ णिंदउ पडिकमउ** वन्दननिन्दनप्रतिक्रमण करोतु। **भाउ असुद्धउ जासु** भाव परिणाम न शुद्धो यस्य, **पर** पर नियमेन **तसु** तस्य पुरुषस्य **संजमु अत्थि णवि** सयमोऽस्ति नैव। कस्मान्नास्ति। **जं** यस्मात् कारणात् **मणसुद्धि ण तासु** मन शुद्धिर्न तस्येति। तद्यथा। नित्यानन्दैकरूपस्वशुद्धात्मानुभूतिप्रतिपक्षैर्विषयकषायाधीनैः ख्यातिपूजालाभादिमनोरथशतसहस्रविकल्पजालमालाप्रपञ्चोत्पन्नैरपध्यानैर्यस्य चित्त रञ्जित वासित तिष्ठति तस्य द्रव्यरूप वन्दननिन्दनप्रतिक्रमणादिकं कुर्वाणस्यापि भावसयमो नास्ति इत्यभिप्राय ॥६६॥

**वंदउ णिंदउ पडिकमउ जासु असुद्धउ भाउ तसु पर संजमु णवि अत्थि जं तासु ण मणसुद्धि ॥६६॥** चाहे वन्दना करो, चाहे निन्दा करो और चाहे प्रतिक्रमण लेकिन जिसके जबतक अशुद्ध परिणाम है, उसके नियम से सयम नही हो सकता क्योंकि उसके मन की शुद्धता नही है। जिसका मन शुद्ध नही, उसके सयम कहा से हो सकता है? नित्यानन्द एकरूप निजशुद्धात्मानुभूति के प्रतिपक्षी विषयकषायो के आधीन ख्याति पूजालाभादि सैकडो मनोरथो के विकल्पजालमाला के प्रपच से उत्पन्न अपध्यान (आर्त्त-रौद्र) मे जिसका चित्त रगा हुआ है, उसके द्रव्यरूप (व्यवहाररूप) वन्दना, निन्दा, प्रतिक्रमणादि करते हुए भी भावसयम नही होता है, यह **अभिप्राय है** ॥६६॥

एव मोक्षमोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये निश्चयनयेन पुण्यपापद्वय समानमित्यादिव्याख्यानमुख्यत्वेन चतुर्दशसूत्रस्थल समाप्तम्। अथानन्तर शुद्धोपयोगादिप्रतिपादनमुख्यत्वेनैकाधिकचत्वारिंशत्सूत्रपर्यन्त व्याख्यानं करोति। तत्रान्तरस्थलचतुष्टय भवति। तद्यथा। प्रथमसूत्रपञ्चकेन शुद्धोपयोगव्याख्यान करोति, तदनन्तरं पञ्चदशसूत्रपर्यन्त वीतरागस्वसवेदनज्ञानमुख्यत्वेन व्याख्यानम्, अत ऊर्ध्व सूत्राष्टकपर्यन्त परिग्रहत्यागमुख्यत्वेन व्याख्यान, तदनन्तर त्रयोदशसूत्रपर्यन्त केवलज्ञानादिगुणस्वरूपेण

सर्वे जीवाः समाना इति मुख्यत्वेन व्याख्यानं करोति । तद्यथा ।

इस प्रकार मोक्ष, मोक्षफल और मोक्षमार्गादि प्रतिपादक दूसरे महाधिकार मे निश्चयनय से पुण्य पाप दोनो समान हैं, इस व्याख्यान की मुख्यता से चौदह दोहे कहे । अब शुद्धोपयोगादि के प्रतिपादन की मुख्यता से ४१ दोहो में व्याख्यान करते हैं । उसमें चार अन्तरस्थल है—पहले पाँच दोहो मे शुद्धोपयोग का व्याख्यान करते है, उसके बाद १५ दोहो मे वीतराग स्वसवेदनज्ञान की मुख्यता से व्याख्यान है, इसमे आगे ८ दोहो मे परिग्रहत्याग की मुख्यता से कथन है, अनन्तर तेरह दोहो मे केवलज्ञानादिगुण स्वरूप से सब जीव समान है- इस मुख्यता से व्याख्यान किया गया है ।

रागादिविकल्पनिवृत्तिस्वरूपशुद्धोपयोगे सयमादय. सर्वे गुणास्तिष्ठन्तीति प्रतिपादयति—

अब कहते है कि रागादिविकल्प की निवृत्तिरूप शुद्धोपयोग मे सयमादि सब गुण रहते हैं —

**सुद्धहँ संजमु सीलु तउ सुद्धहँ दंसणु णाणु ।**
**सुद्धहँ कम्मक्खउ हवइ सुद्धउ तेण पहाणु ॥६७॥**

शुद्धाना सयम शील तप शुद्धाना दर्शन ज्ञानम् ।
शुद्धाना कर्मक्षयो भवति शुद्धो तेन प्रधान ॥६७॥

सुद्धह इत्यादि । **सुद्धहं** शुद्धोपयोगिनां **संजमु** इन्द्रियसुखाभिलाषनिवृत्तिबलेन षड्जीवनिकायहिंसानिवृत्तिबलेनात्मना आत्मनि संयमन नियमन संयमः स पूर्वोक्तः शुद्धोपयोगिनामेव । अथवोपेक्षासयमापहृतसयमौ वीतरागसरागापरनामानौ तावपि तेषामेव सभवत । अथवा सामायिकच्छेदोपस्थापनपरिहारविशुद्धिसूक्ष्मसपराययथाख्यात-भेदेन पञ्चधा सयम सोऽपि लभ्यते तेषामेव । **सीलु** स्वात्मना कृत्वा स्वात्मनिवृत्ति-वर्तन इति निश्चयव्रत, व्रतस्य रागादिपरिहारेण परिरक्षण निश्चयशीलं तदपि तेषामेव । **तउ** द्वादशविधतपश्चरणबलेन परद्रव्येच्छानिरोधं कृत्वा शुद्धात्मनि प्रतपन विजयन तप इति । तदपि तेषामेव । **सुद्धहं** शुद्धोपयोगिनां **दंसणु** छद्मस्थावस्थाया स्वशुद्धात्मनि रुचि-रूप सम्यग्दर्शन केवलज्ञानोत्पत्तौ सत्या तस्यैव फलभूत अनीहितविपरीताभिनिवेशरहित परिणामलक्षण क्षायिकसम्यक्त्व केवलदर्शन वा तेषामेव । **णाणु** वीतरागस्वसवेदनज्ञानं तस्यैव फलभूतं केवलज्ञान वा **सुद्धहं** शुद्धोपयोगिनामेव । **कम्मक्खउ** परमात्मस्वरूपोप-लब्धिलक्षणो द्रव्यभावकर्मक्षय **हवइ** तेषामेव भवति । **सुद्धउ** शुद्धोपयोगपरिणामस्तदा-धारपुरुषो वा **तेण पहाणु** येन कारणेन पूर्वोक्ता. सयमादयो गुणाः शुद्धोपयोगे लभ्यन्ते तेन कारणेन स एव प्रधान उपादेयः इति तात्पर्यम् । तथा चोक्तम् शुद्धोपयोगफलम्— **"सुद्धस्स य सामण्णं भणियं सुद्धस्स दंसणं णाणं । सुद्धस्स य णिव्वाणं सो च्चिय सुद्धो णमो तस्स ॥"** ॥६७॥

**सुद्धहँ संजमु सीलु तउ, सुद्धहँ दंसणु णाणु । सुद्धहँ कम्मक्खउ हवइ तेण सुद्धउ पहाणु ॥६७॥** शुद्धोपयोगियो के ही पाँच इन्द्रियो और छठे मन को रोकने रूप सयम, शील और तप होते है । **शुद्धों के ही सम्यग्दर्शन** और वीतरागस्वसंवेदनज्ञान होता है, शुद्धो के ही कर्मों का क्षय होता है, इसलिए **शुद्धोपयोग** ही जगत् मे प्रधान है । **भावार्थ**-शुद्धोपयोगियो के इन्द्रियमुख की अभिलाषा से निवृत्ति होने से तथा छह काय के जीवों की हिसा से निवृत्ति के बल से आत्मा का आत्मा मे निश्चल रहना, उसका नाम **संयम है** । अथवा **उपेक्षासंयम** अर्थात् तीन गुप्ति मे आरूढ और **अपहृत संयम** अर्थात् पाँच समितियों का पालन करना अथवा वीतरागसयम और **सरागसयम** भी उन शुद्धोपयोगियो के ही होता है । **अथवा** सामायिक, छेदोपस्थापन,परिहारविशुद्धि, मूक्ष्मसाम्पराय, यथाख्यात के भेद से पाँच प्रकार का **सयम** भी उन्ही के पाया जाता है । **शील** अर्थात् अपने से अपनी आत्मा मे प्रवृत्ति करना यह निश्चय शील है । रागादि के परिहार मे व्रत की रक्षा करना वह भी निश्चयशील है, यह भी उन्ही के होना है । बारह प्रकार के **तप** के बल से परद्रव्यो का इच्छानिरोध करके शुद्धात्मा मे प्रतपन करना, कामक्रोधादिशत्रुओ को विजय करना तप है, यह भी उन्ही के होना है । **दर्शन** अर्थात् छद्मावस्था मे निजशुद्धात्मा मे रुचिरूप सम्यग्दर्शन और केवलज्ञान की उत्पत्ति हो जाने पर उसके फलभूत सशय, विमोह, विभ्रम रहित निजपरिणामरूप क्षायिक सम्यक्त्व केवलदर्शन यह भी शुद्धोपयोगियों के ही होता है । **ज्ञान** अर्थात् बीतराग स्वसवेदनज्ञान और उसके फलभूत केवलज्ञान, वह भी शुद्धोपयोगियो के ही होना है और **कर्मक्षय** अर्थात् द्रव्यकर्म, भावकर्म और नोकर्म का नाश तथा परमात्मस्वरूप की प्राप्ति भी शुद्धोपयोगियों के ही होती है । अत शुद्धोपयोग परिणाम और उन परिणामो को धारण करने वाला पुरुष ही जगत् मे प्रधान है क्योंकि सयमादि सर्वगुण शुद्धोपयोग मे ही पाये जाते है अत शुद्धोपयोग के समान कोई अन्य उपादेय नही है, यह **तात्पर्य** जानना । अन्यत्र भी शुद्धोपयोग का फल इस प्रकार कहा है—"शुद्धोपयोगी के ही मुनिपना कहा गया है, उसी के दर्शन ज्ञान कहे है, उसी के निर्वाण है । वही शुद्ध अर्थात् रागादि रहित है, उसको हमारा नमस्कार है ।" (प्रवचनसार ३-७४) ॥६७॥

अथ निश्चयेन स्वकीयशुद्धभाव एव धर्म इति कथयति—

अब कहते है कि निश्चय मे अपना शुद्धभाव ही धर्म है—

**भाउ विसुद्धउ अप्पणउ धम्मु भणेविणु लेहु ।**
**चउ-गइ-दुक्खहँ जो धरइ जीउ पडंतउ एहु ॥६८॥**

भावो विशुद्ध आत्मीय धर्म भणित्वा लाहि ।
चतुर्गतिदु खेभ्य यो धरति जीव पतन्तमिमम् ॥६८॥

भाउ इत्यादि । **भाउ** भाव परिणाम । कथभूत: **विसुद्धउ** । विशेषेण शुद्धो मिथ्यात्वरागादिरहित. **अप्पणउ** आत्मीय **धम्मु भणेविणु लेहु** धर्म भणित्वा मत्वा प्रगृह्णीथा: । यो धर्म: कि करोति । **चउगइदुक्खहं जो धरइ** चतुर्गतिदु:खेभ्य· सकाशात् उद्धृत्य य. कर्ता धरति । क धरति । **जीउ पडंतउ एहु** जीवमिमं प्रत्यक्षीभूत ससारे पतन्तमिति । तद्यथा । धर्मशब्दस्य व्युत्पत्ति क्रियते । ससारे पतन्त प्राणिनमुद्धृत्य नरेन्द्रनागेन्द्रदेवेन्द्रवन्द्ये मोक्षपदे धरतीति धर्म इति धर्मशब्देनात्र निश्चयेन जीवस्य

शुद्धपरिणाम एव ग्राह्यः । तस्य तु मध्ये वीतरागसर्वज्ञप्रणीतनयविभागेन सर्वे धर्मा अन्तर्भूता लभ्यन्ते । तथा अहिंसालक्षणो धर्मः, सोऽपि जीवशुद्धभावं विना न सभवति । सागारानगारलक्षणो धर्मः सोऽपि तथैव उत्तमक्षमादिदशविधो धर्मः सोऽपि जीवशुद्ध-भावमपेक्षते । **'सदृष्टिज्ञानवृत्तानि धर्मं धर्मेश्वरा विदुः'** इत्युक्तं यद्धर्मलक्षणं तदपि तथैव । रागद्वेषमोहरहितः परिणामो धर्म. सोऽपि जीवशुद्धस्वभाव एव । वस्तुस्वभावो धर्म· सोऽपि तथैव । तथा चोक्तम्– **"धम्मो वत्थुसहावो"** इत्यादि । एवंगुणविशिष्टो धर्मश्चतुर्गतिदुःखेषु पतन्त धरतीति धर्मः । अत्राह शिष्यः । पूर्वसूत्रे भणितं शुद्धोपयोग-मध्ये संयमादय. सर्वे गुणा लभ्यन्ते । अत्र तु भणितमात्मन· शुद्धपरिणाम एव धर्म·, तत्र सर्वे धर्माश्च लभ्यन्ते । को विशेष. । परिहारमाह । तत्र शुद्धोपयोगसंज्ञा मुख्या, अत्र तु धर्मसंज्ञा मुख्या एतावान् विशेष । तात्पर्यं तदेव । तेन कारणेन सर्वप्रकारेण शुद्ध-परिणाम एव कर्तव्य इति भावार्थ. ॥६८॥

**विसुद्धउ भाउ अप्पणउ धम्मु भणेविणु लेहु । जो चउ गइ, दुक्खहँ पडंतउ एहु जीउ धरइ** ॥६८॥ मिथ्यात्वरागादि रहित शुद्ध परिणाम ही अपना है, इसे ही धर्म समझकर ग्रहण करो । यह आत्मधर्म ही चारो गतियो के दु खो मे ससार मे पडे हुए इस जीव को निकाल कर आनन्द स्थान मे रखता है । **भावार्थ**–धर्मशब्द की व्युत्पत्ति इस प्रकार है—ससार मे गिरते हुए प्राणी को उठा कर नरेन्द्र-नागेन्द्र-देवेन्द्रवन्द्य मोक्षपद मे धरना है, वह धर्म है । यहाँ धर्म शब्द से निश्चय से जीव का शुद्ध परिणाम ही ग्रहण करना चाहिए । इसमे नयविभाग से वीतरागसर्वज्ञप्रणीत सभी धर्म अन्तर्भूत हो जाते है । तथा अहिंसालक्षण वाला धर्म भी जीव के शुद्धभाव के बिना सम्भव नही है । सागार-अनगारलक्षण वाला धर्म भी और उत्तमक्षमादि दशविध धर्म भी जीव के शुद्धभाव की अपेक्षा रखता है । 'सम्यग्दर्शनज्ञानचारित्र को धर्म के ईश्वर भगवान ने धर्म कहा है ।' धर्म का जो यह लक्षण (आचार्यसमन्तभद्र रत्नकरण्डश्रावकाचार-३) कहा है, यह भी वैसा ही है । 'रागद्वेषमोह से रहित परिणाम धर्म है' यह भी जीव का शुद्धस्वभाव ही है । 'वस्तु का स्वभाव धर्म है ।' यह भी वही है । कहा भी है—'धम्मो वत्थु सहावो' (स्वामी कार्तिकेयानुप्रेक्षा-४७६) । इस प्रकार का गुणविशिष्ट धर्म चारों गतियो के दु खो में गिरते हुए जीव का उद्धार करता है । यहाँ शिष्य ने **प्रश्न** किया कि पूर्वदोहे मे कहा गया कि शुद्धोपयोग में संयमादिक सभी गुण मिल जाते है, यहाँ आपने कहा कि आत्मा का शुद्धपरिणाम ही धर्म है, उसमें सभी धर्म पाये जाते हैं तो इन दोनो में क्या भेद है । इसका उत्तर देते है कि यहाँ इतनी ही विशेषता जाननी कि वहाँ शुद्धोपयोग संज्ञा मुख्य है और यहाँ धर्मसज्ञा मुख्य है । तात्पर्य वही है । इसलिए सब प्रकार से शुद्धपरिणाम ही कर्त्तव्य है, यह भावार्थ है ॥६८॥

अथ विशुद्धभाव एव मोक्षमार्ग इति दर्शयति—

अब दिखलाते हैं कि शुद्धभाव ही मोक्ष का मार्ग है—

**सिद्धिहिँ केरा पंथडा भाउ विसुद्धउ एक्कु ।**
**जो तसु भावहँ मुणि चलइ सो किम होइ विमुक्कु ॥६९॥**

सिद्धे. संबन्धी पन्था: भावो विशुद्ध एक ।
य तस्माद्भावात् मुनिश्चलति स कथ भवति विमुक्त. ।।६९।।

सिद्धिहि इत्यादि । **सिद्धिहिं केरा** सिद्धेर्मुक्ते. सबन्धी **पंथडा** पन्था मार्ग: । **कोऽसौ । भाउ** भाव परिणाम· कथभूत । **विसुद्धउ** विशुद्ध: **एक्कु** एक एवाद्वितीय. । **जो तसु भावहं मुणि चलइ** यस्तस्माद्भावान्मुनिश्चलति । **सो किम होइ विमुक्क** स मुनि· कथं मुक्तो भवति न कथमपीति । तद्यथा । योऽसौ समस्तशुभाशुभसकल्पविकल्प-रहितो जीवस्य शुद्धभाव. स एव निश्चयरत्नत्रयात्मको मोक्षमार्ग । यस्तस्मात् शुद्धात्मपरिणामान्मुनिश्च्युतो भवति स कथं मोक्ष लभते किंतु नैव । अत्र येन कारणेन निज-शुद्धात्मानुभूतिपरिणाम एव मोक्षमार्गस्तेन कारणेन मोक्षार्थिना स एव निरन्तर कर्तव्य इति तात्पर्यार्थ. ।।६९।।

**सिद्धिहिं केरा पंथडा एक्कु विसुद्धउ भाउ । जो मुणि तसु भावहं चलइ सो किम विमुक्कु होइ ।।६९।।** मुक्ति का मार्ग एक शुद्धभाव ही है । जो मुनि उस शुद्धभाव से विचलित हो जावे तो वह कैसे मुक्त हो सकता है ? किसी प्रकार नहीं हो सकता । **भावार्थ**—जो समस्त शुभाशुभ सकल्प-विकल्पों से रहित जीव का शुद्धभाव है, वही निश्चयरत्नत्रय स्वरूप मोक्ष का मार्ग है । जो मुनि शुद्धातम परिणाम से च्युत हो जावे, वह कैसे मोक्ष पा सकता है ? नहीं पा सकता । इसलिए जब निज-शुद्धात्मानुभूतिपरिणाम ही मोक्षमार्ग है तो मोक्ष के इच्छुक को वही भाव हमेशा करना चाहिए ।।६९।।

**अथ** क्वापि देशे गच्छ किमप्यनुष्ठान कुरु तथापि चित्तशुद्धि विना मोक्षो नास्तीति प्रकटयति—

**अब** यह प्रकट करते हैं कि किसी भी देश मे जाओ, कुछ भी तप करो तो भी चित्त की शुद्धि के बिना मोक्ष नहीं होता है—

**जहिं भावइ तहिं जाहि जिय जं भावइ करि तं जि ।**
**केम्वइ मोक्खु ण अत्थि पर चित्तहं सुद्धि ण जं जि ।।७०।।**

यत्र भाति तत्र याहि जीव यद् भाति कुरु तदेव ।
कथमपि मोक्ष नास्ति पर चित्तस्य शुद्धिर्न यदेव ।।७०।।

जहि भावइ इत्यादि । **जहिं भावइ तहिं** यत्र देशे प्रतिभाति तत्र **जाहि** गच्छ **जिय** हे जीव । **जं भावइ करि तं जि** यदनुष्ठान प्रतिभाति कुरु तदेव । **केम्वइ मोक्खु ण अत्थि** कथमपि केनापि प्रकारेण मोक्षो नास्ति **पर** पर नियमेन । कस्मात् । **चित्तहं सुद्धि ण** चित्तस्य शुद्धिर्न **जं जि** यस्मादेव कारणात् इति । तथाहि । ख्याति-

पूजालाभदृष्टश्रुतानुभूतभोगाकांक्षारूपदुर्ध्यानैः शुद्धात्मानुभूतिप्रतिपक्षभूतैर्यावत्कालं चित्तं रञ्जितं मूर्च्छितं तन्मयं तिष्ठति तावत्काल हे जीव क्वापि देशान्तरं गच्छ किमप्यनुष्ठानं कुरु तथापि मोक्षो नास्तीति । अत्र कामक्रोधादिभिरपध्यानैर्जीवो भोगानुभव विनापि शुद्धात्मभावनाच्युतः सन् भावेन कर्माणि बध्नाति तेन कारणेन निरन्तरं चित्तशुद्धिः कर्तव्येति भावार्थः ।। तथा चोक्तम्—**"कंखिदकलुसिदभूदो हु कामभोगेहिं मुच्छिदो जीवो । णवि भुंजंतो भोगे बंधदि भावेण कम्माणि ।।"** ।।७०।।

**जिय ! जहिं भावइ तहिं जाहि जं भावइ तं जि करि, केम्वइ मोक्खु ण अत्थि पर चित्तहँ सुद्धि ण जं जि ।।७०।।** हे जीव ! जहाँ तेरी इच्छा हो, उसी देश में जा और जो अच्छा लगे वही कर, लेकिन जब तक मन की शुद्धि नही है, तब तक किसी तरह मोक्ष नही हो सकता । **भावार्थ**—ख्याति, पूजा, लाभ और दृष्ट-श्रुत-अनुभूतभोगो की आकांक्षारूप दुर्ध्यान से— जो शुद्धात्मानुभूति का प्रतिपक्षी है —जब तक यह चित्त रगा हुआ है अर्थात् विषय-कषायो से तन्मय है, तब तक हे जीव ! किसी देश मे जा, तीर्थादिको मे भ्रमण कर अथवा चाहे जैसा आचरण कर, किसी प्रकार मोक्ष नहीं है । भाव यह है कि काम-क्रोधादि खोटे ध्यान से यह जीव भोगों के सेवन बिना भी शुद्धात्मभावना से च्युत हुआ अशुद्ध भावो से कर्मो को बाँधना है अत हमेशा चित्त की शुद्धता रखनी चाहिए । ऐसा ही कथन अन्यत्र भी है—"इस लोक और परलोक के भोगो का अभिलाषी और कषायों से कालिमारूप हुआ अवर्तमान विषयो का वाछक और वर्तमान विषयो मे अत्यन्त आसक्त हुआ अति मोहित होने से भोगो को नही भोगता हुआ भी अशुद्ध भावो से कर्मो को बाँधता है" ।।७०।।

अथ शुभाशुभशुद्धोपयोगत्रय कथयति—

अब आगे शुभ, अशुभ और शुद्ध इन तीन उपयोगों के सम्बन्ध मे कहते है—

**सुह-परिणामें धम्मु पर असुहें होइ अहम्मु ।**
**दोहिँ वि एहिँ विवज्जियउ सुद्धु ण बंधइ कम्मु ।।७१।।**

शुभपरिणामेन धर्मः परं अशुभेन भवति अधर्मः ।
द्वाभ्यामपि एताभ्या विवर्जित शुद्धो न बध्नाति कर्म ।।७१।।

सुह इत्यादि पदखण्डनारूपेण व्याख्यान क्रियते । **सुहपरिणामें धम्मु पर** शुभपरिणामेन धर्मः पुण्य भवति मुख्यवृत्त्या । **असुहें होइ अहम्मु** अशुभपरिणामेन भवत्यधर्मः पापम् । **दोहिं वि एहिं विवज्जियउ** द्वाभ्यां एताभ्या शुभाशुभपरिणामाभ्यां विवर्जितः । कोऽसौ । **सुद्धु** शुद्धो मिथ्यात्वरागादिरहितपरिणामस्तत्परिणतपुरुषो वा । किं करोति । **ण बंधइ** न बध्नाति । किम् । **कम्मु** ज्ञानावरणादिकर्मेति । तद्यथा । कृष्णोपाधिपीतोपाधिस्फटिकवदयमात्मा क्रमेण शुभाशुभशुद्धोपयोगरूपेण परिणामत्रयं परिणमति । तेन तु मिथ्यात्वविषयकषायाद्यवलम्बनेन पापं बध्नाति । अर्हत्—सिद्धाचार्योपाध्याय-

साधुगुणस्मरणदानपूजादिना संसारस्थितिच्छेदपूर्वक तीर्थकरनामकर्मादिविशिष्टगुणपुण्यम-नीहितवृत्त्या बध्नाति । शुद्धात्मावलम्बनेन शुद्धोपयोगेन तु केवलज्ञानाद्यनन्तगुणरूपं मोक्षं च लभते इति । अत्रोपयोगत्रयमध्ये मुख्यवृत्त्या शुद्धोपयोग एवोपादेय इत्यभि-प्राय: ।।७१।। एवमेकचत्वारिंशत्सूत्रप्रमितमहास्थलमध्ये सूत्रपञ्चकेन शुद्धोपयोगव्या-ख्यानमुख्यत्वेन प्रथमान्तरस्थल गतम् ।

**सुह परिणामें धम्मु पर होइ असुहे अहम्मु, एहिँ दोहिँ वि विवज्जियउ सुद्धु कम्मु ण बंधइ ।।७१।।** शुभ परिणामो से पुण्यरूप व्यवहारधर्म होता है और अशुभ परिणामो से अधर्म (पाप) होता है। इन दोनो (पाप-पुण्य) मे रहित शुद्ध परिणाम वाला पुरुष कर्म नही बाँधता । **भावार्थ**–काले और पीले डक को धारण करने वाले स्फटिक के समान यह आत्मा क्रम मे अशुभ, शुभ और शुद्ध उपयोग रूप तीन परिणामो से परिणत होता है। उनमे से मिथ्यात्व, विषय-कषायादि के अवलम्बन से पाप बाँधता है। अरहन्त, सिद्ध, आचार्य, उपाध्याय और साधु इनके गुणस्मरण मे और दान-पूजादिक से ससार की स्थिति को छेदने वाली तीर्थकर नामकर्मादि विशिष्ट गुणरूप पुण्य-प्रकृतियो को अवाछक वृत्ति से बाँधता है। केवल शुद्धात्मा के अवलम्बन से, शुद्धोपयोग से उसी भव में केवलज्ञानादि अनन्त गुणरूप मोक्ष को प्राप्त करता है। यहाँ अभिप्राय यह है कि इन तीनो उपयोगो मे से मुख्यत शुद्धोपयोग ही उपादेय है ।।७१।। इसप्रकार ४१ दोहो के महास्थल मे पाँच दोहो मे शुद्धोपयोग के व्याख्यान की मुख्यता मे पहला अन्तरस्थल पूर्ण हुआ ।

अत ऊर्ध्वं तस्मिन्नेव महास्थलमध्ये पञ्चदशसूत्रपर्यन्त वीतरागस्वसवेदनज्ञानी-मुख्यत्वेन व्याख्यान क्रियते । तद्यथा—

अब आगे उसी महास्थल के अन्तर्गत पन्द्रह दोहो मे वीतराग स्वसवेदनज्ञान की मुख्यता से व्याख्यान कहते है

**दाणिं लब्भइ भोउ पर इंदत्तणु वि तवेण ।**
**जम्मण-मरण-विवज्जियउ पउ लब्भइ णाणेण ।।७२।।**

दानेन लभ्यते भोग पर इन्द्रत्वमपि तपसा ।
जन्ममरणविवर्जित पद लभ्यते ज्ञानेन ।।७२।।

दाणि इत्यादि । **दाणिं लब्भइ भोउ पर** दानेन लभ्यते पञ्चेन्द्रियभोग परं नियमेन । **इंदत्तणु वि तवेण** इन्द्रत्वमपि तपसा लभ्यते । **जम्मणमरणविवज्जियउ** जन्म-मरणविवर्जित **पउ** पद स्थान **लब्भइ** लभ्यते प्राप्यते । केन । **णाणेण** वीतरागस्वसवेदन-ज्ञानेनेति । तथाहि । आहाराभयभैषज्यशास्त्रदानेन सम्यक्त्वरहितेन भोगो लभ्यते । सम्यक्त्वसहितेन तु यद्यपि परपरया निर्वाण लभ्यते तथापि विविधाभ्युदरूप पञ्चेन्द्रिय-भोग एव । सम्यक्त्वसहितेन तपसा तु यद्यपि निर्वाण लभ्यते तथापि देवेन्द्रचक्रवर्त्यादि-

**विभूतिपूर्वकेणैव** । वीतरागस्वसंवेदनसम्यग्ज्ञानेन सविकल्पेन **यद्यपि देवेन्द्रचक्रवर्त्यादि-विभूतिविशेषो** भवति तथापि निर्विकल्पेन मोक्ष एवेति । **अत्राह प्रभाकरभट्टः** । हे भगवान् यदि विज्ञानमात्रेण मोक्षो भवति तर्हि सांख्यादयो वदन्ति ज्ञानमात्रादेव मोक्ष. तेषा किमिति दूषण दीयते भवद्भिरिति । भगवानाह । अत्र वीतरागनिर्विकल्पस्वसंवेदनसम्यग्ज्ञानमिति भणित तिष्ठति तेन वीतरागविशेषणेन चारित्र लभ्यते सम्यग्विशेषणेन सम्यक्त्वमपि लभ्यते पानकवदेकस्यापि मध्ये त्रयमस्ति । तेषा मते तु वीतरागविशेषणं नास्ति सम्यग्विशेषणं च नास्ति ज्ञानमात्रमेव । तेन दूषण भवतीति भावार्थ ।।७२।।

**दाणिं पर भोउ लब्भइ, तवेण वि इंदत्तणु । णाणेण जम्मण-मरण-विवज्जियउ पउ लब्भइ** ।।७२।। दान से नियमत. पञ्चेन्द्रियो के भोगो की प्राप्ति होती है और तप से इन्द्र का पद मिलता है तथा वीतरागस्वसंवेदनज्ञान से जन्म-जरा-मरण मे रहित पद यानी मोक्षपद मिलता है । **भावार्थ**—आहार, अभय, औषध और शास्त्रदान से- यदि सम्यक्त्व रहित है तो—भोगभूमि के भोग मिलते है । सम्यक्त्वसहित हो तो परम्परा मे मोक्ष मिलता है और पहले विविध अभ्युदय रूप पचेन्द्रियों के भोग मिलते है । सम्यक्त्वसहित तपसे यद्यपि निर्वाण प्राप्त होता है तथापि पहले देवेन्द्र-चक्रवर्त्यादि की विभूति मिलती है । वीतरागस्वसंवेदन सम्यग्ज्ञान से सविकल्प होने पर यद्यपि देवेन्द्र चक्रवर्त्यादि की विशेष विभूति होती है तथापि निर्विकल्प होने पर मोक्ष ही होता है । यहाँ प्रभाकरभट्ट **प्रश्न** करते है—हे भगवन् ! यदि ज्ञान मात्र से ही मोक्ष होता है तो सांख्यादिक भी ज्ञानमात्र से मोक्ष मानते है, फिर आप उन्हे दूषण क्यो देते है ? श्री गुरु **उत्तर** देते है—यहाँ जो वीतराग निर्विकल्पस्वसंवेदन सम्यग्ज्ञान कहा गया है उसमे वीतरागविशेषण से चारित्र आता है और सम्यग् विशेषण से सम्यक्त्व भी आ जाता है । जैसे पानक रस मे एक मे ही तीन वस्तुएँ होती है । उन सांख्यो के मत मे न तो वीतराग विशेषण है और न सम्यक् विशेषण है, केवल ज्ञान मात्र ही है, इसलिए उसमे दोष आता है ।।७२।।

अथ तमेवार्थं विपक्षदूषणद्वारेण द्रढयति--

अब इसी अर्थ को विपक्षी को दूषण देकर दृढ करते है—

**देउ णिरंजणु इउँ भणइ णाणिँ मुक्खु ण भंति ।**
**णाण-विहीणा जीवडा चिरु संसारु भमंति ।।७३।।**

देव निरञ्जन एव भणति ज्ञानेन मोक्षो न भ्रान्ति ।
ज्ञानविहीना जीवा. चिर ससार भ्रमन्ति ।।७३।।

देउ इत्यादि **देउ** देव किंविशिष्ट. । **णिरंजणु** निरञ्जनः अनन्तज्ञानादिगुणसहितोऽष्टादशदोषरहितश्च **इउं भणइ** एवं भणति । एवं किम् । **णाणिँ मुक्खु** वीतरागनिर्विकल्पस्वसंवेदनरूपेण सम्यग्ज्ञानेन मोक्षो भवति । **ण भंति** न भ्रांतिः संदेहो नास्ति । **णाणविहीणा जीवडा** पूर्वोक्तस्वसंवेदनज्ञानेन विहीना जीवा **चिरु संसारु भमंति** चिरं

बहुतरं कालं संसारं परिभ्रमन्ति इति । अत्र वीतरागस्वसंवेदनज्ञानमध्ये यद्यपि सम्यक्त्वादित्रयमस्ति तथापि सम्यग्ज्ञानस्यैव मुख्यता । विवक्षितो मुख्य इति वचनादिति भावार्थः ।।७३।।

**णिरंजणु देउ इउँ भणइ णाणिं मुक्खु, ण भंति । णाणविहीणा जीवडा चिरु संसारु भमंति ।।७३।।** अनन्तज्ञानादि गुण सहित और अठारह दोष रहित वीतराग सर्वज्ञदेव ऐसा कहते हैं कि वीतरागनिर्विकल्प स्वसंवेदनरूप सम्यग्ज्ञान से ही मोक्ष होता है, इसमें कोई सन्देह नहीं है । स्वसंवेदनज्ञान से रहित जो जीव है, वे बहुत काल तक संसार में भटकते है । **भावार्थ**—यहाँ वीतराग स्वसंवेदनज्ञान में यद्यपि सम्यक्त्वादि (सम्यग्दर्शन-ज्ञान-चारित्र) तीनो है तो भी सम्यग्ज्ञान की ही मुख्यता है । क्योंकि जिसका कथन किया जावे, जो विवक्षित है वह मुख्य होता है, अन्य गौण होता है ।।७३।।

अथ पुनरपि तमेवार्थं दृष्टान्तदार्ष्टान्तिकाभ्यां निश्चिनोति—

पुनः इसी अर्थ को दृष्टान्त और दार्ष्टान्त से निश्चित करते है—

**णाण-विहीणहँ मोक्ख-पउ जीव म कासु वि जोइ ।**
**बहुएँ सलिल-विरोलियइँ करु चोप्पडउ ण होइ ।।७४।।**

ज्ञानविहीनस्य मोक्षपदं जीव मा कस्यापि अद्राक्षीः ।
बहुना सलिलविलोडितेन करः चिक्कणो न भवति ।।७४।।

णाण इत्यादि । **णाणविहीणहं** ख्यातिपूजालाभादिदुष्टभावपरिणतचित्तं मम कोऽपि न जानातीति मत्वा वीतरागपरमानन्दैकसुखरसानुभवरूपं चित्तशुद्धिमकुर्वाणस्य-बहिरङ्गबकवेषेण लोकरञ्जनं मायास्थानं तदेव शल्यं तत्प्रभृतिसमस्तविकल्पकल्लोलमालात्यागेन निजशुद्धात्मसंवित्तिनिश्चयेन सज्ज्ञानेन सम्यग्ज्ञानेन बिना **मोक्खपउ** मोक्षपदं स्वरूपं **जीव** हे जीव **म कासु वि जोइ** मा कस्याप्यद्राक्षीः । दृष्टान्तमाह । **बहुएं सलिलविरोलियइं** बहुनापि सलिलेन मथितेन **करु** करो हस्तः **चोप्पडउ ण होइ** चिक्कनः स्निग्धो न भवतीति । अत्र यथा बहुतरमपि सलिले मथितेऽपि हस्तः स्निग्धो न भवति, तथा वीतरागशुद्धात्मानुभूतिलक्षणेन ज्ञानेन विना बहुनापि तपसा मोक्षो न भवतीति तात्पर्यम् ।।७४।।

**जीव ! णाणविहीणहँ कासु वि मोक्ख पउ म जोइ । बहुएँ सलिलविरोलियइँ करु चोप्पडउ ण होइ ।।७४।।** हे जीव ! जो सम्यग्ज्ञान से रहित मलिन चित्त है, अपनी ख्याति, प्रतिष्ठा लाभादि दुष्टभावो से जिसका चित्त परिणत हुआ है और मन में ऐसा जानता है कि हमारी दुष्टता को कोई नहीं जान सकता, ऐसा समझ कर वीतराग परमानन्द सुखरस के अनुभवरूप चित्त की शुद्धि नहीं करता तथा बाहर से लोकरंजन के लिए मायाचाररूप बगुले का वेष धारण किया है, ऐसी ही समस्त विकल्प तरंगो के त्याग से निजशुद्धात्म संवित्तिरूप सम्यग्ज्ञान के बिना किसी अज्ञानी

के मोक्ष मत देख अर्थात् बिना सम्यग्ज्ञान के मोक्ष नहीं होता। दृष्टान्त कहते है—बहुत पानी के मथने से भी हाथ चिकना नही होता, जैसे-बहुत जल केमथने पर भी हाथ चिकना नही होता है वैसे ही वीतराग शुद्धात्मानुभूतिलक्षण वाले ज्ञान के बिना बहुत तपस्या से भी मोक्ष नही होता है, यह तात्पर्य है ।।७४।।

अथ निश्चयनयेन यन्निजात्मबोधज्ञानबाह्यं ज्ञानं तेन प्रयोजनं नास्तीत्यभिप्रायं मनसि सप्रधार्य सूत्रमिदं प्रतिपादयति—

आगे निश्चयनय की अपेक्षा जो आत्मज्ञान से बाह्य (अन्य पदार्थों का) ज्ञान है, उससे प्रयोजन नही सधता, यह अभिप्राय मन में रखकर यह दोहा कहते हैं —

**जं णिय-बोहहँ बाहिरउ णाणु वि कज्जु ण तेण ।**
**दुक्खहँ कारणु जेण तउ जीवहँ होइ खणेण ।।७५।।**

यत् निजबोधाद्बाह्यं ज्ञानमपि कार्यं न तेन ।
दुःखस्य कारणं येन तपः जीवस्य भवति क्षणेन ।।७५।।

जं इत्यादि । **जं** यत् **णियबोहहं बाहिरउ** दानपूजातपश्चरणादिकं कृत्वापि दृष्टश्रुतानुभूतभोगाकांक्षावासितचित्तेन रूपलावण्यसौभाग्यबलदेववासुदेवकामदेवेन्द्रादिपदप्राप्तिरूप-भावि-भोगाशाकरणं यन्निदानबन्धस्तदेव शल्यं तत्प्रभृतिसमस्तमनोरथविकल्पज्वालावलीरहितत्वेन विशुद्धज्ञानदर्शनस्वभावनिजात्मावबोधो निजबोधः तस्मान्निजबोधाद्बाह्यम् । **णाणु वि कज्जु ण तेण** शास्त्रादिजनितं ज्ञानमपि यत्तेन कार्यं नास्ति । कस्मादिति चेत् । **दुक्खहं कारणु** दुःखस्य कारणं **जेण** येन कारणेन **तउ** वीतरागस्वसंवेदनरहितं तपः **जीवहं** जीवस्य **होइ** भवति **खणेण** क्षणमात्रेण कालेनेति । अत्र यद्यपि शास्त्रजनितं ज्ञानं स्वशुद्धात्मपरिज्ञानरहितं तपश्चरणं च मुख्यवृत्त्या पुण्यकारणं भवति तथापि मुक्तिकारणं न भवतीत्यभिप्रायः ।।७५।।

**जं णियबोहहँ बाहिरउ णाणु वि तेण कज्जु ण । जेण तउ खणेण जीवहँ दुक्खहँ कारणु होइ ।।७५।।** जो आत्मज्ञान से बाह्य (रहित) शास्त्र वगैरह का ज्ञान भी है, उस ज्ञान से कुछ काम नही क्योंकि वीतरागस्वसंवेदनज्ञानरहित तप शीघ्र ही जीव के लिए दुःख का कारण होता है। **भावार्थ**— दान-पूजा-तपश्चरण करके भी देखे-सुने और अनुभूत भोगो की आकांक्षा से ग्रस्त चित्त से रूप, लावण्य, सौभाग्य, बलदेव, वासुदेव, कामदेव, इन्द्रादिपद-प्राप्तिरूप भावी भोगो की आशा करने से जो निदानबन्ध रूप शल्य है, उसको आदि ले समस्त मनोरथो के विकल्पजालरूपी अग्नि की ज्वालाओं से रहित जो विशुद्धज्ञानदर्शन स्वभाव वाला निज आत्मावबोधक निजज्ञान सम्यग्ज्ञान है, उससे रहित बाह्यपदार्थों का शास्त्रादिजनितज्ञान किसी काम का नही। कार्य तो एक आत्मा के जानने से है। आत्मज्ञान से रहित जो शास्त्र का ज्ञान और तपश्चरणादि है, उनसे मुख्यतया पुण्य का बन्ध होता है। अज्ञानियों का तप और श्रुत यद्यपि पुण्य का कारण है, तो भी मोक्ष का कारण नही है ।।७५।।

अथ येन मिथ्यात्वरागादिवृद्धिर्भवति तदात्मज्ञान न भवतीति निरूपयति—

अब कहते हैं कि जिससे मिथ्यात्व-रागादि की वृद्धि हो, वह आत्मज्ञान नहीं है—

**तं णिय-णाणु जि होइ ण वि जेण पवड्ढइ राउ ।**
**दिणयर-किरणहँ पुरउ जिय किं विलसइ तम-राउ ।।७६।।**

तत् निजज्ञानमेव भवति नापि येन प्रवर्धते राग ।
दिनकरकिरणाना पुरत जीव किं विलसति तमोराग ।।७६।।

तं इत्यादि । **तं** तत् **णियणाणु जि होइ ण वि** निजज्ञानमेव न भवति वीतराग-नित्यानन्दैकस्वभावनिजपरमात्मतत्त्वपरिज्ञानमेव न भवति । येन ज्ञानेन किं भवति । **जेण पवड्ढइ** येन प्रवर्धते । कोऽसौ । **राउ** शुद्धात्मभावनासमुत्पन्नवीतरागपरमानन्दप्रति-बन्धकपञ्चेन्द्रियविषयाभिलापराग । अत्र दृष्टान्तमाह । **दिणयरकिरणहं पुरउ जिय** दिनकरकिरणानां पुरतो हे जीव **किं विलसइ** किं विलसति किं शोभते अपि तु नैव । कोऽसौ । **तमराउ** तमोरागस्तमोव्याप्तिरिति । अत्रेद तात्पर्यम् । यस्मिन् शास्त्राभ्यासज्ञाने जातेऽप्यनाकुलत्वलक्षणपारमार्थिकसुखप्रतिपक्षभूता आकुलत्वोत्पादका रागादयो वृद्धि गच्छन्ति तन्निश्चयेन ज्ञानं न भवति । कस्मात् । विशिष्टमोक्षफलाभावादिति ।।७६।।

**जिय ! तं णिय णाणु जि ण वि होइ जेण राउ पवड्ढइ, दिणयर किरणहँ पुरउ तमराउ किं विलसइ ।।७६।।** हे जीव ! वह वीतराग नित्यानन्द अखण्डस्वभाव परमात्मतत्त्व का परिज्ञान ही नहीं है जिससे परद्रव्य मे प्रीति-राग की वृद्धि हो, सूर्य की किरणो के आगे अन्धकार का फैलाव कैसे शोभायमान हो सकता है ? नहीं हो सकता । **भावार्थ**—शुद्धात्मा की भावना से उत्पन्न जो वीतराग परम आनन्द, उसके शत्रु पचेन्द्रियों के विषयो की अभिलाषा जिसमे हो, वह निज (आत्म) ज्ञान नहीं है, अज्ञान ही है । जहाँ वीतरागभाव है, वहाँ सम्यग्ज्ञान है । जैसे सूर्य के प्रकाश के आगे अँधेरा नहीं शोभा देता, वैसे ही आत्मज्ञान मे विषयो की अभिलाषा (इच्छा) नहीं शोभती । शास्त्र का ज्ञान होने पर भी जो निराकुलता न हो और आकुलता के उपजाने वाले आत्मीक सुख के वैरी रागा-दिक जो वृद्धि को प्राप्त हो, तो वह ज्ञान किस काम का ? ज्ञान तो वह है जिससे आकुलता मिट जावे । बाह्य पदार्थों का ज्ञान मोक्षफल के अभाव से कार्यकारी नहीं है ।।७६।।

अथ ज्ञानिना निजशुद्धात्मस्वरूप विहाय नान्यत्किमप्युपादेयमिति दर्शयति—

अब कहते है कि ज्ञानी जीवो के निज शुद्धात्मभाव के बिना अन्य कुछ भी आदरने योग्य नहीं है—

**अप्पा मिल्लिवि णाणियहँ अण्णु ण सुंदरु वत्थु ।**
**तेण ण विसयहँ मणु रमइ जाणंतहँ परमत्थु ।।७७।।**

आत्मानं मुक्त्वा ज्ञानिनां अन्यन्न सुन्दर वस्तु ।
तेन न विषयेषु मनो रमते जानता परमार्थम् ।।७७।।

अप्पा इत्यादि । **अप्पा मिल्लिवि** शुद्धबुद्धैकस्वभावं परमात्मपदार्थं मुक्त्वा **णाणियहं** ज्ञानिनां मिथ्यात्वरागादिपरिहारेण निजशुद्धात्मद्रव्यपरिज्ञानपरिणतानां **अण्णु ण सुंदरु वत्थु** अन्यन्न सुन्दरं समीचीन वस्तु प्रतिभाति येन कारणेन **तेण ण विसयहं मणु रमइ** तेन कारणेन शुद्धात्मोपलब्धिप्रतिपक्षभूतेषु पञ्चेन्द्रियविषयरूपकामभोगेषु मनो न रमते । किं कुर्वताम् । **जाणंतहं** जानतां **परमत्थु** वीतरागसहजानन्दैकपारमार्थिकसुखाविनाभूत परमात्मानमेवेति तात्पर्यम् ।।७७।।

**अप्पा मिल्लिवि णाणियहँ अण्णु वत्थु सुंदरु ण । तेण परमत्थु जाणंतहँ मणु विसयहँ ण रमइ ।।७७।।** आत्मा--शुद्धबुद्धैकस्वभाव परमात्म पदार्थ को छोडकर ज्ञानियो को अन्य वस्तु अच्छी नही लगती, इसलिए परमात्मपदार्थ को जानने वालो का मन विषयो मे नही लगता । **भावार्थ**–मिथ्यात्वरागादि के परिहार मे तथा निज शुद्धात्म द्रव्य के यथार्थ ज्ञान से जिनका चित्त परिणत हो गया है ऐसे ज्ञानियो को शुद्धबुद्ध परम स्वभाव परमात्मा को छोडकर अन्य कोई भी वस्तु सुन्दर नही भासती । इसलिए उनका मन पचेन्द्रियो के विषयरूप कामभोगो मे नही रमता ।।७७।।

अथ तमेवार्थं दृष्टान्तेन समर्थयति---

*अब इसी अर्थ का दृष्टान्त मे समर्थन करते है --*

**अप्पा मिल्लिवि णाणमउ चित्ति ण लग्गइ अण्णु ।**
**मरगउ जें परियाणियउ तहुँ कच्चें कउ गण्णु ।।७८।।**

आत्मानं मुक्त्वा ज्ञानमयं चित्ते न लगति अन्यत् ।
मरकतं येन परिज्ञातं तस्य काचेन कुतो गणना ।।७८।।

अप्पा इत्यादि । **अप्पा मिल्लिवि** आत्मानं मुक्त्वा । कथंभूतम् । **णाणमउ** ज्ञानमयं केवलज्ञानान्तर्भूतानन्तगुणमयं **चित्ति** मनसि **ण लग्गइ** न लगति न रोचते न प्रतिभाति । किम् । **अण्णु** निजपरमात्मस्वरूपादन्यत् । अत्रार्थे दृष्टान्तमाह । **मरगउ जें परियाणियउ** मरकतरत्नविशेषो येन परिज्ञातः । **तहुँ** तस्य रत्नपरीक्षापरिज्ञानसहितस्य पुरुषस्य **कच्चें कउ गण्णु** काचेन किं गणनं किमपेक्षा तस्येत्यभिप्रायः ।।७८।।

**णाणमउ अप्पा मिल्लिवि अण्णु चित्ति ण लग्गइ । जें मरगउ परियाणियउ तहुँ कच्चें कउ गण्णु ।।७८।।** केवलज्ञानादि अनन्त गुणयुक्त आत्मा को छोडकर अन्य कोई वस्तु ज्ञानियो के चित्त को नही रुचती । जिसने मरकतमणि जान लिया उसको काँच से क्या प्रयोजन है ? **भावार्थ**–जिसने रत्न पा लिया उसको काँचखण्डो की क्या जरूरत है ? उसी तरह जिसका चित्त आत्मा मे लग गया, उसे दूसरे पदार्थों की आकाक्षा नहीं रहती ।।७८।।

अथ कर्मफलं भुञ्जानः सन् योऽसौ रागद्वेषं करोति स कर्म बध्नातीति कथयति---

अब कहते हैं कि कर्मफल को भोगता हुआ जो रागद्वेष करता है, वह कर्म बाँधता है—

**भुंजंतु वि णिय-कम्म-फलु मोहइँ जो जि करेइ ।**
**भाउ असुंदरु सुंदरु वि सो पर कम्मु जणेइ ॥७९॥**

भुञ्जानोऽपि निजकर्मफलं मोहेन य एव करोति ।
भावं असुन्दरं सुन्दरमपि स परं कर्म जनयति ॥७९॥

भुंजंतु वि इत्यादि । **भुंजंतु वि** भुञ्जानोऽपि । किम् **णियकम्मफलु** वीतरागपरमाह्लादरूपशुद्धात्मानुभूतिविपरीतं निजोपार्जितं शुभाशुभकर्मफलं **मोहइं** निर्मोहशुद्धात्मप्रतिकूलमोहोदयेन **जो जि करेइ** य एव पुरुषः करोति । कम् । **भाउ** भावं परिणामम् । किंविशिष्टम् । **असुंदरु सुंदरु वि** अशुभं शुभमपि **सो पर** स एव भावं **कम्मु जणेइ** शुभाशुभं कर्म जनयति । अयमत्र भावार्थः उदयागते कर्मणि योऽसौ स्वस्वभावच्युतः सन् रागद्वेषौ करोति स एव कर्म बध्नाति ॥७९॥

**जो जि णियकम्मफलु भुंजतु वि मोहइँ असुंदरु सुंदरु वि भाउ करेइ सो पर कम्मु जणेइ ॥७९॥** जो जीव अपने कर्मों के फल को भोगता हुआ भी मोह से भले और बुरे परिणाम करता है, वह केवल कर्म ही बाँधता है। **भावार्थ**—वीतराग परम आह्लादरूप शुद्धात्मा की अनुभूति से विपरीत अशुद्ध रागादिक विभाव से उपार्जित शुभ-अशुभ कर्मों के फल को भोगता हुआ जो अज्ञानी जीव मोह के उदय से हर्ष-विषाद भाव करता है, वह नये कर्मों का बंध करता है। साराश यह है कि जो निज-स्वभाव से च्युत हुआ उदय में आये हुए कर्मों में रागद्वेष करता है, वही कर्म बाँधता है ॥७९॥

अथ उदयागते कर्मानुभवे योऽसौ रागद्वेषौ न करोति स कर्म न बध्नातीति कथयति—

अब कहते हैं कि जो उदयागत कर्मों के अनुभव में रागद्वेष नहीं करता है, वह कर्म नहीं बाँधता—

**भुंजंतु वि णिय-कम्म-फलु जो तहिँ राउ ण जाइ ।**
**सो णवि बंधइ कम्मु पुणु संचिउ जेण विलाइ ॥८०॥**

भुञ्जानोऽपि निजकर्मफलं यः तत्र रागं न याति ।
स नैव बध्नाति कर्म पुनः संचितं येन विलीयते ॥८०॥

भुंजतु वि इत्यादि । **भुंजंतु वि** भुञ्जानोऽपि । किम् । **णियकम्मफलु** निजकर्मफलं निजशुद्धात्मोपलम्भाभावेनोपार्जितं पूर्वं यत् शुभाशुभं कर्म तस्य फलं **जो** यो जीवः **तहिं** तत्र कर्मानुभवप्रस्तावे **राउ ण जाइ** रागं न गच्छति वीतरागचिदानन्दैकस्वभावशुद्धात्मतत्त्वभावनोत्पन्नसुखामृततृप्तः सन् रागद्वेषौ न करोति **सो** स जीवः **णवि बंधइ**

नैव बध्नाति । किं न बध्नाति । **कम्मु** ज्ञानावरणादि कर्म पुणु पुनरपि । येन कर्मबन्धाभावपरिणामेन किं भवति । **संचिउ जेण विलाइ** पूर्वसंचितं कर्म येन वीतरागपरिणामेन विलयं विनाशं गच्छतीति । अत्राह **प्रभाकरभट्टः** । कर्मोदयफल भुञ्जानोऽपि ज्ञानी कर्मणापि न बध्यते इति **सांख्या**दयोऽपि वदन्ति तेषां किमिति दूषण दीयते भवद्भिरिति । भगवानाह । ते निजशुद्धात्मानुभूतिलक्षणं वीतरागचारित्रनिरपेक्षा वदन्ति तेन कारणेन तेषां दूषणमिति तात्पर्यम् ।

**णियकम्मफलु भुंजंतु वि तहिं जो राउ ण जाइ, सो पुणु कम्मु णवि बंधइ, जेण संचिउ विलाइ ।।८०।।** अपने कर्मों के फल को भोगते हुए भी उसमे जो जीव रागद्वेष नही करता, वह फिर नवीन कर्म नही बाँधता और इससे पहले बाँधे हुए कर्म भी नष्ट हो जाते है । **भावार्थ**—निजशुद्धात्मा के ज्ञानाभाव से उपार्जित शुभ-अशुभ कर्मों के फल को भोगते हुए भी वीतराग चिदानन्द परमस्वभावरूप शुद्धात्मतत्त्व की भावना से उत्पन्न अतीन्द्रिय सुखरूप अमृत से तृप्त होते हुए जो जीव रागीद्वेषी नही होता, वह फिर नवीन ज्ञानावरणादि कर्मो को नही बाँधता । नवीन कर्मों के बध का अभाव होने से पूर्वबद्ध कर्मो की निर्जरा ही होती है । यहाँ प्रभाकरभट्ट **प्रश्न** करते हैं— हे प्रभो ! कर्म के फल को भोगता हुआ भी ज्ञानी कर्मों से नही बँधता—ऐसा तो सांख्यादिक भी कहते है, फिर उन्हे क्यो दोष दिया जाता है ? गुरुदेव इसका **उत्तर** देते है कि सांख्यादिक निज शुद्धात्मानुभूति का कथन वीतरागचारित्र से निरपेक्ष कहते है, इस कारण उनको दोष दिया जाता है ।।८०।।

अथ यावत्कालमणुमात्रमपि राग न मुञ्चति तावत्काल कर्मणा न मुच्यते इति प्रतिपादयति—

अब कहते है कि जब तक जीव परमाणु जितने भी राग को नहीं छोडता है तब तक कर्मों से नही छूटता है—

**जो अणु-मेत्तु वि राउ मणि जाम ण मिल्लइ एत्थु ।**
**सो णवि मुच्चइ ताम जिय जाणंतु वि परमत्थु ।।८१।।**

य अणुमात्रमपि रागं मनसि यावत् न मुञ्चति अत्र ।
स नैव मुच्यते तावत् जीव जानन्नपि परमार्थम् ।।८१।।

**जो** इत्यादि । **जो** यः कर्ता **अणुमेत्तु वि** अणुमात्रमपि सूक्ष्ममपि **राउ** **रागं** वीतरागसदानन्दैकशुद्धात्मनो विलक्षणं पञ्चेन्द्रियविषयसुखाभिलाषरागं **मणि** मनसि **जाम ण मिल्लइ** यावन्त काल न मुञ्चति **एत्थु** अत्र जगति **सो णवि मुच्चइ** स जीवो नैव मुच्यते ज्ञानावरणादिकर्मणा **ताम** तावन्तं कालं **जिय** हे जीव । किं कुर्वन्नपि । **जाणंतु वि** वीतरागानुष्ठानरहितः सन् शब्दमात्रेण जानन्नपि । क जानन् । **परमत्थु** परमार्थशब्दवाच्यनिजशुद्धात्मतत्त्वमिति । अयमत्र भावार्थः । निजशुद्धात्मस्वभावज्ञानेऽपि

शुद्धात्मोपलब्धिलक्षणवीतरागचारित्रभावना बिना मोक्षं न लभत इति ।।८१।।

**जो अणुमेत्तु वि राउ मणि जाम एत्थु ण मिल्लइ ताम जिय परमत्थु जाणंतु वि णवि मुच्चइ ।।८१।।** जो जीव अणुमात्र भी राग यानी जरा सा भी राग, यदि है तो जब तक उसे मनमें से नही निकाल देता है तब तक हे जीव ! निज शुद्धात्मतत्त्व को जानते हुए भी ज्ञानावरणादि कर्मों से नही छूटता है। **भावार्थ**--जो जीव वीतराग सदानन्दरूप शुद्धात्मभाव से रहित पञ्चेन्द्रियो के विषयों की सुखाभिलाषारूप राग मन में रखता है वह आगमज्ञान से आत्मा को शब्दमात्र जानता हुआ भी वीत-रागचारित्र की भावना के बिना मोक्ष नही पा सकता ।।८१।।

अथ निर्विकल्पात्मभावनाशून्य शास्त्र पठन्नपि तपश्चरणं कुर्वन्नपि परमार्थ न वेत्तीति कथयति—

अब कहते है कि जो निर्विकल्प आत्मभावना से रहित है वह शास्त्र पढ़ते हुए भी और तपश्चरण करते हुए भी परमार्थ को नही जानता है—

**बुज्झइ सत्थइँ तउ चरइ पर परमत्थु ण वेइ ।**
**ताव ण मुंचइ जाम णवि इहु परमत्थु मुणेइ ।।८२।।**

बुध्यते शास्त्राणि तप चरति पर परमार्थ न वेत्ति ।
तावत् न मुच्यते यावत् नैव एत परमार्थ मनुते ।।८२।।

**बुज्झइ** इत्यादि । **बुज्झइ** बुध्यते । कानि **सत्थइँ** शास्त्राणि न केवल शास्त्राणि बुध्यते **तउ चरइ** तपश्चरति **पर** पर किंतु **परमत्थु ण वेइ** परमार्थ न वेत्ति न जानाति । कस्मान्न वेत्ति । यद्यपि व्यवहारेण परमात्मप्रतिपादकशास्त्रेण ज्ञायते तथापि निश्चयेन वीतरागस्वसंवेदनज्ञानेन परिच्छिद्यते । यद्यप्यनशनादिद्वादशविधतपश्चरणेन बहिरङ्गसहकारिकारणभूतेन साध्यते तथापि निश्चयेन निर्विकल्पशुद्धात्मविश्रान्तिलक्षण-वीतरागचारित्रसाध्यो योऽसौ परमार्थशब्दवाच्यो निजशुद्धात्मा तत्र निरन्तरानुष्ठानाभा-वात् **ताव ण मुंचइ** तावन्त काल न मुच्यते । केन । कर्मणा **जाम णवि इहु परमत्थु मुणेइ** यावन्त काल नैवैन पूर्वोक्तलक्षण परमार्थ मनुते जानाति श्रद्धत्ते सम्यगनुभवतीति । इदमत्र तात्पर्यम् । यथा प्रदीपेन विवक्षित वस्तु निरीक्ष्य गृहीत्वा च प्रदीपस्त्यज्यते तथा शुद्धात्मतत्त्वप्रतिपादकशास्त्रेण शुद्धात्मतत्त्व ज्ञात्वा गृहीत्वा च प्रदीपस्थानीय शास्त्र-विकल्पस्त्यज्यत इति ।।८२।।

**सत्थइँ बुज्झइ, तउ चरइ, पर परमत्थु ण वेइ जाम इहु परमत्थु णवि मुणेइ ताव ण मुंचइ ।।८२।।** शास्त्रो को जानता है और तपस्या करता है लेकिन परमात्मा को नही जानता है और जब तक पूर्व कथित परमात्मा को नही जानता या अनुभव नही करता, तब तक कर्मों से नही छूटता । यद्यपि व्यवहारनय से आत्मा परमात्म-प्रतिपादक शास्त्रो से जाना जाता है, तो भी निश्चयनय से

वीतरागस्वसंवेदन ज्ञान ही मे जानने योग्य है, यद्यपि बाह्य सहकारीकारण अनशनादि बारह प्रकार के तप से साधा जाता है तो भी निश्चयनय से निर्विकल्प वीतराग चारित्र ही से आत्मा की सिद्धि है। जिस वीतरागचारित्र का शुद्धात्मा में विश्राम होना ही लक्षण है उस वीतरागचारित्र के आगमज्ञान से तथा बाह्य तप से आत्मज्ञान की सिद्धि नही है। जबतक निज शुद्धात्मतत्त्व के स्वरूप का आचरण नही है, तब तक कर्मों से नही छूटता। शास्त्र का ज्ञान भी आत्मज्ञान के लिए ही किया जाता है, जैसे दीपक से वस्तु को देख कर वस्तु को उठा लेते है और दीपक को छोड देते है उसी तरह शुद्धात्मतत्त्व के उपदेश करने वाले जो अध्यात्मशास्त्र उनसे शुद्धात्मतत्त्व को जान कर उस शुद्धात्मा का अनुभव करना चाहिए। शास्त्र का विकल्प छोडना चाहिए ।।८२।।

अथ योऽसौ शास्त्र पठन्नपि विकल्प न मुञ्चति निश्चयेन देहस्थ शुद्धात्मानं न मन्यते स जडो भवतीति प्रतिपादयति—

अब कहते है कि जो कोई शास्त्र को पढ कर भी विकल्प को नही छोडता है और निश्चय से देह मे स्थित शुद्धात्मा को नही मानता है, वह मूर्ख होता है—

**सत्थु पढंतु वि होइ जडु जो ण हणेइ वियप्पु ।**
**देहि वसंतु वि णिम्मलउ णवि मण्णइ परमप्पु ।।८३।।**

शास्त्र पठन्नपि भवति जड य न हन्ति विकल्पम् ।
देहे वसन्तमपि निर्मल नैव मन्यते परमात्मानम् ।।८३।।

सत्थु इत्यादि । **सत्थु पढंतु वि** शास्त्र पठन्नपि **होइ जडु** स जडो भवति य कि करोति । **जो ण हणेइ वियप्पु** य कर्ता शास्त्राभ्यासफलभूतस्य रागादिविकल्परहितस्य निजशुद्धात्मस्वभावस्य प्रतिपक्षभूत मिथ्यात्वरागादिविकल्पं न हन्ति । न केवल विकल्प न हन्ति । **देहि वसंतु वि** देहे वसन्तमपि **णिम्मलउ** निर्मल कर्ममलरहितं **णवि मण्णइ** नैव मन्यते न श्रद्धत्ते । कम् । **परमप्पु** निजपरमात्मानमिति । अत्रेद व्याख्यानं ज्ञात्वा त्रिगुप्तसमाधि कृत्वा च स्वय भावनीयम् । यदा तु त्रिगुप्तिगुप्तसमाधि कर्तुं नायाति तदा विषयकषायवञ्चनार्थ शुद्धात्मभावनास्मरणदृढीकरणार्थ च बहिर्विषये व्यवहारज्ञानवृद्ध्यर्थ च परेषां कथनीय किंतु तथापि परप्रतिपादनव्याजेन मुख्यवृत्त्या स्वकीयजीव एव सबोधनीय । कथमिति चेत् । इदमनुपपन्नमिदं व्याख्यान न भवति मदीयमनसि यदि समीचीन न प्रतिभाति तर्हि त्वमेव स्वयं कि न भावयसीति तात्पर्यम् ।।८३।।

**सत्थु पढंतु वि जो वियप्पु ण हणेइ, देहि वसंतु वि णिम्मलउ परमप्पु णवि मण्णइ, जडु होइ ।।८३।।** जो जीव शास्त्र पढते हुए भी विकल्प दूर नही करता और देह में स्थित भी निर्मल परमात्मा को श्रद्धान मे नही लाता, वह मूर्ख है। शास्त्राभ्यास का तो फल ही यह है कि रागादि विकल्पो को दूर करना और निज शुद्धात्मा का ध्यान करना। इसलिए इस व्याख्यान को जान कर तीन गुप्तियो मे अचल हो परमसमाधि मे आरूढ होकर निज स्वरूप का ध्यान करना चाहिए। लेकिन जब तक तीन

गुप्तियाँ न हों, परमसमाधि न आवे, तब तक विषय-कषायो को दूर करने के लिए और शुद्धात्मभावना के स्मरण को दृढ करने के लिए और बाह्य विषयो मे व्यवहार ज्ञान की वृद्धि के लिए परजीवों को धर्मोपदेश देना चाहिए किन्तु फिर भी परोपदेश के बहाने मुख्यतया अपने जीव को यानी अपने आप को ही सम्बोधित करना चाहिए। पर को उपदेश देते अपने को समझावे- जो मार्ग दूसरो को छुडावे, वह आप कैसे करे। इसमे मुख्य सम्बोधन स्वय को ही है। परजीवो को ऐसा उपदेश है, जो यह बात मेरे मन मे अच्छी नही लगती, तो तुमको भी भली नही लगती होगी, तुम भी अपने मन में विचार करो ॥८३॥

अथ बोधार्थं शास्त्र पठन्नपि यस्य विशुद्धात्मप्रतीतिलक्षणो बोधो नास्ति स मूढो भवतीति प्रतिपादयति—

अब कहते है कि ज्ञान के लिए शास्त्र पढते हुए भी जिसके विशुद्ध आत्मप्रतीति लक्षण वाला ज्ञान नही है, वह मूर्ख है—

**बोह-णिमित्तें सत्थु किल लोइ पढिज्जइ इत्थु।**
**तेण वि बोहु ण जासु वरु सो कि मूढु ण तत्थु ॥८४॥**

बोधनिमित्तेन शास्त्र किल लोके पठ्यते अत्र।
तेनापि बोधो न यस्य वर स कि मूढो न तथ्यम् ॥८४॥

**बोह** इत्यादि। बोधनिमित्तेन किल शास्त्र लोके पठ्यते अत्र तेनैव कारणेन बोधो न यस्य कथभूत । वरो विशिष्ट । स किं मूढो न भवति किंतु भवत्येव तथ्यमिति। तद्यथा। अत्र यद्यपि लोकव्यवहारेण कविगमकवादिवाग्मित्वादिलक्षणशास्त्रजनितो बोधो भण्यते तथापि निश्चयेन परमात्मप्रकाशकाध्यात्मशास्त्रोत्पन्नो वीतरागस्वसवेदन-रूप. स एव बोधो ग्राह्यो न चान्य । तेनानुबोधेन विना शास्त्रे पठितेऽपि मूढो भव-तीति। अत्र य. कोऽपि परमात्मबोधजनकमल्पशास्त्र ज्ञात्वापि वीतरागभावना करोति स सिद्धयतीति। तथा चोक्तम्—"**वीरा वेरग्गपरा थोवं पि हु सिक्खिऊण सिज्झंति। ण हु सिज्झंति विरागेण विणा पढिदेसु वि सव्वसत्थेसु ॥**" पर किन्तु—"**अक्खरडा जोयंतु ठिउ अप्पि ण दिण्णउ चित्तु। कणविरहियउ पलालु जिमु पर संगहिउ बहुत्तु ॥**" इत्यादि पाठमात्रं गृहीत्वा परेषा बहुशास्त्रज्ञानिना दूषणा न कर्तव्या। तैर्बहुश्रुतैरप्य-न्येषामल्पश्रुततपोधनानां दूषणा न कर्तव्या। कस्मादिति चेत्। दूषणे कृते सति पर-स्परं रागद्वेषोत्पत्तिर्भवति तेन ज्ञानतपश्चरणादिक नश्यतीति भावार्थ ॥८४॥

**इत्थु लोइ किल बोहणिमित्तें सत्थु पढिज्जइ तेण वि जासु वरु बोहु ण सो किं मूढु ण तत्थु ॥८४॥** इस लोक मे नियम से ज्ञान के निमित्त ही शास्त्र पढे जाते है परन्तु शास्त्रो को पढने से भी जिसको उत्तम ज्ञान नही हुआ, क्या वह मूर्ख नही है ? वह मूर्ख ही है, इसमे सन्देह नही। **भावार्थ—**यद्यपि लोकव्यवहार से कवि, गमक, वादी, वाग्मीपने का ज्ञान शास्त्रजनित होता है तो भी

निश्चयनय से वीतराग स्वसंवेदनरूप ज्ञान की ही अध्यात्मशास्त्रों में प्रशंसा की गई है। स्वसंवेदन ज्ञान के बिना शास्त्रों के पढ़ें हुए भी मूर्ख है। और जो कोई परमात्मज्ञान के उत्पन्न करने वाले थोड़े शास्त्रों को जान कर भी वीतराग-स्वसंवेदनज्ञान की भावना करते है, वे सिद्ध हो जाते है। ऐसा ही अन्यत्र भी कहा है—"मोहशत्रु को जीतने वाले वैराग्यपरायण वीर थोड़े शास्त्रों को ही पढ़ कर सुधर जाते है— सिद्ध हो जाते हैं और वैराग्य के बिना सब शास्त्रों को पढ़ते हुए भी मुक्त नही होते।" परन्तु यह कथन अपेक्षा से है—इस बहाने से शास्त्र पढ़ने का अभ्यास नही छोड़ना और जो विशेष शास्त्र के पाठी है, उनको दोष न देना। "जो शास्त्र के अक्षर तो बता रहा है किन्तु आत्मा में चित्त नही लगाता उसे ऐसा जानना जैसे किसी ने कणरहित बहुत भूसे का ढेर कर लिया हो, वह किसी काम का नही है।" इत्यादि पाठमात्र सुनकर जो विशेष शास्त्रज्ञ है उनकी निन्दा नही करनी और जो बहुश्रुत है उनको भी अल्पशास्त्रज्ञो की निन्दा नही करनी चाहिए क्योंकि पर के दोष ग्रहण करने से रागद्वेष की उत्पत्ति होती है, उससे ज्ञान और तप का नाश होता है, यह निश्चय से जानना चाहिए ॥८४॥

अथ वीतरागस्वसंवेदनज्ञानरहितानां तीर्थभ्रमणेन मोक्षो न भवतीति कथयति—

अब कहते है कि वीतरागस्वसंवेदनज्ञान से रहित जीवों को तीर्थाटन करने से भी मोक्ष नही होता —

**तित्थइँ तित्थु भमंताहँ मूढहँ मोक्खु ण होइ।**
**णाण-विवज्जिउ जेण जिय मुणिवरु होइ ण सोइ ॥८५॥**

तीर्थं तीर्थं भ्रमतां मूढानां मोक्षो न भवति।
ज्ञानविवर्जितो येन जीव मुनिवरो भवति न स एव ॥८५॥

तीर्थं तीर्थं प्रति भ्रमतां मूढात्मनां मोक्षो न भवति। कस्मादिति चेत्। ज्ञानविवर्जितो येन कारणेन हे जीव मुनिवरो न भवति स एवेति। तथाहि। निर्दोषिपरमात्मभावनोत्पन्न-वीतरागपरमाह्लादस्यन्दिसुन्दरानन्दरूपनिर्मलनीरपूरप्रवाहनिर्भरज्ञानदर्शनादिगुणसमूहचन्दनादिद्रुमवनराजित देवेन्द्रचक्रवर्तिगणधरादिभव्यजीवतीर्थयात्रिकसमूहश्रवणसुखकरदिव्यध्वनिरूपराजहंसप्रभृतिविविधपक्षिकोलाहलमनोहरं यदर्हद्वीतरागसर्वज्ञस्वरूपं तदेव निश्चयेन गङ्गादितीर्थं न लोकव्यवहारप्रसिद्धं गङ्गादिकम्। परमनिश्चयेन तु जिनेश्वरपरमतीर्थसदृशं संसारतरणोपायकारणभूतत्वाद्वीतरागनिर्विकल्पपरमसमाधिरतानां निजशुद्धात्मतत्त्वस्मरणमेव तीर्थं, व्यवहारेण तु तीर्थंकरपरमदेवादिगुणस्मरणहेतुभूतं मुख्यवृत्त्या पुण्यबन्धकारणं तन्निर्वाणस्थानादिकं च तीर्थमिति। अयमत्र भावार्थः। पूर्वोक्तं निश्चयतीर्थं श्रद्धानपरिज्ञानानुष्ठानरहितानामज्ञानिनां शेषतीर्थं मुक्तिकारणं न भवतीति ॥८५॥

**तित्थइँ तित्थु भमंताहँ मूढहँ मोक्खु ण होइ । जिय ! जेण णाणविवज्जिउ सोइ मुणिवरु ण होइ ।।८५।।** तीर्थ-तीर्थ प्रति भ्रमण करने वाले मूर्खों को मुक्ति नही होती । हे जीव ! जो ज्ञान-रहित है वह मुनीश्वर नही है । **भावार्थ**–निर्दोषपरमात्मा की भावनासेउत्पन्न वीतराग परम-आह्लाद-स्यन्दी सुन्दर आनन्दरूप निर्मल जल के प्रवाह से परिपूर्ण निर्झर, ज्ञानदर्शनादि गुणसमूहरूपी चन्दनादि वृक्षो के वन से शोभित, देवेन्द्र चक्रवर्ती गणधरादि भव्यजीव रूपी तीर्थयात्रियो के कानो को सुखकारी ऐसी दिव्यध्वनि से शोभायमान और अनेक मुनिजनरूपी राजहसो को आदि लेकर नानातरह के पक्षियो के शब्दो से महामनोहर जो अरहन्त वीतराग सर्वज्ञ, वे ही निश्चय से गंगादि महातीर्थ हैं, लोकव्यवहार मे प्रसिद्ध गगादिक तीर्थ नही है । परमनिश्चयनय की अपेक्षा तो जिनेश्वर परमतीर्थसदृश ससार के तरने की कारणभूत वीतराग निर्विकल्प परमसमाधि मे रत मुनियो के निज-शुद्धात्मतत्त्व का स्मरण ही तीर्थ है और व्यवहारनय की अपेक्षा तीर्थकर परमदेवादि के गुणस्मरण के हेतुभूत मुख्यता से पुण्यबन्ध के कारण निर्वाण क्षेत्र—कैलास, सम्मेदशिखर आदि तीर्थ है । यह **भावार्थ है** । पूर्वोक्त निश्चय तीर्थ के श्रद्धान, ज्ञान, आचरण रहित अज्ञानियो के शेष तीर्थ मुक्ति के कारण नही होते है ।।८५।।

अथ ज्ञानिनां तथैवाज्ञानिना च यतीनामन्तर दर्शयति—

अब ज्ञानी और अज्ञानी यतियो मे अन्तर बताते है—

**णाणिहिँ मूढहँ मुणिवरहँ अंतरु होइ महंतु ।**
**देहु वि मिल्लइ णाणियउ जीवहँ भिण्णु मुणंतु ।।८६।।**

ज्ञानिना मूढाना मुनिवराणा अन्तर भवति महत् ।
देहमपि मुञ्चति ज्ञानी जीवाद्भिन्न मन्यमान ।।८६।।

ज्ञानिना मूढाना च मुनिवराणा अन्तर विशेषो भवति । कथभूतम् । महत् । कस्मादिति चेत् । देहमपि मुञ्चति । कोऽसौ । ज्ञानी । कि कुर्वन् सन् । जीवात्सकाशाद्भिन्नं मन्यमानो जानन् इति । तथा च । वीतरागस्वसवेदनज्ञानी पुत्रकलत्रादिबहिर्द्रव्य तावद्दूरे तिष्ठतु शुद्धबुद्धैकस्वभावात् स्वशुद्धात्मस्वरूपात्मकाशात् पृथग्भूत जानन् स्वकीयदेहमपि त्यजति । मूढात्मा पुनः स्वीकरोति इति तात्पर्यम् ।।८६।। एवमेकचत्वारिंशत्सूत्रप्रमितमहास्थलमध्ये पञ्चदशसूत्रैर्वीतरागस्वसवेदनज्ञानमुख्यत्वेन द्वितीयमन्तरस्थल समाप्तम् । तदनन्तर तत्रैव महास्थलमध्ये सूत्राष्टकपर्यन्त परिग्रहत्यागव्याख्यानमुख्यत्वेन तृतीयमन्तरस्थल प्रारभ्यते ।

**णाणिहिं मूढहँ मुणिवरहँ महंतु अंतरु होइ । णाणियउ देहु वि जीवइँ भिण्णु मुणंतु मिल्लइ ।।८६।।** ज्ञानी (सम्यग्दृष्टि भावलिंगी) और (मिथ्यादृष्टि द्रव्यलिंगी) अज्ञानी मुनियो मे महत् अन्तर है । ज्ञानी तो शरीर को भी जीव से भिन्न जानकर छोड देते है अर्थात् वे शरीर का भी ममत्व छोड देते हैं । **भावार्थ**–वीतराग स्वसवेदनज्ञानी मुनि पुत्रकलत्रादि बहिर्द्रव्य तो दूर ही रहे, वे शुद्ध-बुद्ध एक स्वभावी स्वशुद्धात्मस्वरूप से भिन्न जान कर निज देह को भी छोड देते हैं जबकि मूढ अज्ञानी

उसे अपनी जान कर स्वीकार करते हैं ॥८६॥ इस प्रकार ४१ दोहासूत्रों के महास्थल में १५ दोहों में वीतराग स्वसंवेदनज्ञान की मुख्यता से दूसरा अन्तरस्थल समाप्त हुआ। अनन्तर इसी महास्थल के अन्तर्गत आठ दोहों में परिग्रह त्याग के व्याख्यान की मुख्यता से तृतीय अन्तरस्थल प्रारम्भ करते हैं—

**लेणहँ इच्छइ मूढु पर भुवणु वि एहु असेसु ।**
**बहुविह-धम्म-मिसेण जिय दोहिँ वि एहु विसेसु ॥८७॥**

लातु इच्छति मूढ पर भुवनमपि एतद् अशेषम् ।
बहुविधधर्ममिषेण जीव द्वयो. अपि एष विशेष ॥८७॥

लातुं ग्रहीतुं इच्छति। कोऽसौ। मूढो बहिरात्मा। पर कोऽर्थः, नियमेन। किम्। भुवनमप्येतत्तु अशेषं समस्तम्। केन कृत्वा। बहुविधधर्ममिषेण व्याजेन। हे जीव द्वयोरप्येष विशेष। कयोर्द्वयो। पूर्वोक्तसूत्रकथितज्ञानिजीवस्यात्र सूत्रोक्तपुनरज्ञानिजीवस्य च। तथाहि। वीतरागसहजानन्दैकसुखास्वादरूप स्वशुद्धात्मैव उपादेय इति रुचिरूपं सम्यग्दर्शन, तस्यैव परमात्मन समस्तमिथ्यात्वरागाद्यास्रवेभ्य पृथग्रूपेण परिच्छित्तिरूपं सम्यग्ज्ञान, तत्रैव रागादिपरिहाररूपेण निश्चलचित्तवृत्ति. सम्यक्चारित्रम् इत्येवं निश्चयरत्नत्रयस्वरूप तत्त्रयात्मकमात्मानमरोचमानस्तथैवाजानन्नभावयश्च मूढात्मा। किं करोति। समस्तं जगद्धर्मव्याजेन ग्रहीतुमिच्छति, पूर्वोक्तज्ञानी तु त्यक्तुमिच्छतीति भावार्थ ॥८७॥

**जिय ! दोहिँ वि एहु विसेसु-मूढु बहुविहधम्ममिसेण एहु असेसु भुवणु वि पर लेणहँ इच्छइ** ॥८७॥ ज्ञानी और अज्ञानी इन दोनो मे इतना ही भेद है कि अज्ञानी धर्म के अनेक बहानों से इस समस्त जगत् को ही नियम से ग्रहण करने की इच्छा करता है। **भावार्थ**–वीतराग सहजानन्द अखण्ड सुख का आस्वादरूप जो स्वशुद्धात्मा है वही उपादेय है, ऐसी जो रुचि है वह सम्यग्दर्शन है, समस्त मिथ्यात्व रागादि आस्रव से भिन्न उसी शुद्धात्मा का ज्ञान, सो सम्यग्ज्ञान है और उसी मे रागादि के परिहारपूर्वक निश्चल चित्तवृत्ति वह सम्यक्चारित्र है। इस निश्चयरत्नत्रय स्वरूप त्रयात्मक आत्मा मे जिसकी रुचि नही है, जिसे इसका ज्ञान नहीं है और जिसे इसका अनुभव नही है, वह मूढात्मा है। वह धर्म के बहाने से जगत् के समस्त भोगो को ग्रहण करना चाहता है जबकि पूर्वोक्तज्ञानी इन सबको छोड देता है ॥८७॥

अथ शिष्यकरणाद्यनुष्ठानेन पुस्तकाद्युपकरणेनाज्ञानी तुष्यति, ज्ञानी पुनर्बन्धहेतुं जानन् सन् लज्जां करोतीति प्रकटयति—

अब कहते हैं कि अज्ञानी, शिष्य बना कर और पुस्तकादि उपकरणो का संग्रह करके सन्तुष्ट होता है जबकि ज्ञानी इन्हे बन्ध का कारण जानते हुए इनके सग्रह मे लज्जावान होता है—

**चेल्ला-चेल्ली-पुत्थियहिँ तूसइ मूढु णिभंतु ।**
**एयहिँ लज्जइ णाणियउ बंधहँ हेउ मुणंतु ॥८८॥**

शिष्यार्जिकापुस्तकैः तुष्यति मूढो निर्भ्रान्तः ।
एतैः लज्जते ज्ञानी बन्धस्य हेतुं जानन् ॥८८॥

शिष्यार्जिकादीक्षादानेन पुस्तकप्रभृत्युपकरणैश्च तुष्यति सतोषं करोति । कोऽसौ । मूढः । कथंभूतः । निर्भ्रान्तः एतैर्बहिर्द्रव्यैर्लज्जां करोति । कोऽसौ । ज्ञानी । किं कुर्वन्नपि । पुण्यबन्धहेतुं जानन्नपि । तथा च । पूर्वसूत्रोक्तसम्यग्दर्शनचारित्रलक्षणं निजशुद्धात्मस्वभावमश्रद्दधानो विशिष्टभेदज्ञानेनाजानंश्च तथैव वीतरागचारित्रेणाभावयंश्च मूढात्मा । किं करोति । पुण्यबन्धकारणमपि जिनदीक्षादानादिशुभानुष्ठानं पुस्तकाद्युपकरणं वा मुक्तिकारणं मन्यते । ज्ञानी तु यद्यपि साक्षात्पुण्यबन्धकारणं मन्यते परंपरया मुक्तिकारणं च तथापि निश्चयेन मुक्तिकारणं न मन्यते इति तात्पर्यम् ॥८८॥

**मूढु चेल्ला चेल्ली पुत्थियहिं तूसइ णिभंतु, णाणियउ बधहँ हेउ मुणंतु एयहिं लज्जइ ॥८८॥**
अज्ञानी जन शिष्य-शिष्या-पुस्तकादिक से तुष्ट होता है, इसमे कोई सन्देह नही है, ज्ञानी इन सबको बध का कारण जानते हुए बाह्य पदार्थो से लज्जित होता है । **भावार्थ**- पूर्वदोहे मे कथित सम्यग्दर्शन-ज्ञान-चारित्र लक्षण वाली निज शुद्धात्मा का न श्रद्धान करते हुए, न ज्ञान करते हुए और न अनुभव करते हुए मूढात्मा पुण्यबन्ध के कारणो जिनदीक्षा, दानादि शुभ आचरण, पुस्तकादि उपकरणो को मुक्ति के कारण मानता है । यद्यपि ज्ञानी इन्हे साक्षात् पुण्यबन्ध के कारण मानता है और परम्परा से मुक्ति के कारण मानता है तथापि निश्चयनय की अपेक्षा इन्हे मुक्ति के कारण नहीं मानता है, यह **तात्पर्य** है ॥८८॥

अथ चट्टपट्टकुण्डिकाद्युपकरणैर्मोहमुत्पाद्य मुनिवराणां उत्पथे पात्यते [?] इति प्रतिपादयति—

अब कहते है कि पीछी, पुस्तक, कमण्डलु आदि उपकरण मोह उत्पन्न कराके मुनियो को खोटे मार्ग मे पटक देते है -

**चट्टहिँ पट्टहिँ कुंडियहिँ चेल्ला-चेल्लियएहिँ ।**
**मोहु जणेविणु मुणिवरहँ उप्पहि पाडिय तेहिँ ॥८९॥**

चट्टैः पट्टैः कुण्डिकाभिः शिष्यार्जिकाभिः ।
मोहं जनयित्वा मुनिवराणां उत्पथे पातितास्तैः ॥८९॥

चट्टपट्टकुण्डिकाद्युपकरणैः शिष्यार्जिकापरिवारैश्च कर्तृभूतैर्मोहं जनयित्वा । केषाम् । मुनिवराणां, पश्चादुन्मार्गे पातितास्ते तु तैः । तथाहि । तथा कश्चिदजीर्णभयेन विशिष्टाहारं त्यक्त्वा लङ्घनं कुर्वन्नास्ते पश्चादजीर्णप्रतिपक्षभूतं किमपि मिष्टौषधं गृहीत्वा जिह्वालाम्पट्येनौषधेनापि अजीर्णं करोत्यज्ञानी इति, न च ज्ञानीति, तथा कोऽपि तपोधनो विनीतवनितादिकं मोहभयेन त्यक्त्वा जिनदीक्षां गृहीत्वा च शुद्धबुद्धैक-

स्वभावनिजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानरूपनीरोगत्वप्रतिपक्षभूतमजीर्णरोगस्थानीयं मोहमुत्पाद्यात्मनः। किं कृत्वा। किमप्यौषधस्थानीयमुपकरणादिकं गृहीत्वा। कोऽसावज्ञानी न तु ज्ञानीति। इदमत्र तात्पर्यम्। परमोपेक्षासंयमधरेण शुद्धात्मानुभूतिप्रतिपक्षभूतः सर्वोऽपि तावत्परिग्रहस्त्याज्यः। परमोपेक्षासंयमाभावे तु वीतरागशुद्धात्मानुभूतिभावसंयमरक्षणार्थं विशिष्टसहननादिशक्त्यभावे सति यद्यपि तपःपर्यायशरीरसहकारिभूतमन्नपानसंयमशौचज्ञानोपकरणतृणमयप्रावरणादिकं किमपि गृह्णाति तथापि ममत्वं न करोतीति। तथा चोक्तम्—**"रम्येषु वस्तुवनितादिषु वीतमोहो मुह्येद् वृथा किमिति संयमसाधनेषु। धीमान् किमामयभयात्परिहृत्य भुक्तिं पीत्वौषधं व्रजति जातुचिदप्यजीर्णम्॥"** ॥८९॥

काऊण इत्यादि । **काऊण** कृत्वा । किम् **णग्गरूव** नग्नरूपं निर्ग्रन्थं जिनरूपम् । कथंभूतम् । **बीभत्थं (च्छं ?)** भयानकम् । पुनरपि कथभूतम् । **दड्ढमडयसारिच्छं** दग्धमृतकसदृशम् । एवविध रूप धृत्वा हे तपोधन **अहिलससि** अभिलाषं करोषि **किं ण लज्जसि** लज्जा किं न करोषि । कि कुर्वाण सन् । **भिक्खाए भोयणं मिट्ठं** भिक्षायां भोजनं मृष्टं इति मन्यमान: सन्निति । श्रावकेण तावदाहाराभयभैषज्यशास्त्रदानं तात्पर्येण दातव्यम् । आहारदानं येन दत्तं तेन शुद्धात्मानुभूतिसाधक बाह्याभ्यन्तरभेद-भिन्नं द्वादशविधं तपश्चरण दत्तं भवति । शुद्धात्मभावनालक्षणसयमसाधकस्य देहस्यापि स्थिति: कृता भवति । शुद्धात्मोपलभप्राप्तिरूपा भवान्तरगतिरपि दत्ता भवति । यद्यप्येवमादिगुणविशिष्ट चतुर्विधदान श्रावका प्रयच्छन्ति तथापि निश्चयव्यवहाररत्न-त्रयाराधकतपोधनेन बहिरङ्गसाधनीभूतमाहारादिक किमपि गृह्णतापि स्वस्वभावप्रतिपक्ष-भूतो मोहो न कर्तव्य इति तात्पर्यम् ॥१११*२॥

**बीभस्सं दड्ढमडयसारिच्छं णग्गरूवं काऊण भिक्खाए मिट्ठं भोयणं अहिलससि किं ण लज्जसि ॥१११*२॥** बीभत्स (मैली घृणित) जले हुए मृतक सदृश, वस्त्र रहित नग्नरूप को धारण करके हे साधो ! तू भिक्षा मे स्वादयुक्त मिष्ट आहार की अभिलाषा करते हुए लज्जित क्यों नही होता ? **भावार्थ**–श्रावक को भक्तिभाव से आहार-अभय-औषधि और शास्त्र का दान करना चाहिए । जिसने आहार दान दिया उसने शुद्धात्मानुभूतिसाधक अन्तरग और बहिरग द्वादश प्रकार का तपश्चरण ही दिया और शुद्धात्मभावना से युक्त हो सयम की साधना करने वाले के देह की रक्षा की और शुद्धात्मा की प्राप्तिरूप मोक्ष प्रदान किया । यद्यपि इस प्रकार का गुणविशिष्ट चतुर्विध-दान श्रावक देते है तथापि निश्चय-व्यवहाररत्नत्रय के आराधक तपोधन के द्वारा बहिरग-साधनभूत आहारादिक को ग्रहण करते हुए भी अपने स्वभाव का प्रतिपक्षी मोह नही करना चाहिए ॥१११*२॥

**जइ इच्छसि भो साहू बारह-विह-तवहलं महा-विउलं ।**
**तो मण-वयणे काए भोयण-गिद्धी विवज्जेसु ॥१११*३॥**

यदि इच्छसि भो साधो द्वादशविधतप:फल महद्विपुलम् ।
तत: मनोवचनयो काये भोजनगृद्धि विवर्जयस्व ॥१११*३॥

**जइ इच्छसि** यदि इच्छसि भो साधो द्वादशविधतप.फलम् । कथंभूतम् । महद्वि-

पुलं स्वर्गापवर्गरूपं ततःकारणात् वीतरागनिजानन्दैकसुखरसास्वादानुभवेन तृप्तो भूत्वा मनोवचनकायेषु भोजनगृद्धिं वर्जय इति तात्पर्यम् ॥१११*३॥

**भो साहु जइ बारहविहतवहलं महाविउलं इच्छसि तो मणवयणे काये भोयणगिद्धी विवज्जेसु** ॥१११*३॥ हे साधो ! जो तू द्वादशविध तप का फल बड़ा भारी स्वर्ग-मोक्ष चाहता है तो वीतरागनिजानन्द एक सुखरस के आस्वाद के अनुभव से तृप्त हुआ, तू मन वचन काय से भोजन की गृद्धता (लोलुपता) का त्याग कर दे, यह **तात्पर्य** है ॥१११*३॥

उक्तं च—

कहा भी है—

**जे सरसिं संतुट्ठ-मण विरसि कसाउ वहंति ।**
**ते मुणि भोयण-धार गणि णवि परमत्थु मुणंति ॥१११*४॥**

ये सरसेन संतुष्टमनसः विरसे कषायं वहन्ति ।
ते मुनय भोजनगृध्रा गणय नैव परमार्थं मन्यन्ते ॥१११*४॥

जे इत्यादि । **जे सरसिं संतुट्ठमण** ये केचन सरसेन सरसाहारेण संतुष्टमनसः **विरसि कसाउ वहंति** विरसे विरसाहारे सति कषायं वहन्ति कुर्वन्ति **ते** ते पूर्वोक्ताः **मुणि** मुनयस्तपोधना **भोयणधार गणि** भोजनविषये गृध्रसदृशान् गणय मन्यस्व जानीहि । इत्थंभूता सन्त. **णवि परमत्थु मुणंति** नैव परमार्थं मन्यन्ते जानन्तीति । अयमत्र भावार्थः । गृहस्थानामाहारदानादिकमेव परमो धर्मस्तेनैव सम्यक्त्वपूर्वेण परंपरया मोक्षं लभन्ते । कस्मात् स एव परमो धर्म इति चेत्, निरन्तरविषयकषायाधीनतया आर्तरौद्रध्यानरतानां निश्चयरत्नत्रयलक्षणस्य शुद्धोपयोगपरमधर्मस्यावकाशो नास्तीति । शुद्धोपयोगपरमधर्मरतैस्तपोधनैस्त्वन्नपानादिविषये मानापमानसमता कृत्वा यथालाभेन संतोषः कर्तव्य इति ॥१११*४॥

**जे सरसिं संतुट्ठमण विरसि कसाउ वहंति ते मुणि भोयणधार गणि । परमत्थु णवि मुणंति** ॥१११*४॥ जो स्वादिष्ट आहार से सन्तुष्टमन होते हैं, नीरस आहार में कषाय करते हैं, वे मुनि भोजन के गृद्ध है, तू ऐसा समझ । वे परमतत्त्व को नहीं समझते हैं । **भावार्थ**—यह है कि गृहस्थों के तो आहारदानादिक ही परमधर्म हैं । जो सम्यक्त्वपूर्वक दानादि करे तो परम्परा से मोक्ष प्राप्त करे । गृहस्थों के दानादि ही परमधर्म क्यों हैं ? क्योंकि निरन्तर विषय-कषायाधीन रहने से और आर्तरौद्र ध्यान उत्पन्न होते रहने से इनके निश्चय रत्नत्रयरूप शुद्धोपयोग परमधर्म का तो ठिकाना ही नहीं है अर्थात् गृहस्थों के शुभोपयोग की मुख्यता है । शुद्धोपयोग रूप परमधर्म में रत तपोधनों को तो अन्नपानादि के विषय में मानापमान में समता धारण कर यथालाभ (जैसा मिले उससे) सन्तोष करना चाहिए ॥१११*४॥

**अथ शुद्धात्मोपलम्भाभावे सति पञ्चेन्द्रियविषयासक्तजीवानां विनाश दर्शयति—**

अब यह दिखाते है कि शुद्धात्मा की प्राप्ति के अभाव में पञ्चेन्द्रियो के विषयो में आसक्त जीवों का विनाश ही होता है—

**रूवि पयंगा सद्दि मय गय फासहि णासंति ।**
**अलिउल गंधइँ मच्छ रसि किम अणुराउ करंति ।।११२।।**

रूपे पतंगा: शब्दे मृगा गजा: स्पर्शे. नश्यन्ति ।
अलिकुलानि गन्धेन मत्स्या रसे कि अनुराग कुर्वन्ति ।।११२।।

रूवि इत्यादि । रूपे समासक्ता पतङ्गा शब्दे मृगा गजा स्पर्शे गन्धेनालि-कुलानि मत्स्या रसासक्ता नश्यन्ति यत कारणात् तत कारणात्कथ तेषु विषयेष्वनुराग कुर्वन्तीति । तथाहि । पञ्चेन्द्रियविषयाकाक्षाप्रभृतिसमस्तापध्यानविकल्पै रहित शून्य स्पर्शनादीन्द्रियकषायातीतनिर्दोषिपरमात्मसम्यक्श्रद्धानज्ञानानुचरणरूपनिर्विकल्पसमाधिस-जातवीतरागपरमाह्लादैकलक्षणसुखामृतरसास्वादेन पूर्णकलशवद्भरितावस्थ केवलज्ञाना-दिव्यक्तिरूपस्य कार्यसमयसारस्योत्पादक शुद्धोपयोगस्वभावो योऽसावेवभूत कारण-समयसार तद्भावनारहिता जीवाः पञ्चेन्द्रियविषयाभिलाषवशीकृता नश्यन्तीति ज्ञात्वा कथ तत्रासक्ति गच्छन्ति ते विवेकिन इति । अत्र पतङ्गादय एकैकविषयासक्ता नष्टा, ये तु पञ्चेन्द्रियविषयमोहितास्ते विशेषेण नश्यन्तीति भावार्थ ।।११२।।

**रूवि पयंगा सद्दि मय गय फासहि गंधइँ अलिउल रसि मच्छ णासंति किम् अणुराउ करंति ।।११२।।** रूप मे लीन हुए पतगे दीपक मे जल कर मर जाते है, शब्दविषय मे लीन मृग व्याध के बाणों से मारे जाते हैं, हाथी स्पर्श विषय के कारण बाँधे जाते है, सुगन्ध की लोलुपता मे भौरे अपने प्राण गँवाते है और रस के लोभी मच्छ धीवर के जाल मे पड कर मारे जाते है । ऐसा जानकर क्या विवेकी जीव विषयो मे प्रीति करते है ? नही करते । **भावार्थ**—पञ्चेन्द्रिय के विषयो की आकाक्षादि समस्त अपध्यान के विकल्पों से रहित, स्पर्शनादिइन्द्रियकषायातीत जो निर्दोष परमात्मा है उसका सम्यक् श्रद्धान ज्ञान आचरण रूप जो निर्विकल्प समाधि है, उससे उत्पन्न वीतराग परम आस्वादरूप सुखामृत रस के स्वाद मे पूर्ण कलश की तरह भरे हुए जो केवलज्ञानादि व्यक्तिरूप कार्यसमयसार है, उसको उत्पन्न करने वाला जो शुद्धोपयोगरूप कारणसमयसार है, उसकी भावना से रहित ससारी जीव विषयों के अनुरागी, पाँचइन्द्रियों के लोलुपी भव-भव में नाश पाते है । ऐसा जान कर विवेकी जीव इन विषयो मे कैसे आसक्ति कर सकते हैं अर्थात् नही कर सकते । यहाँ पतगादिक एक-एक विषय में लीन हुए नष्ट हो जाते है किन्तु जो पाँचो ही इन्द्रिया के विषयों में मोहित है, वे तो नष्ट होते ही हैं, यह भावार्थ है ।।११२।।

अथ लोभकषायदोष दर्शयति—

अब लोभकषाय का दोष दिखाते है—

**जोइय लोहु परिच्चयहि लोहु ण भल्लउ होइ ।**
**लोहासत्तउ सयलु जगु दुक्खु सहंतउ जोइ ॥११३॥**

योगिन् लोभं परित्यज लोभो न भद्रः भवति ।
लोभासक्तं सकलं जगद् दुःखं सहमानं पश्य ॥११३॥

हे योगिन् लोभं परित्यज । कस्मात् । लोभो भद्रः समीचीनो न भवति । लोभासक्तं समस्तं जगद् दुःखं सहमानं पश्येति । तथाहि—लोभकषायविपरीतात् परमात्मस्वभावाद्विपरीतं लोभं त्यज **हे प्रभाकरभट्ट** । यतः कारणात् निर्लोभपरमात्मभावनारहिता जीवा दुःखमुपभुञ्जानास्तिष्ठन्तीति तात्पर्यम् ॥११३॥

**जोइय लोहु परिच्चयहि, लोहु ण भल्लउ होइ । लोहासत्तउ सयलु जगु दुक्खु सहंतउ जोइ** ॥११३॥ हे योगिन्! लोभ को छोडो। क्यो? क्योंकि लोभ अच्छा नही होता। देखो, लोभासक्त समस्त जगत् दुःख ही सह रहा है। **भावार्थ**—लोभकषाय से रहित जो परमात्मस्वभाव है, उससे विपरीत जो लोभ है, हे प्रभाकरभट्ट! उसे छोडो क्योंकि निर्लोभ परमात्मभावना से रहित जीव दुःख भोगते हुए ही दिखाई देते है ॥११३॥

अथामुमेव लोभकषायदोषं दृष्टान्तेन समर्थयति—

अब इसी लोभकषाय के दोष का दृष्टान्त से समर्थन करते हैं—

**तलि अहिरणि वरि घणवडणु संडस्सय लुंचोडु ।**
**लोहहं लग्गिवि हुयवहहं पिक्खु पडंतउ तोडु ॥११४॥**

तले अधिकरण उपरि घनपातन सदशकलुञ्चनम् ।
लोह लगित्वा हुतवहस्य पश्य पतत् त्रोटनम् ॥११४॥

तले अधस्तनभागेऽधिकरणसंज्ञोपकरणं उपरितनभागे घनघातपातनं तथैव संडसकसंज्ञेनोपकरणेन लुञ्चनमाकर्षणम् । केन । लोहपिण्डनिमित्तेन । कस्य । हुतभुजोऽग्नेः त्रोटनं खण्डनं पश्येति । अयमत्र भावार्थः । यथा लोहपिण्डससर्गादग्निरज्ञानिलोकपूज्या प्रसिद्धा देवता पिट्टनक्रियां लभते तथा लोभादिकषायपरिणतिकारणभूतेन पञ्चेन्द्रियशरीरसंबन्धेन निर्लोभपरमात्मतत्त्वभावनारहितो जीवो घनघातस्थानीयानि नारकादिदुःखानि बहुकालं सहत इति ॥११४॥

**लोहहं लग्गिवि हुयवहहं तलि अहिरणि वरि घणवडणु संडस्सय लुंचोडु पडंतउ तोडु पिक्खु** ॥११४॥ लोहे का सम्बन्ध पाकर अग्नि नीचे रखे हुए अहरन पर घन की चोट, संडासी से खेंचना, चोट लगने से टूटना आदि दुःखों को सहती है, ऐसा देखो। **भावार्थ**—जैसे लोहपिण्ड के संसर्ग से अज्ञानी लोगों द्वारा पूज्य प्रसिद्ध देवता अग्नि पीटी जाती है, वैसे ही लोभादि-कषायपरिणति के

कारण से और पंचेन्द्रिय शरीर के सम्बन्ध से निर्लोभ परमात्मतत्त्वभावना से रहित जीव घन-घात के समान बहुत काल तक नरकादि के दुःख सहता है ॥११४॥

अथ स्नेहपरित्यागं कथयति—

अब, स्नेह के त्याग का कथन करते हैं—

**जोइय णेहु परिच्चयहि णेहु ण भल्लउ होइ ।**
**णेहासत्तउ सयलु जगु दुक्खु सहंतउ जोइ ॥११५॥**

योगिन् स्नेहं परित्यज स्नेहो न भद्रो भवति ।
स्नेहासक्तं सकलं जगद् दुःखं सहमानं पश्य ॥११५॥

रागादिस्नेहप्रतिपक्षभूते वीतरागपरमात्मपदार्थध्याने स्थित्वा शुद्धात्मतत्त्वाद्विपरीतं हे योगिन् स्नेहं परित्यज । कस्मात् । स्नेहो भद्रः समीचीनो न भवति । तेन स्नेहेनासक्तं सकलं जगन्निःस्नेहशुद्धात्मभावनारहितं विविधशारीरमानसरूपं बहुदुःखं सहमानं पश्येति । अत्र भेदाभेदरत्नत्रयात्मकमोक्षमार्गं मुक्त्वा तत्प्रतिपक्षभूते मिथ्यात्वरागादौ स्नेहो न कर्तव्य इति तात्पर्यम् । उक्तं च—"**तावदेव सुखी जीवो यावन्न स्निह्यते क्वचित् । स्नेहानुविद्धहृदयं दुःखमेव पदे पदे ॥**" ॥११५॥

**जोइय ! णेहु परिच्चयहि । णेहु ण भल्लउ होइ ! णेहासत्तउ सयलु जगु दुक्खु सहंतउ जोइ ॥११५॥** हे योगी ! रागादि स्नेह के प्रतिपक्षी वीतराग परमात्मपदार्थ के ध्यान मे स्थित होकर शुद्धात्मतत्त्व से विपरीत स्नेह का परित्याग करो । क्योकि स्नेह अच्छा नही होता । स्नेहासक्त सकल जगवासियो को तुम विविध शारीरिक मानसिक दुःख सहते हुए देख ही रहे हो। **भावार्थ**-भेदाभेदरत्नत्रयात्मक मोक्षमार्ग से विमुख होकर उसके प्रतिपक्षी मिथ्यात्वरागादि मे स्नेह नही करना चाहिए । कहा भी है—"जब तक यह जीव जगत् से स्नेह न करे तभी तक सुखी है । जिसका मन स्नेह से बँध गया है, उसको पद-पद पर दुःख ही है ।" ॥११५॥

अथ स्नेहदोषं दृष्टान्तेन द्रढयति—

अब, स्नेह के दोष को दृष्टान्त से दृढ करते है—

**जलसिंचणु पय-णिद्दलणु पुणु पुणु पीलण-दुक्खु ।**
**णेहहँ लग्गिवि तिल-णियरु जंति सहंतउ पिक्खु ॥११६॥**

जलसिञ्चनं पादनिर्दलनं पुनः पुनः पीडनदुःखम् ।
स्नेहं लगित्वा तिलनिकरं यन्त्रेण सहमानं पश्य ॥११६॥

जलसिंचनं पादनिर्दलनं पुनः पुनः पीडनदुःखं स्नेहनिमित्तं तिलनिकरं यन्त्रेण सहमानं पश्येति । अत्र वीतरागचिदानन्दैकस्वभावं परमात्मतत्त्वमसेवमाना अजानन्तो

वीतरागनिर्विकल्पसमाधिबलेन निश्चलचित्तेनाभावयन्तश्च जीवा मिथ्यामार्गं रोचमानाः पञ्चेन्द्रियविषयासक्ताः सन्तो नरनारकादिगतिषु यन्त्रपीडनक्रकचविदारणशूलारोहणादि-नानादुःखं सहन्त इति भावार्थः ॥११६॥

**तिलणियरु णेहहँ लग्गिवि जलसिंचणु पयणिद्दलणु जंति पुणु-पुणु पीलण-दुक्खु सहंतउ पिक्खु ॥११६॥** तिलों का समूह स्नेह (तेल-चिकनाई) के कारण जलसिंचन, पैरों से खूंदे जाने, घाणी में बार-बार पेरे जाने का दुःख सहता है, उसे देखो। **भावार्थ**—वीतरागचिदानन्दैकस्वभावरूप परमात्मतत्त्व की आराधना न करते हुए, वीतराग निर्विकल्प समाधि के बल से निश्चल चित्त से उसकी भावना न करते हुए, अज्ञानी जीव मिथ्यामार्ग मे मोहित हुए, पंचेन्द्रियो के विषयों में आसक्त हुए, नर-नारकादि गतियों मे यंत्रपीडन-चक्रविदारण-शूलारोहणादि के अनेक दुःख सहते है ॥११६॥

**ते चिय धण्णा ते चिय सप्पुरिसा ते जियंतु जिय-लोए।**
**बोद्दह-दहम्मि पडिया तरंति जे चेव लीलाए ॥११७॥**

ते चैव धन्या ते चैव सत्पुरुषाः ते जीवन्तु जीवलोके।
यौवनद्रहे पतिता तरन्ति ये चैव लीलया ॥११७॥

ते चैव धन्यास्ते चैव सत्पुरुषास्ते जीवन्तु जीवलोके। ते के। बोद्दहशब्देन यौवनं स एव द्रहो महाह्लदस्तत्र पतिताः सन्तस्तरन्ति ये चैव। कया। लीलयेति। अत्र विषयाकाक्षारूपस्नेहजलप्रवेशरहितेन सम्यग्दर्शनज्ञानचारित्रामूल्यरत्नभाण्डपूर्णेन निज-शुद्धात्मभावनापोतेन यौवनमहाह्लदं ये तरन्ति त एव धन्यास्त एव सत्पुरुषा इति तात्पर्यम् ॥११७॥

**ते चिय धण्णा, ते चिय सप्पुरिसा, ते जियलोए जियंतु ! जे चेव बोद्दह-दहम्मि पडिया लीलाए तरंति ॥११७॥** वे ही धन्य है, वे ही सत्पुरुष है और वे ही जीव इस जीवलोक में जीते है जो यौवन के सरोवर मे गिर कर भी उसे लीलामात्र मे तैर जाते हैं। **भावार्थ**—विषयवाछा रूप जो स्नेहजल, उसके प्रवेश से रहित जो सम्यग्दर्शन-ज्ञान-चारित्ररूपी अमूल्य रत्नों से भरा निज शुद्धात्मभावनारूपी जहाज उससे युवावस्था रूपी महान् सरोवर को तैर जाते है, वे ही धन्य है, वे ही सत्पुरुष हैं, यह तात्पर्य है ॥११७॥

कि बहुना विस्तरेण—

अब, मोक्ष के कारण वैराग्य को दृढ करते है—

**मोक्खु जि साहिउ जिणवरहिँ छंडिवि बहु-विहु रज्जु।**
**भिक्ख-भरोडा जीव तुहुँ करहि ण अप्पउ कज्जु ॥११८॥**

मोक्ष एव साधितः जिनवरैः त्यक्त्वा बहुविधं राज्यम्।
भिक्षाभोजन जीव त्वं करोषि न आत्मीयं कार्यम् ॥११८॥

मोक्खु जि इत्यादि पदखण्डनारूपेण व्याख्यानं क्रियते । **मोक्खु जि साहिउ** मोक्ष एव साधित निरवशेषनिराकृतकर्ममलकलङ्कस्यात्मन आत्यन्तिकस्वाभाविकज्ञानादि-गुणास्पदमवस्थान्तरं मोक्षः स साधितः । कैः । **जिणवरहिं** जिनवरैः । किं कृत्वा । **छंडिवि** त्यक्त्वा । किम् । **बहुविहुरज्जु** सप्ताङ्गराज्यम् । केन । भेदाभेदरत्नत्रय-भावनाबलेन । एवं ज्ञात्वा **भिक्खभरोडा जीव** भिक्षाभोजन हे जीव **तुहुँ** त्व **करहि ण अप्पउ कज्जु** किं न करोषि आत्मीयं कार्यमिति । अत्रेदं व्याख्यानं ज्ञात्वा बाह्याभ्यन्तर-परिग्रहं त्यक्त्वा वीतरागनिर्विकल्पसमाधौ स्थित्वा च विशिष्टतपश्चरणं कर्तव्यमित्य-भिप्राय. ॥११८॥

**जिणवरहिँ बहुविहु रज्जु छंडिवि मोक्खु जि साहिउ । जीव भिक्खभरोडा तुहुँ अप्पउ कज्जु ण करहि ॥११८॥** जिनवरदेवों ने अनेक प्रकार के राज्यवैभव का परित्याग कर मोक्ष की ही साधना की । हे जीव ! भिक्षा से भोजन करने वाला तू अपना काम-आत्मकल्याण भी नही करता । सम्पूर्ण कर्ममलकलंक से रहित जो आत्मा उसके स्वाभाविक ज्ञानादि गुणो का स्थान तथा ससारा-वस्था से भिन्न अवस्था का होना वह मोक्ष है । उस मोक्ष को जिनवरो ने बहुत प्रकार की राज्यादि विभूति छोड़कर सिद्ध किया । राज्य के सात अग होते है– राजा, मन्त्री, सुहृद्, कोष, राष्ट्र, दुर्ग और सेना । इन सबको उन्होने भेदाभेदरत्नत्रय की भावना के बल से छोड दिया । यह जानकर भी भिक्षा से भोजन करने वाले हे जीव ! तू आत्मकल्याण क्यो नही करता ? **भावार्थ**–यह है कि बाह्याभ्यन्तर परिग्रह को छोडकर, वीतरागनिर्विकल्प समाधि मे स्थित होकर, दुर्धर तप करना चाहिए ॥११८॥

अथ हे जीव त्वमपि जिनभट्टारकवदष्टकर्मनिर्मूलन कृत्वा मोक्ष गच्छेति संबोधयति—

अब समझाते है कि हे जीव ! तू भी जिनेन्द्र के समान आठ कर्मों का नाश कर मोक्ष को जा—

**पावहि दुक्खु महंतु तुहुँ जिय संसारि भमंतु ।**
**अट्ठ वि कम्मइँ णिद्दलिवि वच्चहि मुक्खु महंतु ॥११९॥**

प्राप्नोषि दु:ख महत् त्व जीव ससारे भ्रमन् ।
अष्टापि कर्माणि निर्दल्य व्रज मोक्ष महान्तम् ॥११९॥

पावहि इत्यादि । **पावहि दुक्खु महंतु** प्राप्नोषि दु:ख महद्रूपं **तुहुँ** त्वं **जिय** हे जीव । किं कुर्वन् । **संसारि भमंतु** निश्चयेन संसारे विपरीत शुद्धात्मविलक्षणं द्रव्यक्षेत्र-कालभवभावपञ्चभेदभिन्न संसार भ्रमन् । तस्मात्कि कुरु । **अट्ठवि कम्मइं णिद्दलिवि** शुद्धात्मोपलम्भबलेनाष्टापि कर्माणि निर्मूल्य **वच्चहि** व्रज । कम् । **मुक्खु** स्वात्मोपल-

ब्धिलक्षणं मोक्षम् । तथा चोक्तम्—'सिद्धिः स्वात्मोपलब्धिः' कथंभूतं मोक्षम् । **महंतु** केवलज्ञानादिमहागुणयुक्तत्वान्महान्तमित्यभिप्रायः ॥११६॥

**जिय ! दुहुँ संसारि भमंतु महंतु दुक्खु पावहि । अट्ठ वि कम्मइँ णिद्दलिवि महंतु मुक्खु वच्चहि ॥११६॥** हे जीव ! तू ससार में घूमते हुए महान् दुःख प्राप्त करेगा अतः आठो ही कर्मों का नाश कर महान् मोक्ष मे जा । **भावार्थ**—निश्चय से ससार से विपरीत जो शुद्धात्मा है, उससे भिन्न द्रव्य, क्षेत्र, काल, भव, भावरूप पाँच प्रकार के परावर्तनरूप संसार में भटकते हुए चारो गतियों के दुःख प्राप्त करेगा, निगोदराशि में अनन्तकाल तक रुलेगा अतः आठकर्मों का क्षय कर के शुद्धात्मा की प्राप्ति के बल से रागादि का नाश कर निर्वाण को प्राप्त हो । कैसा है निर्वाण ? स्वात्मोपलब्धि ही जिसका लक्षण है । कहा भी है —'निजस्वरूप की प्राप्ति ही सिद्धि-मोक्ष है ।' वह मोक्ष केवलज्ञानादि महान् गुणो से युक्त होने के कारण महान् है ॥११६॥

अथ यद्यप्यल्पमपि दुःख सोढुमसमर्थस्तथापि कर्माणि किमिति करोषीति शिक्षां प्रयच्छति—

अब शिक्षा देते हैं कि जो तू थोडे मे भी दुःख को सहन करने मे असमर्थ है तो फिर ऐसे काम क्यो करता है जिनमे तुझे अनन्तकाल तक दुःख भोगने पडे ।

**जिय अणु-मित्तु वि दुक्खडा सहण ण सक्कहि जोइ ।**
**चउ-गइ-दुक्खहँ कारणइँ कम्मइँ कुणहि किं तोइ ॥१२०॥**

जीव अणुमात्राण्यपि दुःखानि सोढुं न शक्नोषि पश्य ।
चतुर्गतिदुःखाना कारणानि कर्माणि करोषि किं तथापि ॥१२०॥

जिय इत्यादि । **जिय** हे मूढजीव **अणुमित्तु वि** अणुमात्राण्यपि । कानि । **दुक्खडा** दुःखानि **सहण ण सक्कहि** सोढुं न शक्नोषि **जोइ** पश्य । यद्यपि **चउगइ-दुक्खहं कारणइं** परमात्मभावनोत्पन्नतात्त्विकवीतरागनित्यानन्दैकविलक्षणानां नारकादिदुःखाना कारणभूतानि **कम्मइं कुणहि किं** कर्माणि करोषि किमर्थ **तोइ** यद्यपि दुःखानीष्टानि न भवन्ति तथापि इति । अत्रेद व्याख्यानं ज्ञात्वा कर्मास्रवप्रतिपक्षभूतरागादिविकल्परहिता निजशुद्धात्मभावना कर्तव्येति तात्पर्यम् ॥१२०॥

**जिय ! अणुमित्तु वि दुक्खडा सहणं ण सक्कहि, जोइ । तोइ चउ-गइ-दुक्खहँ कारणइँ कम्मइँ किं कुणहि ॥१२०॥** हे जीव ! जब तू अणु मात्र भी दुःख सहने में असमर्थ है, तो देख-फिर चारों गतियो के दुःखो के कारणभूत कर्म क्यो करता है ? **भावार्थ**—परमात्मभावना से उत्पन्न तत्त्वरूप वीतराग नित्यानन्द परम स्वभाव से भिन्न नरकादि के दुःखो के कारण कर्म ही है । यदि तुझे दुःख अच्छे नही लगते और तू दुःखों को अनिष्ट जानता है, तो दुःख के कारणभूत कर्मों का उपार्जन मत कर । यहाँ ऐसा व्याख्यान जान कर कर्मास्रव से रहित तथा रागादिविकल्परहित निजशुद्ध आत्मा की भावना ही करनी चाहिए, यह तात्पर्य है ॥१२०॥

**अथ बहिर्व्यासंगासक्तं जगत् क्षणमप्यात्मानं न चिन्तयतीति प्रतिपादयति—**

**अब कहते हैं कि बाह्य परिग्रह में आसक्त जगत् क्षणमात्र भी आत्मा का चिन्तन नहीं करता—**

**धंधइ पडियउ सयलु जगु कम्मइँ करइ अयाणु ।**
**मोक्खहँ कारणु एक्कु खणु णवि चिंतइ अप्पाणु ।।१२१।।**

धान्धे (?) पतित सकल जगत् कर्माणि करोति अज्ञानी ।
मोक्षस्य कारण एक क्षणं नव चिन्तयति आत्मानम् ।।१२१।।

**धंधइ** इत्यादि । **धंधइ** धान्धे मिथ्यात्वविषयकषायनिमित्तोत्पन्ने दुर्ध्यानार्तरौद्रव्यासंगे **पडियउ** पतितं व्यासक्तम् । किम् । **सयलु जगु** समस्त जगत्, शुद्धात्मभावनापराङ्मुखो मूढप्राणिगणः **कम्मइं करइ** कर्माणि करोति । कथभूत जगत् । **अयाणु** विशिष्टभेदज्ञानरहितं **मोक्खहं कारणु** अनन्तज्ञानादिस्वरूपमोक्षकारणं **एक्कु खणु** एकक्षणमपि **णवि चिंतइ** नैव ध्यायति । कम् । **अप्पाणु** वीतरागपरमाह्लादरसास्वादपरिणतं स्वशुद्धात्मानमिति भावार्थः ।।१२१।।

**धंधइ पडियउ सयलु जगु अयाणु कम्मइँ करइ । मोक्खहँ कारणु अप्पाणु एक्कु खणु णवि चिंतइ ।।१२१।।** जगत् के धन्धे मे यानी मिथ्यात्व और विषयकषाय के निमित्त से उत्पन्न दुर्ध्यानिआर्त्त और रौद्र मे पडा हुआ सब जगत् अर्थात् जीव—शुद्धात्मभावना से पराङ्मुख मूढ प्राणी समूह—आठों कर्म करता है । परन्तु मोक्ष के कारणभूत—अनन्तज्ञानादि स्वरूप मोक्ष के कारणभूत शुद्धात्मा का एक क्षण भी चिन्तन नही करता । **भावार्थ**—मोक्ष की प्राप्ति के लिए वीतराग परमानन्द रसास्वाद परिणत स्व शुद्धात्मा का ध्यान करना चाहिए ।।१२१।।

अथ तमेवार्थं द्रढयति—

अब, इसी बात को दृढ करते है—

**जोणि-लक्खइँ परिभमइ अप्पा दुक्खु सहंतु ।**
**पुत्त-कलत्तहिँ मोहियउ जाव ण णाणु महंतु ।।१२२।।**

योनिलक्षाणि परिभ्रमति आत्मा दुःख सहमान ।
पुत्रकलत्रै. मोहित यावन्न ज्ञान महत् ।।१२२।।

**जोणि** इत्यादि । **जोणिलक्खइं परिभमइ** चतुरशीतियोनिलक्षणानि परिभ्रमति । **कोऽसौ** । **अप्पा** बहिरात्मा । किं कुर्वन् । **दुक्खु सहंतु** निजपरमात्मतत्त्वध्यानोत्पन्नवीतरागसदानन्दैकरूपव्याकुलत्वलक्षणपारमार्थिकसुखाद्विलक्षणं शारीरमानसदुःखं सहमानः । कथंभूत. सन् । **पुत्तकलत्तहिं मोहियउ** निजपरमात्मभावनाप्रतिपक्षभूतैः पुत्र-

कलत्रैः मोहितः । किंपर्यन्तम् । **जाव ण** यावत्कालं न । किम् । **णाणु** ज्ञानम् । किं विशिष्टम् । **महंतु** महतो मोक्षलक्षणस्यार्थस्य साधकत्वाद्वीतरागनिर्विकल्पस्वसंवेदन-ज्ञानं महदित्युच्यते । तेन कारणेन तदेव निरन्तरं भावनीयमित्यभिप्रायः ।।१२२।।

**जाव महंतु णाणु ण अप्पा पुत्त-कलत्तहिं मोहियउ दुक्खु सहंतु जोसिलक्खइँ परिभमइ ।।१२२।।** जब तक आत्मा को श्रेष्ठ ज्ञान नहीं होता तब तक यह जीव पुत्र-स्त्री आदि से मोहित हुआ, अनेक दुःख सहन करता हुआ चौरासी लाख योनियों में भटकता फिरता है । **भावार्थ**-यह जीव बहिरात्मा बना हुआ है और चौरासी लाख योनियों में अनेक दुःख सहता हुआ भटक रहा है । निज परमात्मतत्त्व के ध्यान से उत्पन्न वीतराग परम आनन्दरूप निर्व्याकुल अतीन्द्रिय सुख से विमुख शरीर और मन के अनेक सुख-दुःखों को यह सहता है । निज परमात्मा की भावना के शत्रु जो देह सम्बन्धी माता, पिता, भ्राता, मित्र, पुत्र कलत्रादि है उनसे मोहित है, तब तक यह अज्ञानी है, वीतरागनिर्विकल्प स्वसंवेदनज्ञान से रहित है । ज्ञान मोक्ष का साधन है, ज्ञान ही से मोक्ष की सिद्धि होती है अतः हमेशा ज्ञान की ही भावना करनी चाहिए ।।१२२।।

अथ हे जीव गृहपरिजनशरीरादिममत्वं मा कुर्विति संबोधयति—

अब समझाते है कि हे जीव ! तू घर, परिजन, शरीरादि मे ममता मत कर—

**जीव म जाणहि अप्पणउँ घरु परियणु तणु इट्ठु ।**
**कम्मायत्तउ कारिमउ आगमि जोइहिँ दिट्ठु ।।१२३।।**

जीव मा जानीहि आत्मीयं गृहं परिजनं तनुं इष्टम् ।
कर्मायत्तं कृत्रिमं आगमे योगिभिः दृष्टम् ।।१२३।।

जीव इत्यादि । **जीव म जाणहि** हे जीव मा जानीहि **अप्पणउँ** आत्मीयम् । किम् । **घरु परियणु तणु इट्ठु** गृहं परिजनं शरीरमिष्टमित्रादिकम् । कथंभूतमेतत् । **कम्मायत्तउ** शुद्धचेतनास्वभावादमूर्तात्परमात्मनः सकाशाद्विलक्षणं यत्कर्म तदुदयेन निर्मितत्वात् कर्मायत्तम् । पुनरपि कथंभूतम् । **कारिमउ** अकृत्रिमात् टङ्कोत्कीर्णज्ञायकैकस्वभावात् शुद्धात्मद्रव्याद्विपरीतत्वात् कृत्रिमं विनश्वरम् । इत्थंभूतं **दिट्ठु** दृष्टम् । कैः । **जोइहिं** परमज्ञानसंपन्नदिव्ययोगिभिः । क्व दृष्टम् । **आगमि** वीतरागसर्वज्ञप्रणीतपरमागमे इति । अत्रेदमध्रुवव्याख्यानं ज्ञात्वा ध्रुवे स्वशुद्धात्मस्वभावे स्थित्वा गृहादिपरद्रव्ये ममत्वं न कर्तव्यमिति भावार्थः ।।१२३।।

**जीव ! घरु परियणु तणु इट्ठु अप्पणउँ म जाणहि । आगमि जोइहिँ दिट्ठु कम्मायत्तउ कारिमउ ।।१२३।।** हे जीव ! तू घर, परिवार, शरीर और इष्ट पदार्थों को अपने मत जान क्योंकि परमागम में योगियों ने ऐसा दिखलाया है कि ये कर्माधीन हैं और विनाशीक हैं । ये गृहादिक पदार्थ शुद्धचेतनस्वभाव अमूर्त निज आत्मा से भिन्न जो शुभाशुभ कर्म हैं, उनके उदय से उत्पन्न

होने के कारण कर्माधीन हैं और अकृत्रिम टंकोत्कीर्णज्ञायक स्वभाव शुद्धात्मद्रव्य से विपरीत होने के कारण कृत्रिम और विनाशीक है। ऐसा वीतरागसर्वज्ञप्रणीत परमागम में परमज्ञानसम्पन्न दिव्य योगियों ने देखा है। यहाँ ऐसा व्याख्यान जानकर यानी सब पर-पदार्थों को अनित्य जान कर नित्यानन्दरूप निज शुद्धात्म स्वभाव में ठहर कर गृहादिक परद्रव्य में ममता नहीं करनी चाहिए। यह **भावार्थ** है ॥१२३॥

अथ गृहपरिवारादिचिन्तया मोक्षो न लभ्यत इति निश्चिनोति—

अब यह निश्चय करते है कि घर-परिवारादि की चिन्ता से मोक्ष नहीं मिलता—

**मुक्खु ण पावहि जीव तुहुं घरु परियणु चिंतंतु ।**
**तो वरि चिंतहि तउ जि तउ पावहि मोक्खु महंतु ॥१२४॥**

मोक्षं न प्राप्नोषि जीव त्वं गृहं परिजनं चिन्तयन् ।
ततः वरं चिन्तय तपः एव तपः प्राप्नोषि मोक्षं महान्तम् ॥१२४॥

**मुक्खु** इत्यादि। **मुक्खु** कर्ममलकलङ्करहितकेवलज्ञानाद्यनन्तगुणसहितं मोक्षं **ण पावहि** न प्राप्नोषि न केवलं मोक्षं निश्चयव्यवहाररत्नत्रयात्मकं मोक्षमार्गं च जीव हे मूढ **जीव तुहुं** त्वम्। किं कुर्वन् सन्। **घरु परियणु चिंतंतु** गृहपरिवारादिकं परद्रव्यं चिन्तयन् सन् **तो** ततः कारणात् **वरि** वरं किंतु **चिंतहि** चिन्तय ध्याय। किम्। **तउ जि तउ** तपस्तप एव विचिन्तय नान्यत्। तपश्चरणचिन्तनात् किं फलं भवति। **पावहि** प्राप्नोषि। कम्। **मोक्खु** पूर्वोक्तलक्षणं मोक्षम्। कथंभूतं। **महंतु** तीर्थकरपरमदेवादि-महापुरुषैराश्रितत्वान्महान्तमिति। अत्र बहिर्द्रव्येच्छानिरोधेन वीतरागतात्त्विकानन्द-परमात्मरूपे निर्विकल्पसमाधौ स्थित्वा गृहादि-ममत्वं त्यक्त्वा च भावना कर्तव्येति तात्पर्यम् ॥१२४॥

**जीव ! तुहुं घरु परियणु चिंतंतु मुक्खु ण पावहि। तो वरि तउ जि तउ चिंतहि, महंतु मोक्खु पावहि ॥१२४॥** हे जीव ! तू घर-परिवार की चिन्ता करते हुए मोक्ष कभी नहीं पा सकता अतः उत्तम तप का ही बार-बार चिन्तन कर क्योंकि तप से ही श्रेष्ठ मोक्षसुख को पा सकेगा। **भावार्थ**-तू गृहादि पर-वस्तुओं की चिन्ता रखते हुए कर्मकलंक रहित केवलज्ञानादि अनन्तगुण सहित मोक्ष को नहीं पा सकेगा और मोक्षमार्ग निश्चय व्यवहाररत्नत्रय को भी नहीं पा सकेगा। अतः इनका चिन्तन छोडकर तप का चिन्तन कर। तप से ही मोक्ष की प्राप्ति होगी। कैसा है मोक्ष ? वह मोक्ष तीर्थंकर परमदेवाधिदेव महापुरुषो से आश्रित है अतः महान् है, उत्कृष्ट है। यहाँ परद्रव्य की इच्छा को रोक कर वीतराग तात्त्विकानन्द परमात्मरूप में निर्विकल्प समाधि मे ठहर कर, गृहादि का ममत्व त्याग कर निजस्वरूप की भावना करनी चाहिए, यह तात्पर्य है। आत्मभावना के अतिरिक्त कुछ भी करने योग्य नहीं ॥१२४॥

अथ जीवहिंसादोषं दर्शयति—

अब जीवहिंसा के दोष दिखाते हैं—

**मारिवि जीवहँ लक्खडा जं जिय पाउ करीसि ।**
**पुत्त-कलत्तहँ कारणइँ तं तुहुँ एक्कु सहीसि ।।१२५।।**

मारयित्वा जीवाना लक्षाणि यत् जीव पापं करिष्यसि ।
पुत्रकलत्राणा कारणेन तत् त्वं एक सहिष्यसे ।।१२५।।

मारिवि इत्यादि । **मारिवि जीवहं लक्खडा** रागादिविकल्परहितस्य स्वस्वभावनालक्षणस्य शुद्धचैतन्यप्राणस्य निश्चयेनाभ्यन्तरं वधं कृत्वा बहिर्भागे चानेकजीवलक्षाणाम् । केन हिंसोपकरणेन । **पुत्तकलत्तहं कारणइं** पुत्रकलत्रममत्वनिमित्तोत्पन्नदृष्टश्रुतानुभूतभोगाकाक्षास्वरूपतीक्ष्णशस्त्रेण । **जं जिय पाउ करीसि** हे जीव यत्पापं करिष्यसि **तं तुहुँ एक्कु सहीसि** तत्पापफल त्वं कर्ता नरकादिगतिष्वेकाकी सन् सहिष्यसे हि । अत्र रागाद्यभावो निश्चयेनाहिसा भण्यते । कस्मात् निश्चयशुद्धचैतन्यप्राणस्य रक्षाकारणत्वात्, रागाद्युत्पत्तिस्तु निश्चयहिंसा । तदपि कस्मात् । निश्चयशुद्धप्राणस्य हिसाकारणात् । इति ज्ञात्वा रागादिपरिणामरूपा निश्चयहिसा त्याज्येति भावार्थः । तथा चोक्तं **निश्चयहिंसालक्षणम्–"रागादीणमणुप्पा अहिंसगत्तेत्ति देसिदं समए । तेसिं चेवुप्पत्ती हिंसेति जिणेहिं णिद्दिट्ठं ।।"** ।।१२५।।

**जिय ! पुत्तकलत्तहं कारणइं लक्खडा जीवहँ मारिवि जं पाउ करीसि तं तुहुँ एक्कु सहीसि** ।।१२५।। हे जीव ! पुत्र-कलत्रादि परिजनो के कारण जो तू लाखों जीवो को मार कर पापार्जन करता है उसके फल को तू अकेला ही सहेगा । **भावार्थ**–पुत्रादि कुटुम्ब के ममत्व के निमित्त से उत्पन्न— देखे, सुने और अनुभूत भोगाकांक्षा रूपी तीक्ष्ण शस्त्र से निश्चय से तू रागादिविकल्परहित अपने शुद्धचैतन्यप्राणों का अभ्यन्तर में वध करता है और बाह्य मे अनेक जीवों का घात करता है । इससे हे जीव ! तू जो पापार्जन करता है, उस पाप के फल को तू नरकादि गतियो मे अकेला ही सहेगा । यहाँ रागादि के अभाव को निश्चय अहिंसा कहा गया है क्योंकि रागादि के अभाव से शुद्धचैतन्य प्राणों की रक्षा होती है और रागादि की उत्पत्ति मे आत्मस्वभाव का घात होता है अतः वह निश्चयहिंसा कही गई है । ऐसा जान कर रागादिपरिणाम रूप निश्चयहिंसा का त्याग करना चाहिए । **निश्चयहिंसा** का लक्षण अन्यत्र भी ऐसा कहा है—"रागादिक का अभाव ही शास्त्र में अहिंसा कहा गया है । जिनशासन में जिनेश्वर देवो ने रागादिक की उत्पत्ति को ही हिंसा कहा है ।" ।।१२५।।

अथ तमेव हिंसादोषं द्रढयति—

अब उसी हिंसादोष को दृढ करते हैं—

**मारिवि चूरिवि जीवडा जं तुहुँ दुक्खु करीसि ।**
**तं तह पासि प्रणंत-गुण अवसइँ जीव लहीसि ।।१२६।।**

मारयित्वा चूर्णयित्वा जीवान् यत् त्वं दु ख करिष्यसि ।
तत्तदपेक्षया अनन्तगुणं अवश्यमेव जीव लभसे ।।१२६।।

मारिवि इत्यादि । **मारिवि** बहिर्विषये अन्यजीवान् प्राणिप्राणवियोगलक्षणेन मारयित्वा **चूरिवि** हस्तपादाद्येकदेशच्छेदरूपेण चूरयित्वा । कान् । **जीवडा** जीवान् निश्चयेनाभ्यन्तरे तु मिथ्यात्वरागादिरूपतीक्ष्णशस्त्रेण शुद्धात्मानुभूतिरूपनिश्चयप्राणांश्च **जं तुहुँ दुक्खु करीसि** यद्दुःख त्वं कर्ता करिष्यसि तेषु पूर्वोक्तस्वपरजीवेषु **तं तह पासि अणंतगुणु** तद्दुःखं तदपेक्षया अनन्तगुण **अवसइँ** अवश्यमेव **जीव** हे मूढजीव **लहीसि** प्राप्नोषीति । अत्राय जीवो मिथ्यात्वरागादिपरिणत पूर्व स्वयमेव निजशुद्धात्मप्राण हिनस्ति बहिर्विषये अन्यजीवाना प्राणघातो भवतु मा भवतु नियमो नास्ति । परघातार्थं तप्ताय.पिण्डग्रहणेन स्वहस्तदाहवत् इति भावार्थ. । तथा चोक्तम्–**"स्वयमेवात्मनात्मानं हिनस्त्यात्मा कषायवान् । पूर्वं प्राण्यन्तराणां तु पश्चात्स्याद्वा न वा वधः ।।"** ।।१२६।।

**जीव ! जं तुहुँ जीवडा मारिवि चूरिवि दुक्खु करीसि तं तह पासि अणंतगुण अवसइँ लहीसि ।।१२६।।** हे जीव ! जो तू पर जीवो को मारकर, चूर कर उन्हे दु खी करता है, तो तू उसका फल उसकी अपेक्षा अनन्तगुणा निश्चय से प्राप्त करेगा । **भावार्थ**–निर्दय होकर अन्य जीवो के प्राणो का उनसे वियोग करना—उन्हे मारना है और हाथ-पैर आदि अगो को काटना सो उन्हे चूरना है । बाह्य मे तो इस प्रकार जीवो को दु खित करके और अन्तरग मे मिथ्यात्वरागादिरूपतीक्ष्णशस्त्र से शुद्धात्मानुभूति रूप निश्चय प्राणो का घात करके जिस दु ख को तू करता है, वह दु ख उसकी अपेक्षा अनन्तगुणा होकर तुझे अवश्य मिलेगा । यहाँ यह कहा गया है कि मिथ्यात्वरागादिरूप परिणत यह जीव पहले स्वय ही निजशुद्धात्मप्राणो का घात करता है, बाह्य मे अन्य जीवो के प्राणों का घात हो या न हो, ऐसा नियम नहीं है । जैसे दूसरे को मारने के लिए गर्म लोहे का गोला पकड़ने से अपने हाथ तो पहले निस्सन्देह जल ही जाते है । कहा भी है –"कषायवान् आत्मा पहले तो आप ही अपना घात करता है, बाद मे परजीव का घात हो या न भी हो ।" ।।१२६।।

अथ जीववधेन नरकगतिस्तद्रक्षणे स्वर्गो भवतीति निश्चिनोति—

अब यह निश्चय करते हैं कि जीववध से नरकगति मिलती है और उसकी रक्षा करने से स्वर्ग मिलता है—

**जीव वहंतहँ णरय-गइ अभय-पदाणे सग्गु ।**
**बे पह जवला दरिसिया जहिँ रुच्चइ तहिँ लग्गु ।।१२७।।**

जीवं घ्नतां नरकगतिः अभयप्रदानेन स्वर्गः।
द्वौ पन्थानौ समीपौ दर्शितौ यत्र रोचते तत्र लग ॥१२७॥

जीव वहंतहं इत्यादि । **जीव वहंतहं** निश्चयेन मिथ्यात्वविषयकषायपरिणामरूपं वधं स्वकीयजीवस्य व्यवहारेणेन्द्रियबलायुःप्राणापानविनाशरूपमन्यजीवानां च वधं कुर्वतां **णरयगइ** नरकगतिर्भवति **अभयपदाणें** निश्चयेन वीतरागनिर्विकल्पस्वसंवेदनपरिणामरूपमभयप्रदानं स्वकीयजीवस्य व्यवहारेण प्राणरक्षारूपमभयप्रदानं परजीवानां च कुर्वतां **सग्गु** स्वस्याभयप्रदानेन मोक्षो भवत्यन्यजीवानामभयदानेन स्वर्गश्चेति **बे पह जवला दरिसिया** एव द्वौ पन्थानौ समीपे दर्शितौ । **जहिं रुच्चइ तहिं लग्गु** हे जीव यत्र रोचते तत्र लग्नो भव त्वमिति । कश्चिदज्ञानी प्राह । प्राणा जीवादभिन्ना भिन्ना वा, यद्यभिन्ना. तर्हि जीववत्प्राणानां विनाशो नास्ति, अथ भिन्नास्तर्हि प्राणवधेऽपि जीवस्य वधो नास्त्यनेन प्रकारेण जीवहिंसैव नास्ति कथं जीववधे पापबन्धो भविष्यतीति । परिहारमाह । कथञ्चिद्भेदाभेदः । तथाहि—स्वकीयप्राणे हृते सति दुःखोत्पत्तिदर्शनाद्व्यवहारेणाभेदः सैव दुःखोत्पत्तिस्तु हिंसा भण्यते ततश्च पापबन्धः । यदि पुनरेकान्तेन देहात्मनोर्भेद एव तर्हि परकीयदेहघाते दुःखं न स्यान्न च तथा । निश्चयेन पुनर्जीवे गतेऽपि देहो न गच्छतीति हेतोर्भेद एव । ननु तथापि व्यवहारेण हिंसा जाता पापबन्धोऽपि न च निश्चयेन इति । सत्यमुक्तं त्वया, व्यवहारेण पापं तथैव नारकादिदुःखमपि व्यवहारेणेति । तदिष्टं भवता चेत्तर्हि हिंसां कुरुत यूयमिति ॥१२७॥

**जीव वहंतहं णरयगइ अभयपदाणें सग्गु, बे पह जवला दरिसिया जहिं रुच्चइ तहिं लग्गु** ॥१२७॥ जीवों को मारने वालों की नरकगति होती है और उन्हें अभय देने से स्वर्ग होता है। ये दो मार्ग दिखाये हैं—अब जिसमें तेरी रुचि हो उसी में लग। **भावार्थ**–निश्चय से मिथ्यात्व विषय-कषायरूप परिणाम निजघात है और व्यवहारनय मे पर जीवो के इन्द्रिय, बल, आयु, श्वासोच्छ्वास रूप प्राणो का विनाश पर-प्राणघात है। ऐसा करने वालो को नरकगति मिलती है। हिंसक नरक के ही पात्र होते है। निश्चयापेक्षा वीतरागनिर्विकल्प स्वसंवेदन परिणामरूप जो निजभावों का अभयदान निज जीव की रक्षा और व्यवहारापेक्षा परप्राणियो के प्राणो की रक्षारूप अभयदान-यह स्वदया-परदयारूप अभयदान है। यह करने वालो को स्वर्ग-मोक्ष मिलता है, इसमें सन्देह नही। ये दो मार्ग है–इनमे से जो अच्छा लगे उसी का अनुसरण करो। यहाँ कोई अज्ञानी तर्क करता है कि ये प्राण जीव से भिन्न है कि अभिन्न ? यदि जीव से अभिन्न है तो जैसे जीव का नाश नहीं होता, वैसे प्राणो का भी नाश नहीं हो सकता और यदि जीव से भिन्न है तो प्राणों का वध होने पर भी जीव का वध नहीं हो सकता, इस प्रकार से जीवहिंसा है ही नही। तुम कैसे जीववध मे पाप मानते हो ? **समाधान** करते है–कथंचित् प्राण जीव से भिन्न भी है और कथंचित् अभिन्न भी। अपने प्राणो का हरण होने पर दुःखोत्पत्ति देखी जाती है अतः व्यवहारनय से प्राण जीव से अभिन्न हैं। वही दुःखोत्पत्ति हिंसा कही जाती है, उसी से पापबन्ध होता है। यदि एकान्ततः देह

और जीव का सर्वथा भेद ही मानें तो फिर जैसे दूसरे की देह का घात होने पर अपने को दुःख नहीं होता वैसे ही अपनी देह का घात होने पर भी दुःख नहीं होना चाहिए था—परन्तु ऐसा नही है। व्यवहारनय से जीव और देह की एकता दिखाई देती है परन्तु निश्चय से एकता नही है। यदि निश्चय से भी एकता होवे तो जीव के जाने पर (परभव मे) इस देह को भी उसके साथ जाना चाहिए—पर देह नही जाती है अत. जीव और देह मे भेद भी है। यद्यपि निश्चयनय से भेद है तथापि व्यवहारनय से प्राणों के चले जाने से जीव दु खी होता है। सो जीव को दु.खी करना ही हिंसा है और हिंसा से पाप का बन्ध होता है। निश्चयनयापेक्षा जीव का घात नही होता, यह तुम्हारा कथन सत्य है परन्तु व्यवहारनय से प्राणवियोगरूप हिसा है ही और व्यवहारनय से पाप भी है। पाप के फल नरकादि के दु ख हैं, वे भी व्यवहारनय से ही है। यदि तुझे नरक के दु ख इष्ट लगते हैं तो तू हिंसा कर ।।१२७।।

अथ मोक्षमार्गे रतिं कुर्विति शिक्षां ददाति—

अब यह शिक्षा देते है कि तू मोक्षमार्ग मे प्रीति कर—

**मूढा सयलु वि कारिमउ भुल्लउ मं तुस कंडि ।**
**सिव-पहि णिम्मलि करहि रइ घरु परियणु लहु छंडि ।।१२८।।**

मूढ सकलमपि कृत्रिम भ्रान्त मा तुष कण्डय ।
शिवपथे निर्मले कुरु रति गृह परिजन लघु त्यज ।।१२८।।

मूढा इत्यादि । **मूढा सयलु वि कारिमउ** हे मूढजीव शुद्धात्मानं विहायान्यत् पञ्चेन्द्रियविषयरूपं समस्तमपि कृत्रिम विनश्वर **भुल्लउ म तुस कंडि** भ्रान्तो भूत्वा तुषकण्डनं मा कुरु। एव विनश्वरं ज्ञात्वा **सिवपहि णिम्मलि** शिवशब्दवाच्यविशुद्धज्ञानदर्शनस्वभावो मुक्तात्मा तस्य प्राप्त्युपाय: पन्था निजशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूप: स च रागादिरहितत्वेन निर्मल **करहि रइ** इत्थंभूते मोक्षे मोक्षमार्गे च रति प्रीति कुरु **घरु परियणु लहु छंडि** पूर्वोक्तमोक्षमार्गप्रतिपक्षभूत गृह परिजनादिक शीघ्र त्यजेति तात्पर्यम् ।।१२८।।

**मूढ ! सयलु वि कारिमउ भुल्लउ तुस मं कंडि । णिम्मलि सिवपहि रइ करहि । घरु परियणु लहु छंडि ।।१२८।।** हे मूढ जीव ! शुद्धात्मा के अतिरिक्त अन्य सब विषयादिक पदार्थ विनाशीक है, तू भ्रम से भूसे का खण्डन मत कर। तू परमपवित्र मोक्षमार्ग में प्रीति कर और घर परिवार आदि को शीघ्र ही छोड। **भावार्थ**—हे मूढ ! शुद्धात्मस्वरूप के सिवाय पचेन्द्रियों के विषयरूप सब पदार्थ नाशवान है। तू भ्रम से, असार भूसे को कूटने की तरह का काम मत कर। अत शीघ्र ही मोक्षमार्ग के प्रतिपक्षभूत घर-परिवार आदि को छोडकर मोक्षमार्ग का उद्यमी होकर, ज्ञानदर्शन स्वभाव को धारण करने वाले शुद्धात्मा की प्राप्ति का उपाय जो सम्यग्दर्शन-ज्ञान-चारित्ररूप मोक्षमार्ग है, उसमे प्रीति कर ।।१२८।।

अथ पुनरप्यध्रुवानुप्रेक्षां प्रतिपादयति—

पुनः अनित्यानुप्रेक्षा का प्रतिपादन करते हैं—

**जोइय सयलु वि कारिमउ णिक्कारिमउ ण कोइ ।**
**जीविं जंतिं कुडि ण गय इहु पडिछंदा जोइ ॥१२६॥**

योगिन् सकलमपि कृत्रिम निःकृत्रिम न किमपि ।
जीवेन यातेन देहो न गतः इमं दृष्टान्तं पश्य ॥१२६॥

जोइय इत्यादि । **जोइय** हे योगिन् **सयलु वि कारिमउ** टङ्कोत्कीर्णज्ञायकैकस्वभावादकृत्रिमाद्वीतरागनित्यानन्दैकस्वरूपात् परमात्मनः सकाशाद् यदन्यन्मनोवाक्कायव्यापाररूपं तत्समस्तमपि कृत्रिमं विनश्वरं **णिक्कारिमउ ण कोइ** अकृत्रिमं नित्यं पूर्वोक्त-परमात्मसदृशं संसारे किमपि नास्ति । अस्मिन्नर्थे दृष्टान्तमाह । **जीविं जंतिं कुडि ण गय** शुद्धात्मतत्त्वभावनारहितेन मिथ्यात्वविषयकषायासक्तेन यान्युपार्जितानि कर्माणि तत्कर्मसहितेन जीवेन भवान्तरं प्रति गच्छतापि कुडिशब्दवाच्यो देहः सहैव न गत इति हे जीव **इहु पडिछंदा जोइ** इमं दृष्टान्तं पश्येति । अत्रेदमध्रुवं ज्ञात्वा देहममत्वप्रभृतिविभावरहितनिजशुद्धात्मपदार्थभावना कर्तव्या इत्यभिप्रायः ॥१२६॥

**जोइय ! सयलु वि कारिमउ, णिक्कारिमउ ण कोइ । जीविं जंतिं कुडि ण गय । इहु पडिछंदा जोइ ॥१२६॥** हे योगी ! सब कुछ नश्वर है । अविनश्वर अकृत्रिम कुछ भी नहीं । जीव के जाने पर उसके साथ शरीर भी नहीं जाता—इस दृष्टान्त को प्रत्यक्ष देखो । **भावार्थ**—हे योगी ! टंकोत्कीर्ण, अमूर्त, केवल ज्ञायकस्वभावअकृत्रिम वीतराग परमानन्द स्वरूप परमात्मा से अन्य जो मन-वचन-काय के व्यापारादि सभी पदार्थ है, वे कृत्रिम हैं, विनश्वर है । अकृत्रिम परमात्मा के सदृश ससार मे कुछ भी नहीं है । सब क्षणभंगुर है । शुद्धात्मतत्त्व की भावना से रहित जो मिथ्यात्व विषयकषाय हैं, उनमें आसक्त होकर जीव ने जो कर्म उपार्जित किये हैं, उन कर्मों से जब यह जीव परभव मे गमन करता है, तब शरीर भी साथ नहीं जाता । अतः इन देहादिक सबको विनश्वर जान कर देहादि की ममता छोडनी चाहिए तथा सकल विभावरहित निज शुद्धात्मपदार्थ की भावना करनी चाहिए ॥१२६॥

अथ तपोधन प्रत्यध्रुवानुप्रेक्षां प्रतिपादयति—

*अब तपस्वियों के लिए अनित्यानुप्रेक्षा का प्रतिपादन करते है—*

**देउलु देउ वि सत्थु गुरु तित्थु वि वेउ वि कव्वु ।**
**वच्छु जु दीसइ कुसुमियउ इंधणु होसइ सव्वु ॥१३०॥**

देवकुलं देवोऽपि शास्त्रं गुरुः तीर्थमपि वेदोऽपि काव्यम् ।
वृक्षः यद् दृश्यते कुसुमितं इन्धनं भविष्यति सर्वम् ॥१३०॥

देउलु इत्यादि पदखण्डनारूपेण व्याख्यानं क्रियते । **देउलु** निर्दोषिपरमात्मस्थापनाप्रतिमाया रक्षणार्थं देवकुलं मिथ्यात्वदेवकुलं वा, **देउ वि** तस्यैव परमात्मनोऽनन्तज्ञानादिगुणस्मरणार्थं धर्मप्रभावनार्थं वा प्रतिमास्थापनारूपो देवो रागादिपरिणतदेवताप्रतिमारूपो वा, **सत्थु** वीतरागनिर्विकल्पात्मतत्त्वप्रभृतिपदार्थप्रतिपादकं शास्त्रं मिथ्याशास्त्रं वा, **गुरु** लोकालोकप्रकाशककेवलज्ञानादिगुणसमृद्धस्य परमात्मनः प्रच्छादको मिथ्यात्वरागादिपरिणतिरूपो महाऽज्ञानान्धकारदर्पः तद्व्यापियद्वचनदिनकरकिरणविदारितः सन् क्षणमात्रेण च विलयं गतः स च जिनदीक्षादायकः श्रीगुरुः तद्विपरीतो मिथ्यागुरुर्वा, **तित्थु वि** संसारतरणोपायभूतनिजशुद्धात्मतत्त्वभावनारूपनिश्चयतीर्थं तत्स्वरूपरत परमतपोधनानां आवासभूतं तीर्थकदम्बकमपि मिथ्यातीर्थसमूहो वा, **वेउ वि** निर्दोषिपरमात्मोपदिष्टवेदशब्दवाच्यः सिद्धान्तोऽपि परकल्पितवेदो वा **कव्वु** शुद्धजीवपदार्थादीनां गद्यपद्याकारेण वर्णकं काव्यं लोकप्रसिद्धविचित्रकथाकाव्यं वा, **वच्छु** परमात्मभावनारहितेन जीवेन यदुपार्जितं वनस्पतिनामकर्म तदुदयजनितं वृक्षकदम्बकं **जो दीसइ कुसुमियउ** यद् दृश्यते कुसुमितं पुष्पितं **इंधणु होसइ सव्वु** तत्सर्वं कालाग्नेरिन्धनं भविष्यति विनाशं यास्यतीत्यर्थः । अत्र तथा तावत् पञ्चेन्द्रियविषये मोहो न कर्तव्यः. प्राथमिकानां यानि धर्मतीर्थवर्तनादिनिमित्तानि देवकुलप्रतिमादीनि तत्रापि शुद्धात्मभावना कालेन कर्तव्येति संबंधः ॥१३०॥

**देउलु देउ वि सत्थु गुरु तित्थु वि वेउ वि कव्वु जु वच्छु कुसुमियउ दीसइ सव्वु इंधणु होसइ** ॥१३०॥ जिनालय, जिनेन्द्रदेव, शास्त्र, गुरु, तीर्थक्षेत्र, वेद (सिद्धान्त), काव्य, कुसुमित वृक्ष इत्यादि जो कुछ भी दिखाई देता है, वह सब काल का ईंधन हो जाएगा । **भावार्थ**–निर्दोष परमात्मा की स्थापना रूप प्रतिमा की रक्षा के लिए जो **देवालय** बनाया है, वह विनाशीक है । परमात्मा के अनन्त ज्ञानादिगुणों के स्मरण के लिए और धर्म की प्रभावना के लिए **देव** रूप मे जिस प्रतिमा की स्थापना की गई है, वह भी विनश्वर है । इसी तरह अन्य देव-प्रतिमायें भी विनाशीक है । वीतरागनिर्विकल्प आत्मतत्त्व आदि पदार्थों के प्रतिपादक जैन **शास्त्र** अथवा अन्य मिथ्याशास्त्र भी विनश्वर ही है । लोकालोकप्रकाशक केवलज्ञानादिगुणो से समृद्ध परमात्मा का प्रच्छादक जो मिथ्यात्व रागादिपरिणतिरूप महा अज्ञानरूप अन्धकारदर्प को दूर करने के लिए सूर्य के समान यानी जिनकी वचनरूपी किरणों से मोहान्धकार दूर हो गया है, ऐसे महामुनि **गुरु** भी विनश्वर है और इनके आचरण से विपरीत जो पाखण्डी, मिथ्यागुरु हैं वे भी क्षणभगुर है । ससारसमुद्र के तरने का कारण जो निज शुद्धात्मतत्त्व, उसकी भावनारूप जो निश्चयतीर्थ, उसमे लीन परम तपोधन के आवासभूत **तीर्थ** क्षेत्रादि या मिथ्यातीर्थादि सब विनश्वर है । निर्दोष परमात्मा जो सर्वज्ञ वीतरागदेव है उनसे उपदिष्ट द्वादशाग सिद्धान्त रूप **वेद** यद्यपि सनातन है तथापि क्षेत्र की अपेक्षा विनश्वर है, किसी समय है, किसी क्षेत्र में पाया जाता है, किसी समय नहीं पाया जाता, परमतियों का वेद भी विनश्वर है । शुद्ध जीवादि पदार्थों का गद्य-पद्यरूप मे वर्णन करने वाले **काव्य** अथवा लोकप्रसिद्ध कथाकाव्य भी विनश्वर हैं । परमात्मभावना से रहित जीव के द्वारा उपार्जित वनस्पतिनामकर्म के उदय से उत्पन्न

वृक्षसमूह जो अभी पुष्पित दिखाई देते हैं वे भी विनश्वर हैं। ये सभी पदार्थ कालरूपी अग्नि का ईंधन हो जाएंगे अर्थात् नष्ट हो जायेंगे। संसार का सब वैभव क्षणभंगुर है, ऐसा जान कर पंचेन्द्रियों के विषयों में मोह नहीं करना चाहिए। प्रथमावस्था में यद्यपि धर्मतीर्थ की प्रवृत्ति के निमित्त जैन-मन्दिर, जिनप्रतिमा, जिनधर्म और जैनधर्मी आदि में प्रेम करना योग्य है तथापि काल पाकर मात्र शुद्धात्मभावना ही करनी चाहिए ॥१३०॥

अथ शुद्धात्मद्रव्यादन्यत्सर्वमध्रुवमिति प्रकटयति—

अब कहते हैं कि शुद्धात्मद्रव्य के अतिरिक्त अन्य सब नश्वर है—

**एक्क जि मेल्लिवि बंभु परु भुवणु वि एहु असेसु ।**
**पुहविहिँ णिम्मिउ भंगुरउ एहउ बुज्झि विसेसु ॥१३१॥**

एवमेव मुक्त्वा ब्रह्म पर भुवनमपि एतद् अशेषम् ।
पृथिव्या निर्मापित भंगुर एतद् बुध्यस्व विशेषम् ॥१३१॥

एक्कु जि इत्यादि **एक्कु जि** एकमेव **मेल्लिवि** मुक्त्वा। किम्। **बंभु परु** परमब्रह्मशब्दवाच्यं नानावृक्षभेदभिन्नवनमिव नानाजीवजातिभेदभिन्नं शुद्धसंग्रहनयेन शुद्ध-जीवद्रव्य **भुवणु वि** भुवनमपि **एहु** इद प्रत्यक्षीभूतम्। कतिसख्योपेतम्। **असेसु** अशेषं समस्तमपि। कथभूतमिद सर्व **पुहविहिं णिम्मिउ** पृथिव्या लोके निर्मापितं **भंगुरउ** विनश्वर **एहउ बुज्झि विसेसु** इम विशेषं बुध्यस्व जानीहि त्व **हे प्रभाकरभट्ट**। अयमत्र भावार्थ.। विशुद्धज्ञानदर्शनस्वभावं परब्रह्मशब्दवाच्य शुद्धजीवतत्त्व मुक्त्वान्यत्पञ्चेन्द्रिय-विषयभूत विनश्वरमिति ॥१३१॥

**एक्कु परु बंभु जि मेल्लिवि पुहविहिँ एहु असेसु भुवणु वि णिम्मिउ भंगुरउ एहउ विसेसु बुज्झि** ॥१३१॥ एक शुद्ध जीवद्रव्यरूप परब्रह्म को छोड़ कर पृथ्वी पर जो लोक के पदार्थों की रचना है वह सब क्षणभगुर है, इस विशेष बात को तुम जानो। शुद्ध सग्रहनय की अपेक्षा समस्त जीवराशि एक है। जैसे अनेक वृक्षो से भरा हुआ वन एक कहा जाता है, उसी तरह नाना प्रकार के जीव जाति की अपेक्षा एक कहे जाते है वे सब जीव अविनाशी है और सब रचना विनाशीक है। हे प्रभाकर भट्ट ! तू ऐसा विशेष जान। **भावार्थ**-यह है कि निर्मल ज्ञानदर्शन स्वभावी परब्रह्म शब्द से वाच्य शुद्ध जीव तत्त्व को छोड कर अन्य जो पचेन्द्रियो के विषय हैं, वे सब क्षणिक हैं, नाशवान हैं ॥१३१॥

अथ पूर्वोक्तमध्रुवत्वं ज्ञात्वा धनयौवनयोस्तृष्णा न कर्तव्येति कथयति—

अब कहते हैं कि पूर्वोक्त पदार्थों को अनित्य जान कर धन-यौवन की तृष्णा नही करनी चाहिए —

**जे दिट्ठा सूरुग्गमणि ते अत्थवणि ण दिट्ठ ।**
**तेँ कारणि वढ धम्मु करि धणि जोव्वणि कउ तिट्ठ ॥१३२॥**

ये दृष्टाः सूर्योद्गमने ते अस्तमने न दृष्टाः ।
तेन कारणेन वत्स धर्मं कुरु धने यौवने का तृष्णा ॥१३२॥

जे दिट्ठा इत्यादि । **जे दिट्ठा** ये केचन दृष्टाः । क्व । **सूरुग्गमणि** सूर्योदये **ते अत्थवणि ण दिट्ठ** ते पुरुषा गृहधनधान्यादिपदार्था वा अस्तमने न दृष्टाः, एवमध्रुवत्वं ज्ञात्वा । **तें कारणिं वढ धम्मु करि** तेन कारणेन वत्स पुत्र सागारानगारधर्मं कुरु । **धणि जोव्वणि कउ तिट्ठ** धने यौवने वा का तृष्णा न कापीति । तद्यथा । गृहस्थेन धने तृष्णा न कर्तव्या तर्हि किं कर्तव्यम् । भेदाभेदरत्नत्रयाराधकानां सर्वतात्पर्येणाहारादिचतुर्विधं दानं दातव्यम् । नो चेत् सर्वसंगपरित्यागं कृत्वा निर्विकल्पपरमसमाधौ स्थातव्यम् । यौवनेऽपि तृष्णा न कर्तव्या, यौवनावस्थायां यौवनोद्रेकजनितविषयरागं त्यक्त्वा विषयप्रतिपक्षभूते वीतरागचिदानन्दैकस्वभावे शुद्धात्मस्वरूपे स्थित्वा च निरन्तरं भावना कर्तव्येति भावार्थः ॥१३२॥

**वढ ! जे सूरुग्गमणि दिट्ठा ते अत्थवणि ण दिट्ठ । ते कारणिं धम्मु करि, धणि जोव्वणि कउ तिट्ठ ॥१३२॥** हे शिष्य ! जो कुछ पदार्थ सूर्योदय के समय देखे थे वे सूर्यास्त के समय नहीं देखे जाते (क्योंकि नष्ट हो जाते हैं) अतः तू धर्म कर, धन और यौवन में क्या तृष्णा कर रहा है । **भावार्थ**-धन-धान्य, घर, मनुष्यादि पदार्थ जो प्रातःकाल देखे गए थे, वे सन्ध्यासमय नहीं दीखते, नष्ट हो जाते हैं । ऐसी क्षणभंगुरता को देख कर इन पदार्थों की तृष्णा छोड़नी चाहिए और सागार या अनगार धर्म धारण करना चाहिए । यहाँ कोई **प्रश्न** करे कि गृहस्थ धन की तृष्णा न करे तो क्या करे ? **उत्तर**-गृहस्थ को चाहिए कि वह निश्चय-व्यवहार रत्नत्रय के आराधक जो मुनि हैं उनकी सब प्रकार से सेवा करे, चार प्रकार का दान उन्हें दे । धर्म की इच्छा करे, धन की नहीं । जो किसी दिन प्रत्याख्यान की चौकड़ी के उदय से श्रावक के व्रत में भी रहे तो देवपूजा, गुरुसेवा, स्वाध्याय, दान, शील, उपवासादि अणुव्रतरूप धर्म करे और जो शक्ति होवे तो सर्व परिग्रह का त्याग कर यति के व्रत धारण कर निर्विकल्प परमसमाधि में रहे । विवेकी गृहस्थ धन की तृष्णा न करे । धन-यौवन असार है । यौवनावस्था में भी विषयतृष्णा न करे । विषय का राग छोड़ कर विषयों से पराङ्मुख जो वीतराग निजानन्द एक अखण्डस्वभावरूप शुद्धात्मा है, उसमें लीन होकर सदैव उसी की भावना करनी चाहिए ॥१३२॥

अथ धर्मतपश्चरणरहितानां मनुष्यजन्म वृथेति प्रतिपादयति—

अब कहते हैं कि धर्माचरण और तपश्चरण से रहितों का मनुष्य-जन्म वृथा है—

**धम्मु ण संचिउ तउ ण किउ रुक्खें चम्ममएण ।**
**खज्जिवि जर-उद्देहियए णरइ पडिव्वउ तेण ॥१३३॥**

धर्मो न संचितः तपो न कृतं वृक्षेण चर्ममयेन ।
खादयित्वा जरोद्देहिकया नरके पतितव्यं तेन ॥१३३॥

**धम्मु** इत्यादि । **धम्मु ण संचिउ** धर्मसंचयो न कृतः गृहस्थावस्थायां दानशील-पूजोपवासादिरूपसम्यक्त्वपूर्वको गृहिधर्मो न कृतः, दर्शनिकव्रतिकाद्येकादशविधश्रावक-धर्मरूपो वा । **तउ ण किउ** तपश्चरणं न कृतं तपोधनेन तु समस्तबहिर्द्रव्येच्छानिरोधं कृत्वा अनशनादिद्वादशविधतपश्चरणबलेन निजशुद्धात्मध्याने स्थित्वा निरन्तरं भावना न कृता । केन कृत्वा । **रुक्खें चम्ममएण** वृक्षेण मनुष्यशरीरचर्मनिर्वृत्तेन । येनैवं न कृतं गृहस्थेन तपोधनेन वा **णरइ पडिव्वउ तेण** नरके पतितव्यं तेन । किं कृत्वा । **खज्जिवि** भक्षयित्वा । कया कर्तृभूतया । **जरउद्देहियए** जरोद्देहिकया । इदमत्र तात्पर्यम् । गृहस्थेनाभेदरत्नत्रयस्वरूपमुपादेय कृत्वा भेदरत्नत्रयात्मकः श्रावकधर्मः कर्तव्यः, यतिना तु निश्चयरत्नत्रये स्थित्वा व्यावहारिकरत्नत्रयबलेन विशिष्टतपश्चरणं कर्तव्यं नो चेत् दुर्लभपरंपरया प्राप्तं मनुष्यजन्म निष्फलमिति ।।१३३।।

**चम्ममएण रुक्खें धम्मु ण संचिउ, तउ ण किउ । जर-उद्देहियए खज्जिवि तेण णरइ पडिव्वउ** ।।१३३।। जिसने मनुष्य-शरीररूपी चर्ममयी वृक्ष पाकर धर्म नही किया, तप भी नही किया, उसका शरीर वृद्धावस्थारूपी दीमक से खाया जाएगा, फिर वह नरक में पड़ेगा । **भावार्थ**—गृहस्थावस्था में जिसने सम्यक्त्वपूर्वक दान, शील, पूजा, उपवासादिरूप गृहस्थधर्म का पालन नहीं किया, दर्शनप्रतिमा, व्रतप्रतिमा आदि ग्यारह प्रतिमा के भेदरूप श्रावक का धर्म नही धारण किया तथा मुनि होकर सब पदार्थों की इच्छा का निरोध कर अनशन वगैरह बारह प्रकार का तप नही किया और तपश्चरण के बल से शुद्धात्मा के ध्यान मे ठहरकर निरन्तर भावना नही की; मनुष्य देहरूपी चर्ममयी वृक्ष को पाकर जिसने श्रावक का या मुनि का धर्म नही किया, उसका शरीर जरारूपी दीमक खाएगी फिर वह मर कर नरक मे गिरेगा । अत गृहस्थ को निश्चयरत्नत्रय की श्रद्धा कर निजस्वरूप को उपादेय जान कर व्यवहार रत्नत्रय रूप श्रावक का धर्म पालना चाहिए और यति को निश्चय रत्नत्रय मे ठहर कर व्यवहाररत्नत्रय के बल से विशेष तपश्चरण करना चाहिए—अन्यथा बड़ी दुर्लभता से प्राप्त यह मनुष्य-जन्म निष्फल ही होगा ।।१३३।।

अथ हे जीव जिनेश्वरपदे परमभक्तिं कुर्विति शिक्षां ददाति—

अब शिक्षा देते है कि हे जीव ! तू जिनपद की भक्ति कर—

**अरि जिय जिण-पइ भत्ति करि सुहि सज्जणु अवहेरि ।**
**तिं बप्पेण वि कज्जु णवि जो पाडइ संसारि ।।१३४।।**

अरे जीव जिनपदे भक्तिं कुरु सुखं स्वजन अपहर ।
तेन पित्रापि कार्यं नैव य. पातयति ससारे ।।१३४।।

**अरि जिय** इत्यादि । **अरि जिय** अहो भव्यजीव **जिणपइ भत्ति करि** जिनपदे भक्तिं कुरु गुणानुरागबन्धननिमित्तं जिनेश्वरेण प्रणीतश्रीधर्मे रतिं कुरु **सुहि सज्जणु**

**अवहेरि** संसारसुखसहकारिकारणभूतं स्वजनं सुखं गोत्रमप्यपहर त्यज । कस्मात् । **तिं बप्पेण** वि तेन स्नेहितपित्रापि **कज्जु णवि** कार्यं नैव । यः किं करोति । **जो पाडइ** यः पातयति । क्व । **संसारि** संसारसमुद्रे । तथा च । हे आत्मन्, अनादिकाले दुर्लभे वीतरागसर्वज्ञप्रणीते रागद्वेषमोहरहिते जीवपरिणामलक्षणे शुद्धोपयोगरूपे निश्चयधर्मे व्यवहारधर्मे च पुनः षडावश्यकादिलक्षणे गृहस्थापेक्षया दानपूजादिलक्षणे वा शुभोपयोग-स्वरूपे रतिं कुरु । इत्थंभूते धर्मे प्रतिकूलो यः त मनुष्यं स्वगोत्रजमपि त्यज तदनुकूल परगोत्रजमपि स्वीकुर्विति । अत्रायं भावार्थः । विषयसुखनिमित्त यथानुरागं करोति जीवस्तथा जिनधर्मं करोति तर्हि ससारे न पततीति । तथा चोक्तम्—"**विसयहं कारणि सव्वु जणु जिम अणुराउ करेइ । तिम जिणभासिए धम्मि जइ ण उ संसारि पडेइ ॥**" ॥१३४॥

**अरि जिय ! जिणपइ भत्ति करि, सुहि सज्जणु अवहेरि । तिं बप्पेण वि कज्जु णवि जो संसारि पाडइ ॥१३४॥** हे भव्य जीव ! तू जिनपद मे भक्ति कर । ससार सुख के निमित्त अपने स्वजनों का भी परित्याग कर । उन पिता से भी क्या प्रयोजन है जो समारसमुद्र मे इस जीव को गिरा दे । हे आत्मन् ! अनादिकाल से दुर्लभ जो वीतराग सर्वज्ञकथित रागद्वेषमोह-रहित शुद्धोप-योगरूप निश्चय धर्म और शुभोपयोगरूप व्यवहार धर्म है, उनमे भी षडावश्यकरूप यतिधर्म तथा दानपूजादि श्रावकधर्म—यह शुभोपयोगरूप धर्म है, इसमे प्रीति कर । इस धर्म से विमुख जो कोई अपने कुल का मनुष्य हो उसे भी छोड और इस धर्म के सन्मुख जो कोई पर कुटुम्ब का मनुष्य हो, उससे भी प्रीति कर । तात्पर्य यह है कि यह जीव विषयसुख मे जैसी प्रीति करता है, वैसी जो जिनधर्म मे करे तो संसार मे नही भटके । अन्यत्र भी कहा है—"जैसे विषयो के कारणो मे यह जीव बार-बार प्रेम करता है, वैसे जो जिनधर्म मे करे तो ससार मे परिभ्रमण नही करे ।" ॥१३४॥

अथ येन चित्तशुद्धिं कृत्वा तपश्चरण न कृत तेनात्मा वञ्चित इत्यभिप्रायं मनसि धृत्वा सूत्रमिद प्रतिपादयति——

जिसने चित्त को शुद्ध करके तपश्चरण नही किया, उसने अपने आत्मा को ठग लिया, यह अभिप्राय मन मे रख कर व्याख्यान करते है—

**जेण ण चिण्णउ तव-यरणु णिम्मलु चित्तु करेवि ।**
**अप्पा वंचिउ तेण पर माणुस-जम्मु लहेवि ॥१३५॥**

येन न चीर्णं तपश्चरण निर्मल चित्त कृत्वा ।
आत्मा वञ्चितः तेन पर मनुष्यजन्म लब्ध्वा ॥१३५॥

जेण इत्यादि । **जेण** येन जीवेन **ण चिण्णउ** न चरितं न कृतम् । किम् । **तवयरणु** बाह्याभ्यन्तरतपश्चरणम् । किं कृत्वा । **णिम्मलु चित्तु करेवि** कामक्रोधादि-

रहितं वीतरागचिदानन्दैकसुखामृततृप्तं निर्मलं चित्तं कृत्वा । **अप्पा वंचिउ तेण** आत्मा वञ्चितः तेन नियमेन । किं कृत्वा । **लहेवि** लब्ध्वा । किम् । **माणुसजम्मु** मनुष्य-जन्मेति । तथाहि । दुर्लभपरंपरारूपेण मनुष्यभवे लब्धे तपश्चरणेऽपि च निर्विकल्प-समाधिबलेन रागादिपरिहारेण चित्तशुद्धिः कर्तव्येति । येन चित्तशुद्धिर्न कृता स आत्म-वञ्चक इति भावार्थः । तथा चोक्तम्--"**चित्ते बद्धे बद्धो मुक्के मुक्को त्ति णत्थि संदेहो । अप्पा विमलसहावो मइलिज्जइ मइलिए चित्ते ।।**" ।।१३५।।

**जेण णिम्मलु चित्तु करेवि तवयरणु ण चिण्णउ तेण पर माणुस-जम्मु लहेवि अप्पा वंचिउ ।।१३५।।** जिस मनुष्य ने अपने चित्त को निर्मल करके बाह्याभ्यन्तर तप नहीं किया उसने श्रेष्ठ मनुष्य-जन्म को प्राप्त कर भी केवल अपना आत्मा ही ठगा । **भावार्थ**—परम दुर्लभ इस मानवदेह को पाकर कामक्रोधादि रहित वीतराग चिदानन्द सुखरूपी अमृत से अपना चित्त निर्मल करके जिसने बाह्याभ्यन्तर तप नहीं किया, उसने निश्चय ही अपने आत्मा को ठगा है । दुर्लभपरम्परा से प्राप्त मनुष्यदेह पाकर, तपश्चरण अंगीकार करके निर्विकल्प समाधि के बल से रागादि का त्याग कर परिणाम निर्मल करने चाहिए । जिन्होंने चित्त की शुद्धि नही की, वे आत्मवचक है । अन्यत्र भी कहा है- चित्त के बँधने से यह जीव बँधता है, जिनका चित्त परिग्रह से—धनधान्यादिक से आसक्त हुआ, वे ही कर्मबन्धन से बँधते हैं और जिनका चित्त परिग्रह से छूट गया, आशा-तृष्णा से अलग हो गया, वे ही मुक्त हुए । इसमे सन्देह नही है । यह आत्मा निर्मल स्वभाव है, सो चित्त के मैले होने से मैला होता है ।।१३५।।

अत्र पञ्चेन्द्रियविजय दर्शयति--

अत्र पञ्चेन्द्रियों को जीतने की बात कहते हैं—

**ए पंचिंदिय-करहडा जिय मोक्कला म चारि ।**
**चरिवि असेसु वि विसय-वणु पुणु पाडहिं संसारि ।।१३६।।**

एते पञ्चेन्द्रियकरभकाः जीव मुक्तान् मा चारय ।
चरित्वा अशेष अपि विषयवन पुनः पातयन्ति ससारे ।।१३६।।

चंचलता नहीं रहती। जब यह जीव रागादि परभावों से शून्य निर्विकल्पसमाधि में ठहरता है तब यह उच्छ्वास रूप पवन नासिका के दोनों छिद्रों को छोड़ कर स्वयमेव अवांछीक वृत्ति से तालुवा के बाल की अनी के आठवें भाग प्रमाण अतिसूक्ष्म छिद्र में--दसवें द्वार में से होकर बारीक निकलती है, नासा के छेद को छोड़ कर तालुरन्ध्र में (छेद में से) होकर निकलती है। अन्य मत (पातंजल मत) वाले वायुधारणारूप श्वासोच्छ्वास मानते हैं, सो ठीक नहीं है क्योंकि वायुधारणा वांछापूर्वक होती है और वांछा मोह से उत्पन्न विकल्परूप है, वांछा का कारण मोह है। संयमी के वायु का निरोध वांछापूर्वक नहीं होता है, स्वाभाविक ही होता है। जिनशासन में ऐसा कहा है कि कुम्भक (पवन को खींचना), पूरक (पवन को रोकना), रेचक (पवन को निकालना) ये तीन भेद प्राणायाम के हैं। इसी को वायुधारणा कहते हैं। यह क्षणमात्र होती है, परन्तु अभ्यास के वश से घड़ी, पहर, दिवस आदि तक भी होती है। उस वायुधारणा का कार्य है—देह का आरोग्य और देह का हलकापन न कि मुक्ति-मोक्ष। क्योंकि वायुधारणा शरीर का धर्म है, आत्मा का स्वभाव नहीं। यदि वायुधारणा से मुक्ति हो जाती तो फिर वायुधारणा करने वालों को अभी मोक्ष क्यों नहीं होता? यह **भावार्थ** है ।।१६२।।

**मोहु विलिज्जइ मणु मरइ तुट्टइ सासु-णिसासु ।**
**केवल-णाणु वि परिणमइ अंबरि जाहँ णिवासु ।।१६३।।**

मोहो विलीयते मनो म्रियते त्रुटयति श्वासोच्छ्वासः ।
केवलज्ञानमपि परिणमति अम्बरे येषां निवासः ।।१६३।।

मोहु विलिज्जइ इत्यादि । **मोहु** मोहो ममत्वादिविकल्पजालं **विलिज्जइ** विलयं गच्छति **मणु मरइ** इहलोकपरलोकाशाप्रभृतिविकल्पजालरूपं मनो म्रियते । **तुट्टइ** नश्यति । कोऽसौ । **सासुणिसासु** अनीहितवृत्त्या नासिकाद्वारं विहाय क्षणमात्र तालुरन्ध्रेण गच्छति पुनरप्यन्तरं नासिकया कृत्वा निर्गच्छति पुनरपि रन्ध्रेणेत्युच्छ्वासनिःश्वासलक्षणो वायुः । पुनरपि किं भवति । **केवलणाणु वि परिणमइ** केवलज्ञानमपि परिणमति समुत्पद्यते । येषां किम् । **अंबरि जाहं णिवासु** रागद्वेषमोहरूपविकल्पजालशून्यं अम्बरे अम्बरशब्दवाच्ये शुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपे निर्विकल्पत्रिगुप्तिगुप्तपरमसमाधौ येषां निवास इति । अयमत्र भावार्थः । अम्बरशब्देन शुद्धाकाशं न ग्राह्यं किंतु विषयकषायविकल्पशून्यः परमसमाधिर्ग्राह्यः, वायुशब्देन च कुम्भकरेचकपूरकादिरूपो वायुनिरोधो न ग्राह्यः किंतु स्वयमनीहितवृत्त्या निर्विकल्पसमाधिबलेन दशमद्वारसंज्ञेन ब्रह्मरन्ध्रसंज्ञेन सूक्ष्माभिधानरूपेण च तालुरन्ध्रेण योऽसौ गच्छति स एव ग्राह्यः तत्र । यदुक्तं केनापि—"**मणु मरइ पवणु जहिं खयहं जाइ । सव्वंगइ तिहुवणु तहिं जि ठाइ । मूढा अंतरालु परियाणहि । तुट्टइ मोहजालु जइ जाणहि** ।।" अत्र पूर्वोक्तलक्षणमेव मनोमरणं ग्राह्यं पवनक्षयोऽपि पूर्वोक्तलक्षण एव त्रिभुवनप्रकाशक आत्मा तत्रैव निर्विकल्पसमाधौ तिष्ठतीत्यर्थः । अन्तरालशब्देन तु रागादिपरभावशून्यत्वं ग्राह्यं न चाकाशे

ज्ञाते सति मोहजालं नश्यति न चान्यादृशं परकल्पितं ग्राह्यमित्यभिप्राय ॥१६३॥

**जाहँ अंबरि णिवासु मोहु विलिज्जइ, मणु मरइ, सासु-णिसासु तुट्टइ वि केवलणाणु परिणमइ** ॥१६३॥ जिनका परमसमाधि मे निवास है, उनका मोह नाश को प्राप्त हो जाता है, मन मर जाता है, श्वासोच्छ्वास रुक जाता है और केवलज्ञान उत्पन्न हो जाता है। **भावार्थ**—परमसमाधि में निवास करने वाले योगियो के दर्शनमोह और चारित्रमोह आदि सब कल्पना जाल विलीन हो जाते हैं, इहलोक-परलोक आदि की आशाविकल्पजालरूप मन स्थिर हो जाता है और श्वासोच्छ्वास अवाछीकपने से नासिकाद्वार को छोड़कर तालुछिद्र मे होकर निकलते है तथा कुछ देर के बाद नासिका से निकलते हैं, इस प्रकार श्वासोच्छ्वासरूप पवन वश मे हो जाता है, चाहे जिस द्वार से निकालो। केवलज्ञान भी शीघ्र ही उन ध्यानी मुनियों के उत्पन्न होता है जिनका रागद्वेष मोहरूप विकल्पजाल से रहित शुद्धात्मा का सम्यक् श्रद्धान ज्ञान आचरणरूप निर्विकल्प त्रिगुप्तिमयी परमसमाधि मे निवास है। यहाँ अम्बर शब्द से आकाश का अर्थ नही लगाना चाहिए, किन्तु 'विषयकषायरूप विकल्पजालो से शून्य परमसमाधि' अर्थ ग्रहण करना चाहिए। इसी प्रकार वायु शब्द से कुम्भक-पूरक-रेचकादिरूप वाछापूर्वक वायुनिरोध नही लेना चाहिए किन्तु स्वयमेव अवाछीक वृत्ति पर निर्विकल्पसमाधि के बल से ब्रह्मद्वार नामा सूक्ष्म छिद्र (जिसे तालुवे का रन्ध्र कहते है) से पवन निकलता है, वह अर्थ ग्रहण करना चाहिए। किसी ने कहा भी है—"जो मूढ है वे अम्बर का अर्थ आकाश जानते है, जो ज्ञानीजन हैं वे अम्बर का अर्थ परमसमाधिरूप निर्विकल्प जानते है। सो निर्विकल्पध्यान में मन मर जाता है, पवन का सहज ही निरोध होता है और सब अग तीन भुवन के समान हो जाता है।" जो परमसमाधि को जानता है, उसी का मोह टूटता है। मन के विकल्पो का मिटना ही मन का मरना है और वही श्वास का रुकना है जो सब द्वारो मे रुक कर दसवे द्वार मे होकर निकले। निर्विकल्पसमाधि मे ही आत्मा तीनलोक का प्रकाशक होता है। **अन्तराल** शब्द का अर्थ रागादिभावो से शून्यदशा लेना—आकाश का अर्थ नही। आकाश के जानने मे मोहजाल नही नष्ट होता, आत्मस्वरूप के जानने मे नष्ट होता है। यह अभिप्राय है ॥१६३॥

**जो आयासइ मणु धरइ लोयालोय-पमाणु।**
**तुट्टइ मोहु तड त्ति तसु पावइ परहँ पवाणु ॥१६४॥**

य आकाशे मनो धरति लोकालोकप्रमाणम्।
त्रुट्यति मोहो झटिति तस्य प्राप्नोति परस्य प्रमाणम् ॥१६४॥

**जो** इत्यादि। **जो** यो ध्याता पुरुष **आयासइ मणु धरइ** यथा परद्रव्यसबन्धरहितत्वेनाकाशमम्बरशब्दवाच्यं शून्यमित्युच्यते तथा वीतरागचिदानन्दैकस्वभावेन भरितावस्थोऽपि मिथ्यात्वरागादिपरभावरहितत्वान्निर्विकल्पसमाधिराकाशमम्बरशब्दवाच्य शून्यमित्युच्यते। तत्राकाशसंज्ञे निर्विकल्पसमाधौ मनो धरति स्थिर करोति। कथभूत मनः। **लोयालोय-पमाणु** लोकालोकप्रमाणं लोकालोकव्याप्तिरूप अथवा प्रसिद्धलोकालोकाकाशे व्यवहारेण ज्ञानापेक्षया न च प्रदेशापेक्षया लोकालोकप्रमाण मनो मानसं धरति **तुट्टइ मोहु तड त्ति तसु** त्रुट्यति नश्यति। कोऽसौ। **मोहु** मोह। **कथम्**। झटिति तस्य ध्यानात्। न केवलं

मोहो नश्यति । **पावइ** प्राप्नोति । किम् । **परहं पवाणु** परस्य परमात्मस्वरूपस्य प्रमाणम् । कीदृशं तत्प्रमाणमिति चेत् । व्यवहारेण रूपग्रहणविषये चक्षुरिव सर्वगत: । यदि पुनर्निश्चयेन सर्वगतो भवति तर्हि चक्षुषो अग्निस्पर्शदाह: प्राप्नोति न च तथा । तथात्मनोऽपि परकीयसुखदु:खविषये तन्मयपरिणामत्वेन परकीयसुखदु:खानुभवं प्राप्नोति न च तथा । निश्चयेन पुनर्लोकमात्रासंख्येयप्रदेशोऽपि सन् व्यवहारेण पुन: शरीरकृतोपसंहारविस्तारवशाद्विवक्षितभाजनस्थप्रदीपवत् देहमात्र इति भावार्थ: ।।१६४।।

**जो आयासइ लोयालोयपमाणु मणु धरइ तसु मोहु तड त्ति तुट्टइ परहँ पवाणु पावइ ।।१६४।।** जो ध्यानी पुरुष निर्विकल्पसमाधि में लोकालोक प्रमाण अपना मन स्थिर करता है, उसी का मोह शीघ्र टूट जाता है और वह ज्ञान करके लोकालोक प्रमाण आत्मा को प्राप्त हो जाता है । **भावार्थ-** जैसे आकाश द्रव्य सब द्रव्यों से भरा हुआ है परन्तु सबसे शून्य अपने स्वरूप है, उसी प्रकार चिद्रूप आत्मा रागादि सब उपाधियों से रहित है, शून्यरूप है इसलिए आकाश शब्द का अर्थ यहाँ शुद्धात्मस्वरूप ग्रहण करना चाहिए । व्यवहारनयापेक्षा ज्ञान लोकालोक का प्रकाशक है और निश्चयनय मे अपने स्वरूप का प्रकाशक है । आत्मा का केवलज्ञान लोकालोक को जानता है, अत: ज्ञान की अपेक्षा आत्मा लोकालोक प्रमाण कहा जाता है, प्रदेशो की अपेक्षा लोकालोक प्रमाण नही है । ज्ञानगुण लोकालोक में व्याप्त है, परन्तु परद्रव्यों से भिन्न है, परवस्तु से जो तन्मयी हो जावे तो वस्तु का अभाव हो जावे । अत यह निश्चय हुआ कि ज्ञानगुण से लोकालोक प्रमाण जो आत्मा, उसे आकाश भी कहते है, उसमे जो मन लगावे तब जगत् से मोह दूर हो और परमात्मा को पावे । व्यवहारनय मे आत्मा ज्ञान से सबको जानता है, इसलिए सब जगत् मे है । जैसे व्यवहारनय से नेत्र रूपी पदार्थ को जानता है परन्तु उन पदार्थों से भिन्न है । जो निश्चय मे सर्वगत होवे तो परपदार्थों से तन्मयी हो जावे, जो उससे तन्मयी होवे तो नेत्रों को अग्नि का दाह होना चाहिए, इस कारण तन्मयी नही है । उसी प्रकार आत्मा जो पदार्थों को तन्मयी होके जाने तो पर के सुख-दु:ख से तन्मयी होने से इसको भी दूसरे का सुखदु:ख मालूम होना चाहिए, पर ऐसा होता नही है । अत निश्चय मे आत्मा असर्वगत है और व्यवहार नय से सर्वगत है, प्रदेशों की अपेक्षा निश्चय से लोकप्रमाण असंख्यातप्रदेशी है और व्यवहारनय से पात्र मे रखे हुए दीपक की तरह देहप्रमाण है, जैसा शरीरधारण करता है, वैसा ही प्रदेशो का सकोच-विस्तार हो जाता है ।।१६४।।

**देहि वसंतु वि णवि मुणिउ अप्पा देउ अणंतु ।**
**अंबरि समरसि मणु धरिवि सामिय णट्ठु णिभंतु ।।१६५।।**

देहे वसन्नपि नैव मन: आत्मा देव: अनन्त: ।
अम्बरे समरसे मन धृत्वा स्वामिन् नष्ट निर्भ्रान्ति: ।।१६५।।

**देहि वसंतु वि** इत्यादि । **देहि वसंतु वि** व्यवहारेण देहे वसन्नपि **णवि मुणिउ** नैव ज्ञात: । कोऽसौ । **अप्पा** निजशुद्धात्मा । किंविशिष्ट: । **देउ** आराधनायोग्य: केवलज्ञानाद्यनन्तगुणाधारत्वेन देव: परमाराध्य: । पुनरपि किंविशिष्ट: । **अणंतु** अनन्त-

पदार्थपरिच्छित्तिकारणत्वादविनश्वरत्वादनन्तः । किं कृत्वा । **मणु धरिवि** मनो धृत्वा क्व । **अंबरि** अम्बरशब्दवाच्ये पूर्वोक्तलक्षणे रागादिशून्ये निर्विकल्पसमाधौ । **कथंभूते । समरसि** वीतरागतात्त्विकमनोहरानन्दस्यन्दिनि समरसीभावे साध्ये । **सामिय** हे **स्वामिन् । प्रभाकरभट्टः** पश्चात्तापमनुशयं कुर्वन्नाह । किं ब्रूते । **गट्ठु णिभंतु** इयन्तं कालमित्थंभूतं परमात्मोपदेशमलभमानः सन् निर्भ्रान्तो नष्टोऽहमित्यभिप्रायः ॥१६५॥ एवं परमोपदेशकथनमुख्यत्वेन सूत्रदशकं गतम् ।

**सामिय ! देहि वसंतु वि अप्पा देउ अणंतु समरसि अंबरि मणु धरिवि णवि मुणिउ णट्ठु णिभंतु ॥१६५॥** हे स्वामिन् ! व्यवहारनय से देह मे रहते हुए भी अनन्तगुणों के आधार आत्मदेव को समभावरूप निर्विकल्पसमाधि मे मन लगाकर मैंने नही जाना इसलिए ही अब तक निस्सन्देह नष्ट हुआ हूँ । प्रभाकरभट्ट पश्चाताप करते हुए अपने गुरुदेव से कहते है कि हे स्वामिन् ! मैंने अब तक रागादिविभावरहित निर्विकल्पसमाधि में मन लगाकर आत्मदेव को नही जाना, इसलिए इतने काल तक निजस्वरूप की प्राप्ति के बिना मैं नष्ट हुआ, यह **अभिप्राय है** ॥१६५॥ इस प्रकार परम उपदेश के कथन की मुख्यता से दस दोहासूत्र कहे ।

**अथ** परमोपशमभावसहितेन सर्वसगपरित्यागेन ससारविच्छेदं भवतीति युग्मेन निश्चिनोति—

अब कहते हैं कि परमोपशम भावसहित सर्व परिग्रह का त्याग करने से ससारविच्छेद होता है, ऐसा दो दोहों में निश्चय करते हैं—

**सयल वि संग ण मिल्लिया णवि किउ उवसम-भाउ ।**
**सिव-पय-मग्गु वि मुणिउ णवि जहिं जोइहिं अणुराउ ॥१६६॥**
**घोरु ण चिण्णउ तव-चरणु जं णिय-बोहहँ सारु ।**
**पुण्णु वि पाउ वि दड्ढु णवि किमु छिज्जइ संसारु ॥१६७॥**

सकला अपि सगा न मुक्ता नैव कृत उपशमभाव ।
शिवपदमार्गोऽपि मतो नैव यत्र योगिना अनुराग ॥१६६॥
घोर न चीर्णं तपश्चरण यत् निजबोधस्य सारम् ।
पुण्यमपि पापमपि दग्ध नैव किं छिद्यते ससार ॥१६७॥

सयल वि इत्यादि । **सयल वि** समस्ता अपि **संग** मिथ्यात्वादिचतुर्दशभेदभिन्ना आभ्यन्तराः क्षेत्रवास्त्वादिबहुभेदभिन्ना बाह्या अपि संगाः परिग्रहा. **ण मिल्लिया** न मुक्ताः । पुनरपि किं न कृतम् । **णवि किउ उवसमभाउ** जीवितमरणलाभालाभसुख-दुःखादिसमताभावलक्षणो नैव कृत उपशमभावः । पुनश्च किं न कृतम् । **सिवपयमग्गु वि मुणिउ णवि** "शिवं परमकल्याणं निर्वाणं शान्तमक्षयम् । प्राप्त मुक्तिपदं येन स

शिव: परिकीर्तित: ।।" इति वचनात् शिवशब्दवाच्यो योऽसौ मोक्षस्तस्य मार्गोऽपि न ज्ञात: । कथंभूतो मार्ग: । स्वशुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूप: । यत्र मार्गे किम् । **जहिं जोइहिं अणुराउ** यत्र निश्चयमोक्षमार्गे परमयोगिनामनुरागस्तात्पर्यम् । न केवल मोक्षमार्गोऽपि न ज्ञात: । **घोरु ण चिण्णउ तवयरणु** घोरं दुर्धरं परीषहोपसर्गजयरूपं नैव चीर्णं न कृतम् । किं तत् । अनशनादिद्वादशविधं तपश्चरणम् । यत्कथंभूतम् । **जं णियबोहहं सारु** यत्तपश्चरणं वीतरागनिर्विकल्पस्वसंवेदनलक्षणेन निजबोधेन सारभूतम् । पुनश्च किं न कृतम् । **पुण्णु वि पाउ वि** निश्चयनयेन शुभाशुभनिगलद्वयरहितस्य संसारिजीवस्य व्यवहारेण सुवर्णलोहनिगलद्वयसदृश पुण्यपापद्वयमपि **दड्ढु णवि** शुद्धात्मद्रव्यानुभवरूपेण ध्यानाग्निना दग्धं नैव । **किमु छिज्जइ संसारु** कथं छिद्यते संसार इति । अत्रेदं व्याख्यानं ज्ञात्वा निरन्तरं शुद्धात्मद्रव्यभावना कर्तव्येति तात्पर्यम् ।।१६६-१६७।।

**सयल वि संग ण मिल्लिया, उवसमभाउ णवि किउ । जहँ जोइहिँ अणुराउ सिवपयमग्गु णवि मुणिउ । घोरु तवचरणु ण चिण्णउ, ज णिय-बोहहँ सारु, पुण्णु वि पाउ वि णवि दड्ढ, किमु संसारु छिज्जइ ।।१६६-१६७।।** सब परिग्रह भी नहीं छोड़े, समभाव भी नहीं किया और जहाँ योगियों का अनुराग है ऐसे मोक्षमार्ग को भी नहीं जाना, आत्मज्ञान से शोभायमान घोर तप भी नहीं किया और पुण्य तथा पाप भी भस्म नहीं किये तो संसार कैसे छूट सकता है ? **भावार्थ**–मिथ्यात्वादि चौदह अन्तरंग परिग्रह (मिथ्यात्व, राग, द्वेष, वेद, क्रोध, मान, माया, लोभ, हास्य, रति, अरति, शोक, भय, जुगुप्सा) और क्षेत्रवास्तु आदि दस बहिरंग परिग्रह (क्षेत्र, वास्तु, हिरण्य, सुवर्ण, धन, धान्य, दासी, दास, कुप्य, भाण्ड) इन चौबीस परिग्रहों को नहीं छोड़ा । जीवित-मरण, लाभ-अलाभ, सुख-दु:खादि में समान भाव कभी नहीं किया, कल्याणरूप मोक्ष के मार्ग रत्नत्रय को भी नहीं जाना । योगियों को प्रिय निश्चयरत्नत्रय और व्यवहाररत्नत्रय को भी नहीं जाना—निजस्वरूप का श्रद्धान, निज स्वरूप का ज्ञान और निजस्वरूप के आचरणरूप निश्चय रत्नत्रय तथा नव पदार्थों का श्रद्धान, नव पदार्थों का ज्ञान और अशुभ क्रिया के त्याग रूप व्यवहाररत्नत्रय– ये दोनों मोक्ष के मार्ग हैं । निश्चयरत्नत्रय तो साक्षात् मोक्ष का मार्ग है और व्यवहाररत्नत्रय परम्परा से मोक्ष का मार्ग है । इनसे भी कभी परिचय नहीं प्राप्त किया । अनशनादि बारह प्रकार का तप नहीं किया, परीषह भी सहन नहीं किये और शुद्धात्म द्रव्य के अनुभवरूप ध्यानाग्नि में पुण्यरूप सुवर्ण की बेड़ी और पापरूप लोहे की बेड़ी को भस्म नहीं किया । यह सब किए बिना कैसे संसार का विच्छेद होता ? संसार से मुक्त होने में ये कारण हैं । ऐसा व्याख्यान जानकर सदैव शुद्धात्म स्वरूप की भावना करनी चाहिए ।।१६६-१६७।।

अथ दानपूजापञ्चपरमेष्ठिवन्दनादिरूपं परम्परया मुक्तिकारणं श्रावकधर्मं कथयति—

*अब दान-पूजा, पंचपरमेष्ठी की वन्दना रूप परम्परा से मुक्ति के कारणभूत श्रावकधर्म का कथन करते हैं—*

**दाणु ण दिण्णउ मुणिवरहँ ण वि पुज्जिउ जिण-णाहु ।**
**पंच ण वंदिय परम-गुरु किमु होसइ सिव-लाहु ।।१६८।।**

दानं न दत्तं मुनिवरेभ्यः नापि पूजितः जिननाथः ।
पञ्च न वन्दिताः परमगुरवः किं भविष्यति शिवलाभः ।।१६८।।

दाणु इत्यादि । **दाणु ण दिण्णउ** आहाराभयभैषज्यशास्त्रभेदेन चतुर्विधदानं **भक्तिपूर्वकं न दत्तम्** । केषाम् । **मुणिवरहं** निश्चयव्यवहाररत्नत्रयाराधकानां मुनिवरादि-**चतुर्विधसंघस्थितानां** पात्राणां **ण वि पुज्जिउ** जलधारया सह गन्धाक्षतपुष्पाद्यष्टविध-पूजया न पूजितः । कोऽसौ । **जिणणाहु** देवेन्द्रधरणेन्द्रनरेन्द्रपूजित केवलज्ञानाद्यनन्त-गुणपरिपूर्णः पूज्यपदस्थितो जिननाथ. **पंच ण वंदिय** पञ्च न वन्दिता । के ते । **परमगुरु** त्रिभुवनाधीशवन्द्यपदस्थिता अर्हत्सिद्धा. त्रिभुवनेशवन्द्यमोक्षपदाराधका आचार्योपाध्यायसाधवश्चेति पञ्च गुरव , **किमु होसइ सिवलाहु** शिवशब्दवाच्यमोक्षपद-स्थितानां तदाराधकानामाचार्यादीनां च यथायोग्यं दानपूजावन्दनादिकं न कृतम्, कथं शिवशब्दवाच्यमोक्षसुखस्य लाभो भविष्यति न कथमपीति । अत्रेदं व्याख्यान ज्ञात्वा उपासकाध्ययनशास्त्रकथितमार्गेण विधिद्रव्यदातृपात्रलक्षणविधानेन दान दातव्य पूजा-वन्दनादिकं च कर्तव्यमिति भावार्थः ।।१६८।।

**दाणु मुणिवरहँ ण दिण्णउ, जिणणाहु ण वि पुज्जिउ, पंच परमगुरु ण वंदिय, किमु सिवलाहु होसइ ।।१६८।।** मुनिवरो को दान नही दिया, जिनेन्द्र भगवान की पूजा भी नहीं की, पच परमेष्ठियों की भी वन्दना नही की, तब मोक्ष की प्राप्ति कैसे हो सकती है ? **भावार्थ**–औषध, शास्त्र, अभय और आहार ये चार प्रकार के दान भक्तिपूर्वक उत्तम पात्रो को नही दिए अर्थात् निश्चय-व्यवहाररत्नत्रय के आराधक मुनि-आर्यिका-श्रावक-श्राविका रूप चतुर्विधसघ को चार प्रकार का दान भक्ति से नहीं दिया और दोन-दु खी को करुणाभाव से दान नही दिया , देवेन्द्र-धरणेन्द्र और नरेन्द्रो से पूजित केवलज्ञानादि अनन्त गुणो से परिपूर्ण परमपूज्य जिनदेव की जलचन्दनादि अष्टद्रव्यों से पूजा नही की और त्रिलोकवन्द्य अरहन्त, सिद्ध, आचार्य, उपाध्याय, साधु इन पाँच परमेष्ठियों की आरा-धना नही की, सो हे जीव ! तुझे मोक्ष-सुख का लाभ कैसे होगा ? अर्थात् कभी नही होगा । यहाँ यह व्याख्यान जानकर 'उपासकाध्ययन' नामक सातवें अग मे कथित मार्ग से विधि-द्रव्य-दाता-पात्र के लक्षण जानकर दान देना चाहिए और पचपरमेष्ठी की पूजा-वन्दनादि करनी चाहिए, यह **भावार्थ है** ।।१६८।।

अथ निश्चयेन चिन्तारहितध्यानमेव मुक्तिकारणमिति प्रतिपादयति चतुष्कलेन—

अब निश्चय से चिन्तारहितध्यान ही मुक्ति का कारण है, यह चार दोहा सूत्रो में प्रति-पादित करते हैं—

**अद्ध ुम्मीलिय-लोयणिहिं जोउ कि झंपियएहिं ।**
**एमुइ लब्भइ परम-गइ णिच्चिंति ठियएहिं ॥१६६॥**

अर्धोन्मीलितलोचनाभ्यां योगः किं आच्छादिताभ्याम् ।
एवमेव लभ्यते परमगतिः निश्चिन्तं स्थितैः ॥१६६॥

**अद्धुम्मीलियलोयणिहिं** अर्धोन्मीलितलोचनपुटाभ्यां **जोउ किं** योगो ध्यानं किं भवति अपि तु नैव । न केवलमर्धोन्मीलिताभ्याम् । **झंपियएहिं** झंपिताभ्यामपि लोचनाभ्यां नैवेति । तर्हि कथं लभ्यते । **एमुइ लब्भइ** एवमेव लभ्यते लोचनपुटनिमीलनोन्मीलननिरपेक्षैः । का लभ्यते । **परमगइ** केवलज्ञानादिपरमगुणयोगात्परमगतिर्मोक्षगतिः । कैः लभ्यते । **णिच्चिंति ठियएहिं** ख्यातिपूजालाभप्रभृतिसमस्तचिन्ताजालरहितैः पुरुषैश्चिन्तारहितैः स्वशुद्धात्मरूपस्थितैश्चेत्यभिप्रायः ॥१६६॥

**अद्धुम्मीलिय लोयणिहिं झंपियएहिं कि जोउ, णिच्चिंति ठियएहिं एमुइ परमगइ लब्भइ** ॥१६६॥ आधे उघडे हुए नेत्रों से अथवा बन्द नेत्रों से क्या ध्यान की सिद्धि होती है, कभी नहीं। जो चिन्तारहित एकाग्र मे स्थित है, उनको इसी तरह स्वयमेव परमगति मिलती है । **भावार्थ—**ख्याति, पूजा, लाभ, आदि समस्त चिन्ताओं से रहित जो निश्चिन्त पुरुष है, वे ही स्वशुद्धात्मस्वरूप में स्थिरता पाते है, उन्ही के ध्यान की सिद्धि है और वे ही केवलज्ञानादि परम गुणों के योग से मोक्ष प्राप्त करते हैं ॥१६६॥

**जोइय मिल्लहि चिन्त जइ तो तुट्टइ संसारु ।**
**चिंतासत्तउ जिणवरु वि लहइ ण हंसाचारु ॥१७०॥**

योगिन् मुञ्चसि चिन्तां यदि ततः त्रुटयति संसारः ।
चिन्तासक्तो जिनवरोऽपि लभते न हंसचारम् ॥१७०॥

जोइय इत्यादि । **जोइय** हे योगिन् **मिल्लहि** मुञ्चसि । काम् । **चिन्त** चिन्तारहिताद्विशुद्धज्ञानदर्शनस्वभावात्परमात्मपदार्थाद्विलक्षणां चिन्तां **जइ** यदि चेत् **तो** ततश्चिन्ताभावात् । किं भवति । **तुट्टइ** नश्यति । स कः । **संसारु** निःसंसारात् शुद्धात्मद्रव्याद् विलक्षणो द्रव्यक्षेत्रकालादिभेदभिन्नः पञ्चप्रकारः संसारः । यतः कारणात् । **चिंतासत्तउ जिणवरु वि** छद्मस्थावस्थायां शुभाशुभचिन्तासक्तो जिनवरोऽपि **लहइ ण** लभते न । कम् । **हंसाचारु** संशयविभ्रमविमोहरहितानन्तज्ञानादिनिर्मलगुणयोगेन हंस इव हंसः परमात्मा तस्य आचारं रागादिरहितं शुद्धात्मपरिणाममिति । अत्रेदं व्याख्यानं ज्ञात्वा दृष्टश्रुतानुभूतभोगाकांक्षाप्रभृतिसमस्तचिन्ताजालं त्यक्त्वापि चिन्तारहिते शुद्धात्मतत्त्वे सर्वतात्पर्येण भावना कर्तव्येति तात्पर्यम् ॥१७०॥

**जोइय ! जइ चिन्त मिल्लहि तो संसारु तुट्टइ, चिंतासत्तउ जिणवरु वि हंसाचारु ण लहइ ॥१७०॥** हे योगी ! यदि तू चिन्ताओं को छोड़ दे तो तेरा संसार-भ्रमण समाप्त हो जाएगा। क्योंकि चिन्तासक्त तो जिनवर (छद्मस्थावस्था में तीर्थंकर देव) भी परमात्मा के आचरण रूप शुद्ध भावों को नहीं पाते। हे योगी ! शुद्ध ज्ञानदर्शनस्वभाव परमात्म पदार्थ से विपरीत चिन्ताजाल को तू छोड़ेगा तभी चिन्ता के अभाव से शुद्धात्मद्रव्य से विमुख द्रव्य, क्षेत्र, काल, भव, भावरूप पाँच प्रकार का तेरा संसार नष्ट होगा। छद्मस्थावस्था मे शुभाशुभ की चिन्ता मे आसक्त जिनवर भी शुद्धात्मपरिणामों को नही पा सकते। संशय, विमोह, विभ्रमरहित अनन्तज्ञानादिनिर्मलगुण सहित हंस के समान उज्ज्वल परमात्मा के शुद्ध भाव है, वे चिन्ता के बिना छोडे, कदापि नही होते। तीर्थंकरदेव भी मुनि होकर निश्चिन्त होकर व्रत धारण करते है तभी परमहंसदशा को उपलब्ध होते हैं। यहाँ ऐसा व्याख्यान जान कर देखे-सुने-भोगे हुए भोगो की आकांक्षादि समस्त चिन्ताजाल को छोड कर चिन्तारहित होकर सब प्रकार से शुद्धात्म तत्त्व की भावना ही करनी चाहिए, यह **भावार्थ है** ॥१७०॥

**जोइय दुम्मइ कवुण तुहुँ भवकारणि ववहारि।**
**बंभु पवंचहिँ जो रहिउ सो जाणिवि मणु मारि ॥१७१॥**

योगिन् दुर्मतिः का तव भावकारणे व्यवहारे।
ब्रह्म प्रपचैर्यद् रहित तत् ज्ञात्वा मनो मारय ॥१७१॥

जोइय इत्यादि। **जोइय** हे योगिन् **दुम्मइ कवुण तुहं** दुर्मति का तवेयं **भवकारणि ववहारि** भवरहितात् शुभाशुभमनोवचनकायव्यापाररूपव्यवहारविलक्षणाच्च स्वशुद्धात्मद्रव्यात्प्रतिपक्षभूते पञ्चप्रकारसंसारकारणे व्यवहारे। तर्हि कि करोमीति चेत्। **बंभु** ब्रह्मशब्दवाच्यं स्वशुद्धात्मान ज्ञात्वा। कथभूत यत्। **पवंचहिं जो रहिउ** प्रपचैर्मायापाखण्डैः यद्रहितम्। **सो जाणिवि** त निजशुद्धात्मान वीतरागस्वसवेदनज्ञानेन ज्ञात्वा पश्चात्कि कुरु। **मणु मारि** अनेकमानसविकल्पजालरहिते परमात्मनि स्थित्वा शुभाशुभविकल्पजालरूप मनो मारय विनाशयेति भावार्थ. ॥१७१॥

**जोइय ! तुहुँ कवुण दुम्मइ भवकारणि ववहारि पवंचहि रहिउ जो बंभु सो जाणिवि मणु मारि ॥१७१॥** हे योगी ! तेरी कैसी दुर्बुद्धि है जो तू ससार के कारण रूप व्यवहार करता है। अब तू प्रपचों से रहित जो शुद्धात्मा-ब्रह्म है, उसको जान कर अपने मन को मार। वीतरागस्वसंवेदन ज्ञान से अपनी आत्मा को जान कर, मानसिक विकल्पजालो से रहित परमात्मा में स्थित होकर तू शुभाशुभविकल्पजालरूप मन को मार अर्थात् निर्विकल्प दशा को प्राप्त हो। यह **भावार्थ है** ॥१७१॥

**सव्वहिँ रायहिँ छहिँ रसहिँ पंचहिँ रूवहिँ जंतु।**
**चित्तु णिवारिवि झाहि तुहुँ अप्पा देउ अणंतु ॥१७२॥**

सर्वैः रागैः षड्भिः रसैः पञ्चभिः रूपैः गच्छत् ।
चित्तं निवार्य ध्याय त्वं आत्मानं देवमनन्तम् ।।१७२।।

**सव्वहिं** इत्यादि । **झाहि** ध्याय चिन्तय **तुहुँ** त्वं हे **प्रभाकरभट्ट** । कम् । **अप्पा** स्वशुद्धात्मानम् । कथंभूतम् । **देउ** वीतरागपरमानन्दसुखेन दीव्यति क्रीडति इति देवस्तं देवम् । पुनरपि कथंभूतम् । **अणंतु** केवलज्ञानाद्यनन्तगुणाधारत्वादनन्तसुखास्पदत्वाद-विनश्वरत्वाच्चानन्तस्तमनन्तम् । किं कृत्वा पूर्वम् । **चित्तु णिवारिवि** चित्तं निवार्य व्यावृत्य । किं कुर्वन् सन् । **जंतु** गच्छत्परिणममानं सत् । कैः करणभूतैः **सव्वहिं रायहिं** वीतरागात्स्वशुद्धात्मद्रव्याद्विलक्षणैः सर्वशुभाशुभरागैः । न केवलं रागैः । **छहिं रसहिं** रसरहिताद्वीतरागसदानन्दैकरसपरिणतादात्मनो विपरीतैः गुडलवणदधिदुग्धतैल-घृतषड्रसैः । पुनरपि कैः । **पंचहिं रूवहिं** अरूपात् शुद्धात्मतत्त्वात्प्रतिपक्षभूतैः कृष्णनील-रक्तश्वेतपीतपञ्चरूपैरिति तात्पर्यम् ।।१७२।।

**तुहुँ सव्वहिं रायहिं, छहिं रसहिं, पंचहिं रूवहिं जंतु चित्तु णिवारिवि अणंतु अप्पा देउ झाहि** ।।१७२।। हे प्रभाकरभट्ट ! तू सब शुभाशुभ रागो से, छहों रसों से, पाँचो रूपों से चलायमान चित्त को रोक कर अनन्त गुणो वाले आत्मदेव का ध्यान कर । वीतराग परम आनन्द सुख में क्रीड़ा करने वाले, केवलज्ञानादि अनन्तगुण वाले अविनाशी शुद्ध आत्मा का एकाग्रचित्त होकर ध्यान कर । क्या करके ? वीतराग शुद्धात्मद्रव्य मे विमुख जो समस्त शुभाशुभराग, निजरस से विपरीत जो घी, दूध, दही, तेल, नमक, मीठा—ये छह रस और जो अरूप शुद्धात्मद्रव्य से भिन्न काला, सफेद, नीला, पीला और लाल—पाँच तरह का रूप है- इनमें जो निरन्तर चित्त जाता है, उसे रोक कर आत्मदेव की आराधना कर ।।१७२।।

अथ येन स्वरूपेण चिन्त्यते परमात्मा तेनैव परिणमतीति निश्चिनोति—

अब कहते है कि आत्मा का जिस रूप से चिन्तन किया जाता है, आत्मा उसी रूप में परिणमता है—

**जेण सरूविं झाइयइ अप्पा एहु अणंतु ।**
**तेण सरूविं परिणवइ जह फलिहउ-मणि मंतु ।।१७३।।**

येन स्वरूपेण ध्यायते आत्मा एषः अनन्तः ।
तेन स्वरूपेण परिणमति यथा स्फटिकमणिः मन्त्रः ।।१७३।।

**जेण** इत्यादि । **तेण सरूविं परिणवइ** तेन स्वरूपेण परिणमति । कोऽसौ कर्ता । **अप्पा** आत्मा **एहु** एष प्रत्यक्षीभूतः । पुनरपि किंविशिष्टः । **अणंतु** वीतरागानाकुलत्व-लक्षणानन्तसुखाद्यनन्तशक्ति परिणतत्वादनन्तः । तेन केन । **जेण सरूविं झाइयइ** येन शुभाशुभशुद्धोपयोगरूपेण ध्यायते चिन्त्यते । दृष्टान्तमाह । **जह फलिहउमणि मंतु** यथा

स्फटिकमणि: जपापुष्पाद्युपाधिपरिणत: गारुडादिमन्त्रो वेति । अत्र विशेषव्याख्यानं तु—
**"येन येन स्वरूपेण युज्यते यन्त्रवाहक: । तेन तन्मयतां याति विश्वरूपो मणिर्यथा ।।"**[1]
इति श्लोकार्थकथितदृष्टान्तेन ध्यातव्य: । इदमत्र तात्पर्यम् । अयमात्मा येन येन स्वरूपेण चिन्त्यते तेन तेन परिणमतीति ज्ञात्वा शुद्धात्मपदप्राप्त्यर्थिभि: समस्तरागादिविकल्पसमूहं त्यक्त्वा शुद्धरूपेणैव ध्यातव्य इति ।।१७३।।

**एहु अणंतु अप्पा जेण सरूविं झाइयइ तेण सरूविं परिणवइ जह फलिहउ मणि मंतु ।।१७३।।**
यह अविनाशी आत्मा जिस रूप में ध्याया जाता है, उसी स्वरूप परिणमता है जैसे स्फटिक मणि और गारुड़ी आदि मंत्र । यह आत्मा शुभ, अशुभ और शुद्ध उपयोगरूप परिणमन करता है अत: जिस रूप मे ध्याया जाता है, उसी रूप परिणमन करता है जैसे स्फटिक मणि के नीचे जैसा डक लगाओ (लाल, हरा, पीला आदि) वह उसी रूप परिणमता है, जैसे गारुडी आदि मत्रो मे मत्र गरुड रूप भासता है । अन्यत्र भी कहा है—"जिस-जिस रूप से आत्मा परिणमता है उस-उस रूप से आत्मा तन्मयी हो जाता है । जैसे स्फटिक मणि उज्ज्वल है, उसके नीचे जैसा डक लगाओ, वह वैसा ही भासता है ।" जो शुद्धात्मपद की प्राप्ति के अभिलाषी है, उन्हे चाहिए कि वे समस्त रागादि विकल्प समूह को छोड कर आत्मा के शुद्ध रूप को ध्यावे ।।१७३।।

अथ चतुष्पादिकां कथयति—

अब चतुष्पद छद में आत्मा का स्वरूप कहते हैं—

**एहु जु अप्पा सो परमप्पा कम्म-विसेसें जायउ जप्पा ।**
**जामइँ जाणइ अप्पें अप्पा तामइँ सो जि देउ परमप्पा ।।१७४।।**

एष. य आत्मा स परमात्मा कर्मविशेषेण जात· जाप्य ।
यदा जानाति आत्मना आत्मान तदा स एव देव परमात्मा ।।१७४।।

एहु इत्यादि । **एहु जु** एष य· प्रत्यक्षीभूत. **अप्पा** स्वसवेदनप्रत्यक्ष आत्मा । स. कथभूत: । **सो परमप्पा** शुद्धनिश्चयेनानन्तचतुष्टयस्वरूप क्षुधाद्यष्टादशदोषरहित: स निर्दोषिपरमात्मा **कम्मविसेसे जायउ जप्पा** व्यवहारनयेनानादिकर्मबन्धनविशेषेण स्वकीयबुद्धिदोषेण जात उत्पन्न: कथभूतो जात: जाप्य. पराधीन· **जामइं जाणइं** यदा काले जानाति । केन कम् । **अप्पें अप्पा** वीतरागनिर्विकल्पस्वसवेदनज्ञानपरिणतेनात्मना निजशुद्धात्मानं **तामइं** तस्मिन् स्वशुद्धात्मानुभूतिकाले **सो जि** स एवात्मा **देउ** निजशुद्धात्मभावनोत्थवीतरागसुखानुभवेन दीव्यति क्रीडतीति देव. परमाराध्य: । किंविशिष्टो देव: । **परमप्पा** शुद्धनिश्चयेन मुक्तिगतपरमात्मसमान: । अयमत्र भावार्थ. । यद्येवंभूत: परमात्मा

---

१ अमितगति : योगसार ६-५१ ।

शक्तिरूपेण देहमध्ये नास्ति तर्हि केवलज्ञानोत्पत्तिकाले कथं व्यक्तीभविष्यतीति ॥१७४॥

**एहु जु अप्पा सो परमप्पा, कम्मविसेसे अप्पा आयउ, जामइँ अप्पें अप्पा जाणइ, तामइँ सो जि परमप्पा देउ ॥१७४॥** यह प्रत्यक्षीभूत स्वसंवेदनज्ञान से प्रत्यक्ष आत्मा ही शुद्धनिश्चयनय से अनन्तचतुष्टयस्वरूप और अठारह दोषों से रहित निर्दोष परमात्मा है। यह व्यवहारनय से अनादिकर्मबन्ध के कारण पराधीन हुआ दूसरे का जाप करता है परन्तु जिस समय वीतराग निर्विकल्प स्वसंवेदन ज्ञान से अपने को जानता है, उस समय यह आत्मा ही परमात्मा है, देव है। **भावार्थ**—निजशुद्धात्मा की भावना से उत्पन्न जो परम आनन्द, उसके अनुभव में क्रीड़ा करने से देव कहा जाता है, वही आराध्य है। यह आत्मदेव शुद्धनिश्चयनय से भगवान केवली के समान है। यहाँ यह अभिप्राय है कि परमात्मदेव शक्तिरूप से देह में है, जो देह मे न होवे तो केवलज्ञान के समय कैसे प्रकट होवे ? ॥१७४॥

अथ तमेवार्थं व्यक्तीकरोति—

पुन उसी अर्थ को दृढ करते हैं—

**जो परमप्पा णाणमउ सो हउँ देउ अणंतु ।**
**जो हउँ सो परमप्पु परु एहउ भावि णिभंतु ॥१७५॥**

य· परमात्मा ज्ञानमय स अहं देव अनन्त ।
य अहं स परमात्मा पर. इत्थं भावय निर्भ्रान्तिः ॥१७५॥

जो परमप्पा इत्यादि । **जो परमप्पा** य· कश्चित् प्रसिद्धः परमात्मा सर्वोत्कृष्टानन्तज्ञानादिरूपा मा लक्ष्मीर्यस्य स भवति परमश्चासावात्मा च परमात्मा **णाणमउ** ज्ञानेन निवृत्तः ज्ञानमयः **सो हउं** यद्यपि व्यवहारेण कर्मावृतस्तिष्ठामि तथापि निश्चयेन स एवाहं पूर्वोक्तः परमात्मा । कथंभूतः । **देउ** परमाराध्यः । पुनरपि कथंभूतः । **अणंतु** अनन्तसुखादिगुणास्पदत्वादनन्त· । **जो हउं सो परमप्पु** योऽहं स्वदेहस्थो निश्चयेन परमात्मा स एव तत्सदृश एव मुक्तिगतपरमात्मा । कथभूतः । **परु** परमगुणयोगात् पर उत्कृष्टः **एहउ भावि** इत्थंभूत परमात्मान भावय । **हे प्रभाकरभट्ट** । कथंभूतः सन् । **णिभंतु** भ्रान्तिरहितः सशयरहितः सन्निति । अत्र स्वदेहेऽपि शुद्धात्मास्तीति निश्चयं कृत्वा मिथ्यात्वाद्युपशमवशेन केवलज्ञानाद्युत्पत्तिबीजभूतां कारणसमयसाराख्यामागमभाषया वीतरागसम्यक्त्वादिरूपां शुद्धात्मैकदेशव्यक्तिं लब्ध्वा सर्वतात्पर्येण भावना कर्तव्येत्यभिप्राय. ॥१७५॥

**जो परमप्पा णाणमउ सो हउँ अणंतु देउ । जो हउँ सो परु परमप्पु, एहउ णिभंतु भावि ॥१७५॥** जो परमात्मा ज्ञानस्वरूप है, वह मैं ही हूँ जो अविनाशी देवस्वरूप हूँ। जो मैं हूँ, वही उत्कृष्ट परमात्मा है, इस प्रकार निस्सन्देह तू भावना कर। जो कोई प्रसिद्ध परमात्मा सर्वोत्कृष्ट

अनन्तज्ञानादि रूप लक्ष्मी का निवास है, ज्ञानमय है, वैसा ही मैं हूँ। यद्यपि व्यवहार नय से मैं कर्मों से बंधा हुआ हूँ तो भी निश्चयनय की अपेक्षा मेरे बन्ध-मोक्ष नहीं हैं। जैसा भगवान का स्वरूप है, वैसा ही मेरा स्वरूप है। जो आत्मदेव महामुनियों के द्वारा आराधने योग्य है और अनन्त सुख आदि गुणों का निवास है। जो मैं यह देह में स्थित निश्चयनय से परमात्मा हूँ, उसी के समान वह मुक्तिगत परमात्मा है। यही ध्यान हमेशा करना। वह परमात्मा परमगुण के सम्बन्ध से उत्कृष्ट है। आचार्य योगीन्दुदेव प्रभाकरभट्ट से कहते हैं कि हे शिष्य! तू सब भ्रान्तियों को छोड़ कर केवल परमात्मा का ध्यान कर। इस देह में ही शुद्धात्मा है, ऐसा निश्चय कर। मिथ्यात्वादि सब विभावों की उपशमता के वश से केवलज्ञानादि उत्पत्ति का जो कारण समयसार निज आत्मा है, उसी की निरन्तर भावना करनी चाहिए। वीतराग सम्यक्त्वादिरूप शुद्ध आत्मा के एकदेश प्रकटपने को पाकर सब तरह से ज्ञान की भावना करनी योग्य है, यह अभिप्राय है ।।१७५।।

अथामुमेवार्थं दृष्टान्तदार्ष्टान्ताभ्यां समर्थयति—

अब इसी अर्थ को दृष्टान्त-दार्ष्टान्त से पुष्ट करते है—

**णिम्मल-फलिहहँ जेम जिय भिण्णउ परकिय-भाउ ।**
**अप्प-सहावहँ तेम मुणि सयलु वि कम्म-सहाउ ।।१७६।।**

निर्मलस्फटिकाद् यथा जीव भिन्नः परकृतभाव ।
आत्मस्वभावात् तथा मन्यस्व सकलमपि कर्मस्वभावम् ।।१७६।।

**भिण्णउ** भिन्नो भवति **जिय** हे जीव **जेम** यथा। कोऽसौ कर्ता। **परकियभाउ** जपापुष्पाद्युपाधिरूपः परकृतभाव कस्मात्सकाशात्। **णिम्मलफलिहहं** निर्मलस्फटिकात् **तेम** तथा भिन्न **मुणि** मन्यस्व जानीहि। कम्। **सयलु वि कम्मसहाउ** समस्तमपि भावकर्मद्रव्यकर्मनोकर्मस्वभावम् कस्मात्। सकाशात्। **अप्पसहावहं** अनन्तज्ञानादि-गुणस्वभावात् परमात्मन इति भावार्थः ।।१७६।।

**जिय ! जेम परकिय भाउ णिम्मल फलिहहँ भिण्णउ तेम अप्पसहावहँ सयलु वि कम्मसहाउ मुणि ।।१७६।।** हे जीव ! जैसे परकृत भाव यानी अनेक जाति के डंक महानिर्मल स्फटिकमणि से भिन्न हैं, वैसे ही आत्मस्वभाव से सब शुभाशुभ कर्म भिन्न जानो। **भावार्थ**—आत्मस्वभाव महानिर्मल है, भावकर्म, द्रव्यकर्म, नोकर्म उससे सर्वथा भिन्न है। आत्मा चिद्रूप है। अनन्तज्ञानादि गुणस्वभाव परमात्मा है, उससे तू सकल प्रपचों को भिन्न ही मान ।।१७६।।

अथ तामेव देहात्मनोर्भेदभावनां दृढयति—

अब आत्मा और देह भिन्न-भिन्न हैं, यह भेदभावना दृढ़ करते हैं—

**जेम सहावि रिगम्मलउ फलिहउ तेम सहाउ ।**
**भंतिए मइलु म मण्णि जिय मइलउ देक्खवि काउ ।।१७७।।**

यथा स्वभावेन निर्मलः स्फटिकः तथा स्वभावः ।
भ्रान्त्या मलिनं मा मन्यस्व जीव मलिनं दृष्ट्वा कायम् ।।१७७।।

जेम इत्यादि । **जेम सहावि रिगम्मलउ** यथा स्वभावेन निर्मलो भवति । कोऽसौ । **फलिहउ** स्फटिकमरिग. **तेम** तथा निर्मलो भवति । कोऽसौ कर्ता । **सहाउ** विशुद्धज्ञान-रूपस्य परमात्मन. स्वभाव· **भंतिए मइलु म मण्णि** पूर्वोक्तमात्मस्वभावं कर्मतापन्नं भ्रान्त्या मलिनं मा मन्यस्व **जिय** हे जीव । किं कृत्वा । **मइलउ देक्खवि** मलिनं दृष्ट्वा कम् **काउ** निर्मलशुद्धबुद्धैकस्वभावपरमात्मपदार्थाद्विलक्षण कायमित्यभिप्राय: ।।१७७।।

**जेम फलिहउ सहावि रिगम्मलउ तेम सहाउ जिय ! काउ मइलउ देक्खवि भंतिए मइलु म मण्णि ।।१७७।।** जैसे स्फटिक मरिग स्वभाव से निर्मल है, उसी तरह आत्मा भी ज्ञानदर्शनस्वभावरूप निर्मल है । ऐसे आत्मस्वभाव को हे जीव ! शरीर की मलिनता देखकर भ्रम से मलिन मत मान । **भावार्थ**–निर्मल शुद्ध बुद्धैक स्वभाव परमात्म पदार्थ काया से सर्वथा भिन्न है, काया मलिन है, आत्मा निर्मल है ।।१७७।।

अथ पूर्वोक्तभेदभावनां रक्तादिवस्त्रदृष्टान्तेन व्यक्तिकरोति चतुष्कलेन—

अब पूर्वोक्त भेदविज्ञान की भावना को लाल-पीले वस्त्र के दृष्टान्त से चार दोहों में प्रकट करते है –

**रत्तें वत्थें जेम बुहु देहु रग मण्णइ रत्तु ।**
**देहिं रत्ति रगारिग तहँ अप्पु रग मण्णइ रत्तु ।।१७८।।**

**जिण्णि वत्थि जेम बुहु देहु रग मण्णइ जिण्णु ।**
**देहिं जिण्णि रगारिग तहँ अप्पु रग मण्णइ जिण्णु ।।१७९।।**

रक्तेन वस्त्रेन यथा बुधः देहं न मन्यते रक्तम् ।
देहेन रक्तेन ज्ञानी तथा आत्मानं न मन्यते रक्तम् ।।१७८।।

जीर्णेन वस्त्रेण यथा बुधः देहं न मन्यते जीर्णम् ।
देहेन जीर्णेन ज्ञानी तथा आत्मानं न मन्यते जीर्णम् ।।१७९।।

**वत्थु पणट्ठइ जेम बुहु देहु रग मण्णइ रगट्ठु ।**
**रगट्ठे देहे रगारिग तहँ अप्पु रग मण्णइ रगट्ठु ।।१८०।।**

**भिण्णउ वत्थु जि जेम जिय देहहँ मण्णइ णाणि ।**
**देहु वि भिण्णउँ णाणि तहँ अप्पहँ मण्णइ जाणि ।।१८१।।**

वस्त्रे प्रणष्टे यथा बुध: देहं न मन्यते नष्टम् ।
नष्टे देहे ज्ञानी तथा आत्मानं न मन्यते नष्टम् ।।१८०।।
भिन्नं वस्त्रमेव यथा जीव देहात् मन्यते ज्ञानी ।
देहमपि भिन्नं ज्ञानी तथा आत्मन: मन्यते जानीहि ।।१८१।।

यथा कोऽपि व्यवहारज्ञानी रक्ते वस्त्रे जीर्णे वस्त्रे नष्टेऽपि स्वकीयवस्त्रे स्वकीयं देहं रक्तं जीर्णं नष्टं न मन्यते तथा वीतरागनिर्विकल्पस्वसंवेदनज्ञानी देहे रक्ते जीर्णे-नष्टेऽपि सति व्यवहारेण देहस्थमपि वीतरागचिदानन्दैकपरमात्मानं शुद्धनिश्चयनयेन देहाद्भिन्नं रक्तं जीर्णं नष्टं न मन्यते इति भावार्थ । अथ **मण्णइ** मन्यते । कोऽसौ । **णाणि** देहवस्त्रविषये भेदज्ञानी । किं मन्यते । **भिण्णउ** भिन्नम् । किम् । **वत्थु जि** वस्त्रमेव **जेम** यथा **जिय** हे जीव । कस्माद्भिन्नं मन्यते । **देहहं** स्वकीयदेहात् । दृष्टान्तमाह । **मण्णइ** मन्यते । कोऽसौ । **णाणि** देहात्मनोर्भेदज्ञानी **तहं** तथा भिन्नं मन्यते । कमपि । **देहु वि** देहमपि । कस्मात् । **अप्पहं** निश्चयेन देहविलक्षणाद् व्यवहारेण देहस्थात्सहज-शुद्धपरमानन्दैकस्वभावान्निजपरमात्मन: **जाणि** जानीहीति भावार्थ ।।१७८-८१।।

**जेम बुहु रत्ते वत्थे देहु रत्तु ण मण्णइ, तहँ णाणि देहिं रत्तिं अप्पु ण रत्तु मण्णइ ।।१७८।। जेम बुहु जिण्णि वत्थि देहु जिण्णु ण मण्णइ, तहँ णाणि देहिं जिण्णिं अप्पु जिण्णु ण मण्णइ ।।१७९।। जेम बुहु वत्थु पणट्ठइ देहु णट्ठु ण मण्णइ, तहँ णाणि देहे णट्ठे अप्पु णट्ठु ण मण्णइ ।।१८०।। जिय ! जेम णाणि देहहँ भिण्णउ जि वत्थु मण्णइ, तहँ णाणि देहु वि अप्पहँ भिण्णउँ मण्णइ जाणि ।।१८१।।** जैसे कोई बुद्धिमान् पुरुष लाल वस्त्र मे शरीर को लाल नही मानता, उसी प्रकार वीतरागनिर्विकल्प स्वसंवेदनज्ञानी शरीर के लाल होने से आत्मा को लाल नही मानता । जैसे कोई बुद्धिमान् कपडे के जीर्ण होने पर शरीर को जीर्ण नही मानता, उसी प्रकार ज्ञानी भी शरीर के जीर्ण होने से आत्मा को जीर्ण नही मानता । जैसे कोई बुद्धिमान् वस्त्र के नष्ट होने पर शरीर का नाश नही मानता, उसी तरह ज्ञानी भी देह का नाश होने पर आत्मा का नाश नही मानता । हे जीव ! जैसे ज्ञानी कपडे को शरीर से भिन्न ही मानता है, उसी तरह ज्ञानी शरीर को भी आत्मा से भिन्न मानता है, ऐसा तुम जानो । **भावार्थ**—यह आत्मा व्यवहारनय से देह मे स्थित है तो भी सहज शुद्ध परमानन्दरूप निजस्वभाव से देह से भिन्न ही है ।।१७८-१८१।।

अथ दु:खजनकदेहघातकं शत्रुमपि मित्रं जानीहीति दर्शयति—

अब कहते है कि दु ख उत्पन्न करने वाले इस शरीर के घातक शत्रु को भी मित्र ही जानो—

**इहु तणु जीवउ तुज्झ रिउ दुक्खइँ जेण जणेइ ।**
**सो परु जाणहि मित्तु तुहुँ जो तणु एहु हणेइ ।।१८२।।**

इयं तनुः जीव तव रिपुः दुःखानि येन जनयति ।
तं परं जानीहि मित्रं त्वं यः तनुमेतां हन्ति ।।१८२।।

**रिउ** रिपुर्भवति । का । **इहु तणु** इयं तनुः कर्त्री **जीवड** हे जीव **तुज्झ** तव । कस्मात् । **दुक्खइं जेण जणेइ** येन कारणेन दुःखानि जनयति **सो परु** तं परजनं **जाणहि** जानीहि । किम् । **मित्तु** परममित्रं तुहुं त्वं कर्ता । यः परः किं करोति । **जो तणु एहु हणेइ** यः कर्ता तनुमिमां प्रत्यक्षीभूतां हन्तीति । अत्र यदा वैरी देहविनाशं करोति तदा वीतरागचिदानन्दैकस्वभावपरमात्मतत्त्वभावनोत्पन्नसुखामृतसमरसीभावे स्थित्वा शरीरघातकस्योपरि यथा पाण्डवैः कौरवकुमारस्योपरि द्वेषो न कृतस्तथान्यतपोधनैरपि न कर्तव्य इत्यभिप्रायः ।।१८२।।

**जीवड ! इहु तणु तुज्झ रिउ जेण दुक्खइं जणेइ । जो एहु तणु हणेइ सो परु मित्तु जाणहि** ।।१८२।। हे जीव ! यह शरीर तेरा शत्रु है क्योंकि यह तुझे दु.ख ही दुःख उत्पन्न करता है । जो इस शरीर का भी घात करे, उसे तुम परममित्र जानो । यह शरीर तेरा शत्रु होने से दु ख उत्पन्न करता है, इससे तू अनुराग मत कर और जो तेरे शरीर की सेवा करता है, उससे भी राग मत कर, जो तेरे शरीर का घात भी करे तो भी उसको शत्रु मत जान । जब कोई तेरे इस शरीर का नाश करे तब वीतराग चिदानन्द ज्ञानस्वभाव परमात्मतत्त्व की भावना से उत्पन्न जो परम समरसीभाव है, उसमें लीन होकर शरीर के घातक पर भी द्वेष मत कर, जैसे पाण्डवो ने दुर्योधन पर द्वेष नही किया । उसी तरह अन्य तपस्वी साधुओ को भी नही करना चाहिए, यह **अभिप्राय है** ।।१८२।।

अथ उदयागते पापकर्मणि स्वस्वभावो न त्याज्य इति मनसि सप्रधार्य सूत्रमिदं कथयति—

पापकर्म के उदय में आने पर भी आत्मस्वभाव को नहीं छोडना चाहिए, ऐसा अभिप्राय मन मे धारण कर यह सूत्र कहते है—

**उदयहं आणिवि कम्मु मइं जं भुंजेवउ होइ ।**
**तं सह आविउ खविउ मइं सो पर लाहु जि कोइ ।।१८३।।**

उदयमानीय कर्म मया यद् भोक्तव्यं भवति ।
तत् स्वयमागतं क्षपितं मया स परं लाभ एव कश्चित् ।।१८३।।

**जं** यत् **भुंजेवउ होइ** भोक्तव्यं भवति । किं कृत्वा । **उदयहं आणिवि** विशिष्टात्मभावनाबलेनोदयमानीय । किम् । **कम्मु** चिरसंचितं । कर्म । केन । **मइं** मया **तं** तत् पूर्वोक्तं कर्म **सह आविउ** दुर्धरपरीषहोपसर्गवशेन स्वयमुदयमागतं सत् **खविउ मइं** निजपरमात्मतत्त्वभावनोत्पन्नवीतरागसहजानन्दैकसुखरसास्वादद्रवीभूतेन परिणतेन मनसा क्षपितं मया **सो** स **परं** नियमेन **लाहु जि** लाभ एव **कोइ** कश्चिदपूर्वं इति । अत्र

**केचन महापुरुषा दुर्धरानुष्ठानं** कृत्वा वीतरागनिर्विकल्पसमाधौ स्थित्वा च कर्मोदयमानीय तमनुभवन्ति, **अस्माकं** पुनः स्वयमेवोदयागतमिति मत्वा संतोषः कर्तव्य इति तात्पर्यम् ।।१८३।।

**जं मइँ कम्मु उदयहँ आणिवि भुंजेवउ होइ तं सह आविउ मइँ खविउ सो कोइ जि पर लाहु ।।१८३।। जो** मैं कर्म को उदय मे लाकर भोगना चाहता था, वह कर्म स्वय ही आ गया, इससे मैं **शान्तचित्त** से फल सहन कर क्षय करूँ, यह कोई महान् लाभ ही हुआ । कोई महापुरुष दुर्धर **अनुष्ठान**-तपादि करके वीतरागनिर्विकल्प समाधि मे ठहर कर कर्मों को उदय मे लाकर उनकी निर्जरा करते हैं; लेकिन वे कर्म दुर्धर परीषह या उपसर्ग के कारण स्वयमेव उदय मे आए हैं; ऐसा मान कर सन्तोष धारण कर ज्ञानीजन उदयागत कर्मो को समभाव से भोगते है; रागद्वेष नही करते, यह **भावार्थ है** ।।१८३।।

अथ इदानीं परुषवचन सोढुं न याति तदा निर्विकल्पात्मतत्त्वभावना कर्तव्येति प्रतिपादयति—

अब कहते है कि यदि कठोर वचन सहन न होते हो तो उस समय निर्विकल्प आत्मतत्त्व की भावना करनी चाहिए—

**णिट्ठुर-वयणु सुणेवि जिय जइ मणि सहण ण जाइ ।**
**तो लहु भावहि बंभु परु जिं मणु झत्ति विलाइ ।।१८४।।**

निष्ठुरवचन श्रुत्वा जीव यदि मनसि सोढुं न याति ।
ततो लघु भावय ब्रह्म परं येन मनो झटिति विलीयते ।।१८४।।

**जइ** यदि चेत् **सहण ण जाइ** सोढुं न याति । क्व **मणि** मनसि **जिय** हे मूढ जीव । किं कृत्वा । **सुणेवि** श्रुत्वा । किम् **णिट्ठुरवयणु** निष्ठुर हृदयकर्णशूलवचन **तो** तद्वचनश्रवणानन्तर **लहु** शीघ्र **भावहि** वीतरागपरमानन्दैकलक्षणनिर्विकल्पसमाधौ स्थित्वा भावय कम् । **बंभु** ब्रह्मशब्दवाच्यनिजदेहस्थपरमात्मानम् । कथंभूतम् । **परु** परमानन्तज्ञानादि गुणाधारत्वात् परमुत्कृष्ट **जिं** येन परमात्मध्यानेन । कि भवति । **मणु झत्ति विलाइ** वीतरागनिर्विकल्पसमाधिसमुत्पन्नपरमानन्दैकरूपसुखामृतास्वादेन मनो झटिति शीघ्रं विलय याति द्रवीभूत भवतीति भावार्थ. ।।१८४।।

**जिय णिट्ठुर-वयणु सुणेवि जइ सहण ण जाइ तो परु बंभु मणि लहु भावहि जिं मणु झत्ति विलाइ ।।१८४।।** हे जीव ! निष्ठुर वचन सुनकर यदि उन्हे सहन नही किया जा सके तो कषाय को दूर करने के लिए देह में विराजमान इस परमब्रह्म का शीघ्र ध्यान करो, जिससे मन का विकार शीघ्र ही विलीन हो जाता है । **भावार्थ** यह है कि वीतरागनिर्विकल्पसमाधि से समुत्पन्न परमानन्द रूप सुखामृत के आस्वाद से मन का विकार-कषायभाव शीघ्र ही विलय को प्राप्त होता है, अतः

कठोर वचन सुनने पर यदि समभाव नहीं बना रह सके तो अनन्तगुणों के धारक परमात्मा का ध्यान करना चाहिए ॥१८४॥

अथ जीवः कर्मवशेन जातिभेदभिन्नो भवतीति निश्चिनोति—

अब यह निश्चित करते है कि जीव के कर्म के कारण ही जातिभेद होते हैं—

**लोउ विलक्खणु कम्म-वसु इत्थु भवंतरि एइ ।**
**चुज्जु कि जइ इहु अप्पि ठिउ इत्थु जि भवि ण पडेइ ॥१८५॥**

लोकः विलक्षणः कर्मवशः अत्र भवान्तरे आयाति ।
आश्चर्यं किं यदि अयं आत्मनि स्थितः अत्रैव भवे न पतति ॥१८५॥

**लोउ** इत्यादि । **विलक्खणु** षोडशवर्णिकासुवर्णवत्केवलज्ञानादिगुणसदृशो न सर्वजीवराशिसदृशात् परमात्मतत्त्वाद्विलक्षणो विसदृशो भवति । केन । ब्राह्मणक्षत्रियवैश्यशूद्रादिजातिभेदेन । कोऽसौ । **लोउ** लोको जनः । कथंभूतः सन् । **कम्मवसु** कर्मरहितशुद्धात्मानुभूतिभावनारहितेन यदुपार्जितं कर्म तस्य कर्मण अधीनः कर्मवशः । इत्थंभूतः सन् किं करोति । **इत्थु भवंतरि एइ** पञ्चप्रकारभवरहिताद्वीतरागपरमानन्दैकस्वभावात् शुद्धात्मद्रव्याद्विसदृशे अस्मिन् भवान्तरे संसारे समायाति **चुज्जु कि** इदं किमाश्चर्यं किंतु नैव, **जइ इहु अप्पि ठिउ** यदि चेदयं जीवः स्वशुद्धात्मनि स्थितो भवति तर्हि **इत्थु जि भवि ण पडेइ** अत्रैव भवे न पततीति इदमप्याश्चर्यं न भवतीति । अत्रेदं व्याख्यानं ज्ञात्वा संसारभयभीतेन भव्येन भवकारणमिथ्यात्वादिपञ्चास्रवान् मुक्त्वा द्रव्यभावास्रवरहिते परमात्मभावे स्थित्वा च निरन्तरं भावना कर्तव्येति तात्पर्यम् ॥१८५॥

**विलक्खणु लोउ कम्मवसु इत्थु भवंतरि एइ । इहु जइ अप्पि ठिउ इत्थु जि भवि ण पडेइ कि चुज्जु ॥१८५॥** सोलहवानी के स्वर्ण की भाँति केवलज्ञानादि गुणो से समान जो परमात्मतत्त्व है, उससे भिन्न जो ब्राह्मण, क्षत्रिय, वैश्य, शूद्र आदि जातिभेदरूप जीवराशि है, वह कर्मों के कारण है । कर्मों के आधीन जातिभेद है और वे कर्म आत्मज्ञान की भावना से रहित अज्ञानी जीव द्वारा उपार्जित हैं । इनके कारण ही यह जीव संसार में अनेक जातिभेद धारण करता है । यदि यह जीव स्वशुद्धात्मा मे लगे तो इसी भव मे नही पड़े भ्रमण नही करे, इसमे क्या आश्चर्य है, कुछ भी नहीं । **भावार्थ**—जब तक आत्मा निजस्वरूप में नही रमता तब तक संसार में परिभ्रमण करता है, लेकिन जब यह आत्मदर्शी हो जाता है तब कर्मोपार्जन के अभाव मे नहीं भटकता । इसमें आश्चर्य कुछ भी नहीं । यहाँ यह व्याख्यान जान कर संसार से भयभीत भव्य पुरुष को संसार के कारणभूत मिथ्यात्व, अविरति, प्रमाद, कषाय और इन पाँच आस्रवों को छोड़कर द्रव्यभावास्रवरहित परमात्मभाव में ठहर कर निरन्तर परमात्मतत्त्व की ही भावना करनी चाहिए, यह **तात्पर्य** है ॥१८५॥

अथ परेण दोषग्रहणे कृते कोपो न कर्तव्य इत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति—

यदि कोई अपने दोष ग्रहण करे तो उस पर क्रोध नहीं करना चाहिए—ऐसा अभिप्राय मन में रख कर यह दोहासूत्र कहते हैं—

**अवगुण-गहणइँ महुतणइँ जइ जीवहँ संतोसु ।**
**तो तहँ सोक्खहँ हेउ हउँ इउ मण्णिवि चइ रोसु ।।१८६।।**

अवगुणग्रहणेन मदीयेन यदि जीवाना सतोष: ।
तत: तेषा सुखस्य हेतुरह इति मत्वा त्यज रोषम् ।।१८६।।

**जइ जीवहं संतोसु** यदि चेदज्ञानिजीवानां संतोषो भवति । केन । **अवगुणगहणइं** निर्दोषिपरमात्मनो विलक्षणा ये दोषा अवगुणास्तेषा ग्रहणेन । कथंभूतेन **महुतणइ** मदीयेन **तो तहं सोक्खहं हेउ हउं** यत' कारणान्मदीयदोषग्रहणेन तेषा सुखं जात ततस्तेषामह सुखस्य हेतुर्जात: **इउ मण्णिवि चइ रोसु** केचन परोपकारनिरता: परेषा द्रव्यादिकं दत्त्वा सुखं कुर्वन्ति मया पुनर्द्रव्यादिक मुक्त्वापि तेषा सुख कृतमिति मत्वा रोष त्यज । अथवा मदीया अनन्तज्ञानादिगुणा न गृहीतास्तै. किंतु दोषा एव गृहीता इति मत्वा च कोपं त्यज, अथवा ममैते दोषा: सन्ति सत्यमिदमस्य वचन तथापि रोषं त्यज, अथवा ममैते दोषा: न सन्ति तस्य वचनेन किमहं दोषी जातस्तथापि, क्षमितव्यम्, अथवा परोक्षे दोषग्रहणं करोति न च प्रत्यक्षे समीचीनोऽसौ तथापि क्षमितव्यम्, अथवा वचनमात्रेणैव दोषग्रहण करोति न च शरीरबाधा करोति तथापि क्षमितव्यम्, अथवा शरीरबाधामेव करोति न च प्राणविनाश तथापि क्षमितव्यम्, अथवा प्राणविनाशमेव करोति न च भेदाभेदरत्नत्रयभावनाविनाश चेति मत्वा सर्वतात्पर्येण क्षमा कर्त्तव्येत्यभिप्राय ।।१८६।।

**महुतणइँ अवगुण-गहणइँ जइ जीवहँ संतोसु तो हउँ-तहँ सोक्खहँ हेउ, इउ मण्णित्ति रोसु चइ ।।१८६।।** यदि मेरे दोष ग्रहण करने से जीवों को सन्तोष होता है, तो मै उनके सुख सन्तोष का कारण हुआ, ऐसा मान कर उन अवगुण ग्रहण करने वालो पर गुस्सा करना छोडो । ज्ञानी कोप नही करते —वे विचारते है कि परोपकारी जन तो धनादि देकर दूसरो को सुखी करते है, मैने तो द्रव्यादि न देकर भी उन्हे सुखी किया है, तो इसके समान और क्या बात हो सकती है अत गुस्सा नही करना चाहिए **अथवा** मेरे अनन्तज्ञानादिगुण तो उन्होने नही लिए, दोष ही तो लिये हैं, यह मानकर गुस्सा छोडना चाहिए । **अथवा** मुझमे ये दोष है और इसका कथन सत्य है तो सत्यवादी पर क्या रोक करना । **अथवा** ये दोष मुझमे है ही नही, उसके कहने से क्या मै दोषी हो गया ? नही हुआ अत. क्रोध छोडकर उस पर क्षमा भाव धारण करना चाहिए । **अथवा** ऐसा विचारना चाहिए कि वह मेरे दोष मेरे समक्ष तो नही कहता, पीठ पीछे कहता है अत. क्षतव्य है **अथवा** कदाचित् कोई समक्ष मे दोष कहे तो यह विचार करना चाहिए कि वचनमात्र से मेरे दोष ग्रहण करता है, शरीर को तो बाधा नही पहुँचाता, ऐसा जानकर क्षमा करना चाहिए । **अथवा** जो कोई शरीर को भी बाधा पहुँचावे तो ऐसा विचारना चाहिए कि प्राण तो नही हरता । **अथवा** जो कभी कोई प्राणों का भी

विनाश करे तो यह विचार कर क्षमा करना चाहिए कि ये प्राण तो विनाशीक हैं, विनाशीक वस्तु के चले जाने की क्या बात है। मेरे ज्ञानभाव अविनश्वर है, उसको तो कोई हर नहीं सकता, इसने तो मेरे बाह्य प्राणों का हरण किया हैं, भेदाभेदरत्नत्रय की भावना का विनाश नहीं किया; ऐसा जानकर सब प्रकार से क्षमा ही करना चाहिए ।।१८६।।

अथ सर्वचिन्तां निषेधयति युग्मेन—

अब दो दोहों में सब चिन्ताओं का निषेध करते हैं—

**जोइय चिंति म किं पि तुहुँ जइ बीहउ दुक्खस्स ।**
**तिल-तुस-मित्तु वि सल्लडा वेयण करइ अवस्स ।।१८७।।**

योगिन् चिन्तय मा किमपि त्वं यदि भीत. दु.खस्य ।
तिलतुषमात्रमपि शल्यं वेदना करोत्यवश्यम् ।।१८७।।

**चिंति म** चिन्तां मा कार्षीः **किं पि तुहुँ** कामपि त्वं **जोइय** हे योगिन् । यदि किम् । **जइ बीहउ** यदि बिभेषि । कस्य । **दुक्खस्स** वीतरागतात्त्विकानन्दैकरूपात् पारमार्थिकसुखात्प्रतिपक्षभूतस्य नारकादिदुःखस्य । यतः कारणात् **तिलतुसमित्तु वि सल्लडा** तिलतुष मात्रमपि शल्य **वेयण करइ अवस्स** वेदनां बाधां करोत्यवश्यं नियमेन । अत्र चिन्तारहितात्परमात्मन. सकाशाद्विलक्षणा या विषयकषायादिचिन्ता सा न कर्तव्या । काण्डादिशल्यमिव दु खकारणत्वादिति भावार्थ ।।१८७।।

**जोइय तुहुँ जइ दुक्खस्स बीहउ किं वि म चिंति ! तिल-तुस मित्तु वि सल्लडा अवस्स वेयण करइ** ।।१८७।। हे योगी ! तू जो वीतराग तात्त्विक आनन्द रूप पारमार्थिक सुख के प्रतिपक्षी नरकादिचारों गतियो के दु.खो से डरता है तो तू किसी भी प्रकार की चिन्ता मत कर क्योंकि तिल-तुस मात्र भी शल्य नियम से पीडा पहुँचाती ही है। **भावार्थ**—चिन्तारहित आत्मज्ञान मे विपरीत जो विषयकषायादि है, उनकी चिन्ता कुछ भी नही करना। चिन्ता दु ख का ही कारण है। जैसे बाँस आदि की जरा सी भी फाँस महादु ख का कारण है, जब वह शल्य निकले, तभी सुख होता है ।।१८७।।

किंच—

अब कहते है कि मोक्ष की भी चिन्ता नही करनी चाहिए—

**मोक्खु म चिंतहि जोइया मोक्खु ण चिंतिउ होइ ।**
**जेण णिबद्धउ जीवडउ मोक्खु करेसइ सोइ ।।१८८।।**[1]

मोक्ष मा चिन्तय योगिन् मोक्षो न चिन्तितो भवति ।
येन निबद्धो जीवः मोक्ष करिष्यति तदेव ।।१८८।।

---

१ देखें—पद्मनन्दिपंचविंशति एकत्वसप्ततिक अधिकार गाथा ५३ ।

**मोक्खु** इत्यादि । **मोक्खु म चिंतहि** मोक्षचिन्तां मा कार्षीस्त्वं **जोइया** हे योगिन् । यतः कारणात् **मोक्खु ण चिंतिउ होइ** रागादिचिन्ताजालरहितः केवलज्ञानाद्यनन्तगुण-व्यक्तिसहितो मोक्षः चिन्तितो न भवति । तर्हि कथं भवति । **जेण णिबद्धउ जीवडउ** येन मिथ्यात्वरागादिचिन्ताजालोपार्जितेन कर्मणा बद्धो जीवः **सोइ** तदेव कर्म शुभाशुभ-विकल्पसमूहरहिते शुद्धात्मतत्त्वस्वरूपे स्थितानां परमयोगिनां **मोक्खु करेसइ** अनन्त-ज्ञानादिगुणोपलम्भरूपं मोक्षं करिष्यतीति । अत्र यद्यपि सविकल्पावस्थायां विषय-कषायाद्यपध्यानवञ्चनार्थं मोक्षमार्गे भावनादृढीकरणार्थं च **"दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुण संपत्ती होउ मज्झं"** इत्यादि भावना-कर्तव्या तथापि वीतरागनिर्विकल्पपरसमामाधिकाले न कर्तव्येति भावार्थः ॥१८८॥

**जोइया मोक्खु म चिंतहि, मोक्खु चिंतिउ ण होइ । जेण जीवडउ णिबद्धउ सोइ मोक्खु करेसइ ॥१८८॥** हे योगी ! मोक्ष की भी चिन्ता मत कर । क्योंकि मोक्ष, चिन्ता करने से नही होता, रागादि चिन्ताजाल से रहित केवलज्ञानादि अनन्तगुणों की अभिव्यक्ति सहित मोक्ष चिन्ता के त्याग से होता है । जिन मिथ्यात्वरागादि चिन्तासमूहो से उपार्जित कर्मों से यह जीव बँधा हुआ है, वे ही कर्म शुभाशुभविकल्पसमूहरहित शुद्धात्मतत्त्व मे स्थित परमयोगियो की अनन्तज्ञानादिगुणोपलब्धिरूप मोक्ष करेंगे । यद्यपि सविकल्प अवस्था मे विषय-कषायादि अपध्यान के निवारण के लिए और मोक्ष मार्ग में परिणाम दृढ करने के लिए ज्ञानीजन ऐसी भावना करते है कि—"चतुर्गति के दुःखो का क्षय हो, आठो कर्मो का नाश हो, ज्ञान का लाभ हो, पचमगति मे गमन हो, समाधिमरण हो और जिनदेव के गुणो की सम्पत्ति मुझे प्राप्त हो" तथापि वीतरागनिर्विकल्प परमसमाधि के काल मे यह भावना भी नही होती ॥१८८॥

अथ चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमसमाधिव्याख्यानमुख्यत्वेन सूत्रषट्क-मन्तरस्थलं कथ्यते । तद्यथा—

अब चौबीस दोहों के महास्थल मे परमसमाधि के व्याख्यान की मुख्यता से छह दोहों का अन्तरस्थल कहते है—

**परम-समाहि-महा-सरहिँ जे बुड्डहिँ पइसेवि ।**
**अप्पा थक्कइ विमलु तहँ भव-मल जंति वहेवि ॥१८९॥**

परमसमाधिमहासरसि ये मज्जंति प्रविश्य ।
आत्मा तिष्ठति विमलः तेषां भवमलानि यान्ति ऊढ्वा ॥१८९॥

**जे बुड्डहिं** ये केचन पुरुषा मग्ना भवन्ति । क्व । **परमसमाहिमहासरहिं** परम-समाधिमहासरोवरे । किं कृत्वा मग्ना भवन्ति । **पइसेवि** प्रविश्य सर्वात्मप्रदेशैरवगाह्य **अप्पा थक्कइ** चिदानन्दैकस्वभावः परमात्मा तिष्ठति । कथंभूतः । **विमलु** द्रव्यकर्मनो-

कर्ममतिज्ञानादिविभावगुणनरनारकादिविभावपर्यायमलरहितः **तहं** तेषां परमसमाधिरत-पुरुषाणां **भवमल जंति** भवरहितात् शुद्धात्मद्रव्याद्विलक्षणानि यानि कर्माणि भवमल-कारणभूतानि गच्छन्ति। किं कृत्वा। **बहेवि** शुद्धपरिणामनीरप्रवाहेण ऊढ्वेति भावार्थः ॥१८६॥

**जे परमसमाहिमहासरहिं पइसेवि बुड्डहिं, अप्पा थक्कइ विमलु तहं भवमल बहेवि जंति ॥१८६॥** जो कोई महापुरुष परमसमाधिरूप महासरोवर मे घुसकर सर्वात्मप्रदेशों से अवगाहन कर उसमें लीन हो जाते हैं, उन्हीं के चिदानन्द अखण्ड स्वभाव आत्मा का ध्यान स्थिर होता है। वह आत्मा द्रव्यकर्म, भावकर्म, नोकर्म, मतिज्ञानादि विभावगुण और नरनारकादि विभाव पर्यायमल से रहित है। जो योगी परमसमाधि मे रत है उन्ही के शुद्धात्मद्रव्य से विपरीत भव-मल के कारणभूत जो कर्म हैं, वे सब शुद्धात्मपरिणाम रूप जल के प्रवाह मे बह जाते है। यह भावार्थ है ॥१८६॥

**सयल-वियप्पहं जो विलउ परम-समाहि भणंति।**
**तेण सुहासुह-भावडा मुणि सयलवि मेल्लंति ॥१६०॥**

सकलविकल्पाना य. विलय (त) परमसमाधिं भणन्ति।
तेन शुभाशुभभावान् मुनय. सकलानपि मुञ्चन्ति ॥१६०॥

**भणंति** कथयन्ति। के ते। वीतरागसर्वज्ञा·। क भणन्ति। **परमसमाहि** वीत-रागपरमसामायिकरूप परमसमाधिकं **जो विलउ** य विलयं विनाशम्। केषाम्। **सयल-वियप्पहं** निर्विकल्पात्परमात्मस्वरूपात्प्रतिकूलानां समस्तविकल्पानां **तेण** तेन कारणेन **मेल्लंति** मुञ्चन्ति। के कर्तार। **मुणि** परमाराध्यध्यानरतास्तपोधना.। कान् मुञ्चन्ति। **सुहासुहभावडा** शुभाशुभमनोवचनकायव्यापाररहितान् शुद्धात्मद्रव्याद्विपरीतान् शुभाशुभ-भावान् परिणामान्। कतिसंख्योपेतान्। **सयल वि** समस्तानपि। अय भावार्थ·। समस्तपरद्रव्याशारहितात् स्वशुद्धात्मस्वभावाद्विपरीता या आशापीहलोकपरलोकाशा यावत्तिष्ठति मनसि तावद् दु खी जीव इति ज्ञात्वा सर्वपरद्रव्याशारहितशुद्धात्मद्रव्य-भावना कर्तव्येति। तथा चोक्तम्––"**आसापिसायगहिओ जीवो पावेइ दारुणं दुक्खं। आसा जाहं णियत्ता ताहं णियत्ताइं सयलदुक्खाइं ॥**" ॥१६०॥

**जो सयलवियप्पहं विलउ परमसमाहि भणंति तेन मुणि सयलवि सुहासुह-भावडा मेल्लंति ॥१६०॥** जो निर्विकल्प परमात्मस्वरूप से प्रतिकूल रागादि समस्त विकल्पों के विलय-नाश को वीतरागपरमसामायिकरूप परमसमाधि कहते हैं, इस परमसमाधि से मुनिगण-परमाराध्यध्यानरत तपोधन सभी शुभाशुभभावों को छोड़ देते हैं। **भावार्थ**–समस्त पर-द्रव्यों की आशा से रहित निज-शुद्धात्म स्वभाव से विपरीत जो इस लोक-परलोक की आशा है, वह जब तक मन में स्थित है, तब तक यह जीव दु.खी है। ऐसा जानकर सब पर-द्रव्याशा से रहित निजशुद्धात्मद्रव्य की भावना करनी

चाहिए। कहा भी है—"आशारूपी पिशाच से ग्रस्त यह जीव दारुण दुःख पाता है। जिन्होंने आशा छोड़ी, उन्होंने सब दुःख दूर कर दिये।" ॥१९०॥

**घोरु करंतु वि तव-चरणु सयल वि सत्थ मुणंतु।**
**परम-समाहि-विवज्जियउ णवि देक्खइ सिउ संतु ॥१९१॥**

घोरं कुर्वन् अपि तपश्चरणं सकलान्यपि शास्त्राणि जानन्।
परमसमाधिविवर्जितः नैव पश्यति शिवं शान्तम् ॥१९१॥

**करंतु वि** कुर्वाणोऽपि। किम्। **तवचरणु** समस्तपरद्रव्येच्छावर्जितं शुद्धात्मानुभूतिरहितं तपश्चरणम्। कथंभूतम्। **घोरु** घोरं दुर्धरं वृक्षमूलातापनादिरूपम्। न केवलं तपश्चरणं कुर्वन्। **सयल वि सत्थ मुणंतु** शास्त्रजनितविकल्पतात्पर्यरहितात् परमात्मस्वरूपात् प्रतिपक्षभूतानि सर्वशास्त्राण्यपि जानन्। इत्थंभूतोऽपि सन् **परमसमाहिविवज्जियउ** यदि चेद्रागादिविकल्परहितपरमसमाधिविवर्जितो भवति तर्हि **णवि देक्खइ** न पश्यति। कम्। **सिउ** शिवं शिवशब्दवाच्यं विशुद्धज्ञानदर्शनस्वभावं स्वदेहस्थमपि च परमात्मानम्। कथंभूतम्। **संतु** रागद्वेषमोहरहितत्वेन शान्तं परमोपशमरूपमिति। इदमत्र तात्पर्यम्। यदि निजशुद्धात्मैवोपादेय इति मत्वा तत्साधकत्वेन तदनुकूलं तपश्चरणं करोति तत्परिज्ञानसाधकं च पठति सदा परंपरया मोक्षसाधकं भवति, नो चेत् पुण्यबन्धकारणं तमेवेति। निर्विकल्पसमाधिरहिताः सन्तः आत्मरूपं न पश्यन्ति। तथा चोक्तम्—"**आनन्दं ब्रह्मणो रूपं निजदेहे व्यवस्थितम्। ध्यानहीना न पश्यन्ति जात्यन्धा इव भास्करम् ॥**"१९१॥

**घोरु तवचरणु करंतु वि सयल वि सत्थ मुणंतु परमसमाहि– विवज्जियउ संतु सिउ णवि देक्खइ ॥१९१॥** जो घोर तपश्चरण करते हुए और सकल शास्त्रों को जानते हुए भी परमसमाधि से रहित है वह शान्त शुद्धात्मा को नहीं देख सकता है। **भावार्थ**–समस्त परद्रव्य की इच्छा से रहित शुद्धात्मानुभूति रूप तप के अभाव में कायक्लेश रूप– शीतकाल में नदी किनारे, ग्रीष्मकाल में पर्वत के शिखर पर और वर्षाकाल में वृक्ष के नीचे– महान् दुर्धर तप करता है और केवल तप ही नहीं करता अपितु निर्विकल्प परमात्मस्वरूप से रहित हुआ सब शास्त्रों को भी जानता है परन्तु रागादिविकल्परहित परमसमाधि से रहित है तो फिर वह शिव शब्द से वाच्य विशुद्धज्ञानदर्शनस्वभाव वाले स्वदेहस्थ परमात्मा को नहीं देख सकता। तात्पर्य यह है कि यदि 'निजशुद्धात्मा ही उपादेय है' ऐसा मान कर उसके साधनभूत अनुकूल तपश्चरण करता है और तप के परिज्ञान में साधक शास्त्र पढ़ता है, तो वह परम्परा से मोक्ष का साधक है, नहीं तो ये सब पुण्यबन्ध के ही कारण होते हैं। निर्विकल्पसमाधि से रहित सन्त आत्मस्वरूप को नहीं देख पाते हैं। कहा भी है—"ब्रह्म का रूप आनन्द है, वह ब्रह्म निजदेह में व्यवस्थित है परन्तु ध्यान से रहित जीव ब्रह्म को उसी प्रकार नहीं देख सकते जिस प्रकार जन्मान्ध सूर्य को नहीं देख सकते।" ॥१९१॥

अथ—

अब विषय-कषायों का निषेध करते हैं—

**विसय-कसाय वि णिद्दलिवि जे ण समाहि करंति ।**
**ते परमप्पहँ जोइया णवि आराहय होंति ॥१९२॥**

विषयकषायानपि निर्दल्य ये न समाधि कुर्वन्ति ।
ते परमात्मनः योगिन् नैव आराधका भवन्ति ॥१९२॥

**जे** ये केचन **ण करंति** न कुर्वन्ति । कम् । **समाहि** त्रिगुप्तिगुप्तपरमसमाधिम् । किं कृत्वा पूर्वम् । **णिद्दलिवि** निर्मूल्य । कानपि **विसयकसाय वि** निर्विषयकषायात् शुद्धात्मतत्त्वात् प्रतिपक्षभूतान् विषयकषायानपि **ते णवि आराहय होंति** ते नैवाराधका भवन्ति **जोइया** हे योगिन् । कस्याराधका न भवन्ति । **परमप्पहं** निर्दोषिपरमात्मन इति । तथाहि । विषयकषायनिवृत्तिरूप शुद्धात्मानुभूतिस्वभाव वैराग्यं, शुद्धात्मोपलब्धिरूप तत्त्वविज्ञानं, बाह्याभ्यन्तरपरिग्रहपरित्यागरूप नैर्ग्रन्थ्यं, निश्चिन्तात्मानुभूतिरूपा वशचित्तता, वीतरागनिर्विकल्पसमाधिबहिरङ्गसहकारिभूतं जितपरीषहत्वं चेति पञ्चैतान् ध्यानहेतून् ज्ञात्वा भावयित्वा च ध्यानं कर्तव्यमिति भावार्थः । तथा चोक्तम्—**"वैराग्यं तत्त्वविज्ञानं नैर्ग्रन्थ्यं वशचित्तता । जितपरीषहत्वं च पञ्चैते ध्यानहेतवः ॥"** ॥१९२॥

**जे विसय-कसाय वि णिद्दलिवि समाहि ण करंति ते जोइया परमप्पहँ आराहय णवि होंति** ॥१९२॥ जो विषयकषायो का निर्दलन करके तीन गुप्तिरूप परमसमाधि को धारण नही करते वे हे योगी ! परमात्मा के आराधक नही है । विषयकषाय की निवृत्तिरूप शुद्धात्मानुभूति **वैराग्य** से ही होती है अत: ध्यान का मुख्य कारण वैराग्य है । शुद्धात्मोपलब्धिरूप **तत्त्वविज्ञान**, बाह्याभ्यन्तर-परिग्रह परित्याग रूप **निर्ग्रन्थता**, निश्चिन्त आत्मानुभूति रूप **वशचित्तता** (मन को वश में करना), वीतरागनिर्विकल्प समाधि का बहिरंग सहकारी भूत **परीषहजय**—ये पाँच ध्यान के कारण जान कर, इनकी भावना कर ध्यान करना चाहिए, यह **भावार्थ** है । कहा भी है—"वैराग्य, तत्त्वविज्ञान, परिग्रह का त्याग, मन को वश में करना और परीषहो को जीतना– ये पाँच आत्मध्यान के कारण हैं ।" ॥१९२॥

अथ—

अब परमसमाधि की महिमा कहते हैं—

**परम-समाहि धरेवि मुणि जे परबंभु ण जंति ।**
**ते भव-दुक्खइँ बहुविहइँ कालु अणंतु सहंति ॥१९३॥**

परमसमाधि धृत्वापि मुनयः ये परब्रह्म न यान्ति ।
ते भवदुःखानि बहुविधानि कालं अनन्तं सहन्ते ॥१९३॥

**जे** ये केचन **मुणि** मुनयः **ण जंति** न गच्छन्ति । कं कर्मतापन्नम् । **परबंभु** परमब्रह्म परब्रह्मशब्दवाच्य निजदेहस्थं केवलज्ञानाद्यनन्तगुणस्वभावं परमात्मस्वरूपम् । किं कृत्वा पूर्वम् । **परमसमाहि धरेवि** वीतरागतात्त्विकचिदानन्दैकानुभूतिरूपं परमसमाधिं धृत्वा **ते** पूर्वोक्तशुद्धात्मभावनारहिताः पुरुषाः **सहंति** सहन्ते । कानि कर्मतापन्नानि । **भवदुक्खइं** वीतरागपरमाह्लादरूपात् पारमार्थिकसुखात् प्रतिपक्षभूतानि नरनारकादिभवदुःखानि । कतिसंख्योपेतानि । **बहुविहइं** शारीरमानसादिभेदेन बहुविधानि । कियन्तं कालम् । **कालु अणंतु** अनन्तकालपर्यन्तमिति । अत्रेदं व्याख्यानं ज्ञात्वा निजशुद्धात्मनि स्थित्वा रागद्वेषादिसमस्तविभावत्यागेन भावना कर्तव्येति तात्पर्यम् ।।१९३।।

**जे मुणि परमसमाहि धरेवि परबंभु ण जंति, ते बहुविहइँ भवदुक्खइँ अणंतु कालु सहंति ।।१९३।।** जो कोई मुनि वीतरागतात्त्विक चिदानन्द अखण्ड अनुभूतिरूप परम समाधि को धारण कर के भी निजदेह मे स्थित केवलज्ञानादि अनन्तगुणरूप निज आत्मा को नही जानते है, वे पूर्वोक्त शुद्धात्मभावना से रहित पुरुष पारमार्थिक सुख के विपरीत आधिव्याधि रूप दुःखो को नर-नारकादि पर्यायो में अनन्तकाल तक भोगते रहते है । मानसिक दुःख को आधि और शारीरिक दुःख को व्याधि कहते है । यहाँ ऐसा व्याख्यान जान कर निज शुद्धात्मा मे स्थिर होकर रागद्वेषादिसमस्त विभाव भावो का त्याग कर निजस्वरूप की भावना करनी चाहिए ।।१९३।।

**जामु सुहासुह-भावडा णवि सयल वि तुट्टंति ।**
**परम-समाहि ण तामु मणि केवुलि एमु भणंति ।।१९४।।**

यावत् शुभाशुभभावा नैव सकला अपि त्रुटयन्ति ।
परमसमाधिर्न तावत् मनसि केवलिन एवं भणन्ति ।।१९४।।

**जामु** इत्यादि । **जामु** यावत्कालं **णवि तुट्टंति** नैव नश्यन्ति । के कर्तारः । **सुहासुहभावडा** शुभाशुभविकल्पजालरहितात् परमात्मद्रव्याद्विपरीता शुभाशुभभावाः । परिणामाः कतिसंख्योपेता अपि । **सयल वि** समस्ता अपि **तामु ण** तावत्कालं न । कोऽसौ । **परमसमाहि** शुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपः शुद्धोपयोगलक्षणः परमसमाधिः । क्व । **मणि** रागादिविकल्परहितत्वेन शुद्धचेतसि **केवुलि एमु भणंति** केवलिनो वीतरागसर्वज्ञा एवं कथयन्तीति भावार्थः ।।१९४।। इति चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमसमाधिप्रतिपादकसूत्रषट्केन प्रथममन्तरस्थलं गतम् ।

**जामु सयल वि सुहासुह भावडा णवि तुट्टंति, तामु मणि परमसमाहि ण, केवुलि एमु भणंति ।।१९४।।** जब तक समस्त शुभाशुभ विकल्पजाल से रहित परमात्मद्रव्य से विपरीत शुभाशुभभाव दूर न हों तब तक रागादिविकल्प से रहित शुद्ध चित्त मे सम्यग्दर्शन, ज्ञान, चारित्ररूप शुद्धोपयोग

लक्षण वाली परमसमाधि नहीं हो सकती है, केवली वीतरागसर्वज्ञ भगवन्त ऐसा कहते हैं। यह **भावार्थ है** ॥१९४॥ इस प्रकार चौबीस दोहा-प्रमाण महास्थल में परमसमाधि के प्रतिपादक छह दोहों का प्रथम अन्तरस्थल पूर्ण हुआ।

तदनन्तरमर्हत्पदमिति भावमोक्ष इति जीवन्मोक्ष इति केवलज्ञानोत्पत्तिरित्येकोऽर्थः तस्य चतुर्विधनामाभिधेयस्यार्हत्पदस्य प्रतिपादनमुख्यत्वेन सूत्रत्रयपर्यन्तं व्याख्यानं करोति। तद्यथा—

तदनन्तर अर्हत्पद कहो, चाहे भावमोक्ष कहो, चाहे जीवन्मोक्ष कहो, चाहे केवलज्ञान की उत्पत्ति कहो—सबका एक ही अर्थ है, इसप्रकार चतुर्विध नाम वाले अर्हत्पद के प्रतिपादन की मुख्यता से तीन दोहे कहते हैं—

**सयल-वियप्पहँ तुट्टाइँ सिव-पय-मग्गि वसंतु।**
**कम्म-चउक्कइ विलउ गइ अप्पा हुइ अरहंतु ॥१९५॥**

सकलविकल्पाना त्रुटयता शिवपदमार्गे वसन्।
कर्मचतुष्के विलय गते आत्मा भवति अर्हन् ॥१९५॥

**हुइ** भवति। कोऽसौ। **अप्पा** आत्मा। कथंभूतो भवति। **अरहंतु** अरिर्मोहनीयं कर्म तस्य हननाद् रजसी ज्ञानदृगावरणे तयोरपि हननाद् रहस्यशब्देनान्तरायस्तदभावाच्च देवेन्द्रादिविनिर्मितामतिशयवती पूजामर्हतीत्यर्हन्। कस्मिन् सति। **कम्मचउक्कइ विलउ गइ** घातिकर्मचतुष्के विलय गते सति। किं कुर्वन् सन् पूर्वम्। **सिवपयमग्गि वसंतु** शिवशब्दवाच्य यन्मोक्षपदं तस्य योऽसौ सम्यग्दर्शनज्ञानचारित्रत्रितयैकलक्षणो मार्ग-स्तस्मिन् वसन् सन्। केषां सताम्। **सयलवियप्पहं तुट्टाहं** समस्तविकल्पानां नष्टानां समस्तरागादिविकल्पविनाशादनन्तरं भवतीति भावार्थः।

**सयल वियप्पहँ तुट्टाइँ, सिवपयमग्गि वसंतु, कम्म चउक्कइ विलउ गइ अप्पा अरहंतु हुइ** ॥१९५॥ समस्त रागादि विकल्पों का नाश करते हुए, मोक्षपद के मार्गरूप सम्यग्दर्शन, ज्ञान, चारित्र मे ठहरते हुए, ज्ञानावरणीय, दर्शनावरणीय, मोहनीय और अन्तराय इन चार घातिया कर्मों का विलय हो जाने पर आत्मा अर्हन्त होती है। **भावार्थ**—[1]अरि-मोहनीय कर्म के नाश से, रज रूप ज्ञानावरण और दर्शनावरण के नाश से और रहसि शब्द से अन्तराय के अभाव से, देवेन्द्रादि विनिर्मित अतिशयवती पूजा के जो योग्य हो, वह अर्हन्त होता है। यह अर्हन्त पद रागादि विकल्पों के नाश से और निर्विकल्पध्यान के प्रसाद से केवलज्ञान होने पर होता है। केवलज्ञानी का नाम अर्हन्त है, चाहे उसे जीवनमुक्त कहो, चाहे भावमोक्ष कहो। चार अघातिया कर्मों का नाश कर सिद्ध होने पर 'विदेह मोक्ष' कहा जाता है ॥१९५॥

---

१. 'अरि-रज-रहस विहीन'—दर्शनपाठ : दौलतराम।

अथ—

अब केवलज्ञान की महिमा कहते हैं—

**केवल-णाणिं अणवरउ लोयालोउ मुणंतु ।**
**णियमें परमाणंदमउ अप्पा हुइ अरहंतु ॥१९६॥**

केवलज्ञानेनानवरतं लोकालोक जानन् ।
नियमेन परमानन्दमय. आत्मा भवति अर्हन् ॥१९६॥

**हुइ** भवति । कोऽसौ । **अप्पा** आत्मा । कथभूतो भवति । **अरहंतु** पूर्वोक्तलक्षणो अर्हन् । किं कुर्वन् । **लोयालोउ मुणंतु** क्रमकरणव्यवधानरहितत्वेन कालत्रयविषयं लोकालोकं वस्तु वस्तुस्वरूपेण युगपत् जानन् सन् । केन । **केवलणाणिं** लोकालोकप्रकाशकसकलविमलकेवलज्ञानेन । कथम् । **अणवरउ** निरन्तरम् । किंविशिष्टो भवति भगवान् । **परमाणंदमउ** वीतरागपरमसमरसीभावलक्षणतात्त्विकपरमानन्दमय: । केन । **णियमें** निश्चयेन अत्र सदेहो न कर्तव्य इत्यभिप्राय ॥१९६॥

**केवलणाणिं अणवरउ लोयालोउ मुणंतु णियमें परमाणंदमउ अप्पा अरहंतु हुइ ॥१९६॥** केवलज्ञान से लोक-अलोक को निरन्तर जानता हुआ निश्चय से परमानन्दमयी यह आत्मा अरहन्त होता है । **भावार्थ**-समस्तलोकालोक को एक ही समय मे केवलज्ञान से जानता हुआ अरहत कहलाता है । अरहन्त का ज्ञान जानने के क्रम से रहित होता है और बिना साधन के प्रत्यक्ष जानता है । एक ही समय में त्रिकालवर्ती लोकालोक के सभी पदार्थों को एक साथ जानता है । वे केवली भगवान वीतराग परमसमरसी भाव रूप परमानन्द अतीन्द्रिय अविनाशी सुख मे परिपूर्ण है, इसमे सन्देह नही है ॥१९६॥

अथ—

अब कहते है कि केवलज्ञान ही आत्मा का निजस्वभाव है और केवली को ही परमात्मा कहते हैं —

**जो जिणु केवल-णाणमउ परमाणंद-सहाउ ।**
**सो परमप्पउ परम-परु सो जिय अप्प-सहाउ ॥१९७॥**

य· जिन. केवलज्ञानमय: परमानन्दस्वभाव. ।
स· परमात्मा परमपर स जीव आत्मस्वभाव: ॥१९७॥

**जो** इत्यादि । **जो** य· **जिणु** अनेकभवगहनव्यसनप्रापणहेतून् कर्मारातीन् जयतीति जिन: । कथभूतः । **केवलणाणमउ** केवलज्ञानाविनाभूतानन्तगुणमय: । पुनरपि कथंभूत. । **परमाणंदसहाउ** इन्द्रियविषयातीत· स्वात्मोत्थ. रागादिविकल्परहित: परमानन्द-

**स्वभावः सो परमप्पउ** स पूर्वोक्तोऽर्हन्नेव परमात्मा **परमपरु** प्रकृष्टानन्तज्ञानादिगुणरूपा मा लक्ष्मीर्यस्य स भवति परमः संसारिभ्यः पर उत्कृष्टः इत्युच्यते परमश्चासौ परश्च परमपरः **सो** स पूर्वोक्तो वीतरागः सर्वज्ञः **जिय** हे जीव **अप्पसहाउ** आत्मस्वभाव इति। अत्र योऽसौ पूर्वोक्तभणितो भगवान् स एव संसारावस्थायां निश्चयनयेन शक्तिरूपेण जिन इत्युच्यते। केवलज्ञानावस्थायां व्यक्तिरूपेण च। तथैव च परमब्रह्मादिशब्दवाच्यः स एव तदग्रे स्वयमेव कथयति। निश्चयनयेन सर्वे जीवा जिनस्वरूपाः जिनोऽपि सर्व-जीवस्वरूप इति भावार्थः। तथा चोक्तम्—"**जीवा जिणवर जो मुणइ जिणवर जीव मुणेइ। सो समभावि परिट्ठियउ लहु णिव्वाणु लहेइ॥**" ॥१९७॥ एवं चतुर्विंशति-सूत्रप्रमितमहास्थलमध्ये अर्हदवस्थाकथनमुख्यत्वेन सूत्रत्रयेण द्वितीयमन्तरस्थलं गतम्।

**जिय! जो जिणु केवलणाणमउ परमाणंद सहाउ सो परमप्पउ परमपरु सो अप्पसहाउ** ॥१९७॥ जो अनन्त संसाररूपी वन में भ्रमण के कारणभूत ज्ञानावरणादि आठ कर्मरूपी शत्रुओं को जीतने वाला है, केवलज्ञानादि अनन्त गुणमयी है और इन्द्रियविषयों से रहित, रागादि विकल्पों से रहित परमानन्द स्वभावी है, ऐसा जिनेश्वर केवलज्ञानमयी अरहंतदेव ही उत्कृष्ट अनन्त ज्ञानादि गुणरूप लक्ष्मी वाला परमात्मा है। वही संसारियों से उत्कृष्ट है, ऐसा जो भगवान् वह तो व्यक्तिरूप है और वह आत्मा का ही स्वभाव है। यहाँ यह पूर्वकथित भगवान् ही संसारावस्था में निश्चयनय में शक्तिरूप से विराजमान है और केवलज्ञानावस्था में व्यक्तिरूप से। द्रव्यार्थिक नय से जैसे भगवान् है वैसे ही सब जीव हैं। सभी जीव जिन समान हैं और जिनराज भी सब जीवों के समान हैं। कहा भी है—जो सम्यग्दृष्टि जीवों को जिनवर जाने और जिनवर को जीव जाने, (दोनों की जीव जाति एक ही है, जीव और जिनवर में जातिभेद नहीं है), वही समभाव में स्थित होकर शीघ्र निर्वाण प्राप्त करते हैं।" ॥१९७॥ इस प्रकार २४ दोहों प्रमाण महास्थल में अरहन्तदेव के कथन की मुख्यता से तीन दोहों में दूसरा अन्तरस्थल कहा।

अत ऊर्ध्वं परमात्मप्रकाशशब्दस्यार्थकथनमुख्यत्वेन सूत्रत्रयपर्यन्तं व्याख्यानं करोति। तद्यथा—

अब आगे परमात्मप्रकाश शब्द के अर्थ के कथन की मुख्यता से तीन दोहे कहते हैं—

**सयलहँ कम्महँ दोसहँ वि जो जिणु देउ विभिण्णु।**
**सो परमप्प-पयासु तुहुँ जोइय णियमेँ मण्णु॥१९८॥**

सकलेभ्यः कर्मभ्यः दोषेभ्यः अपि यो जिनः देवः विभिन्नः।
तं परमात्मप्रकाशं त्वं योगिन् नियमेन मन्यस्व॥१९८॥

**सो** तं **परमप्पपयासु** परमात्मप्रकाशसंज्ञं **तुहुँ** त्वं कर्ता **मण्णु** मन्यस्व जानीहि **जोइय** हे योगिन् **णियमें** निश्चयेन। स कः। **जो जिणु देउ** यो जिनदेवः। किंविशिष्टः।

**विभिण्णु** विशेषेण भिन्न: । केभ्य: । **सयलहं कम्महं** रागादिरहितचिदानन्दैकस्वभाव-परमात्मनो यानि भिन्नानि सर्वकर्माणि तेभ्य: । न केवलं कर्मभ्यो भिन्न: । **दोसहं वि** टङ्कोत्कीर्णज्ञायकैकस्वभावस्य परमात्मनो येऽनन्तज्ञानसुखादिगुणास्तत्प्रच्छादका ये दोषास्तेभ्योऽपि भिन्न इत्यभिप्राय: ।।१९८।।

**जोइय ! सयलहं कम्महं दोसहं वि विभिण्णु जो जिणु देउ सो तुहुं णियमें परमप्पपयासु मण्णु ।।१९८।।** हे योगी ! ज्ञानावरणादि आठ कर्मों से और क्षुधादि अठारह दोषों से रहित जो जिनेश्वरदेव हैं उनको तू निश्चय से परमात्मप्रकाश मान । अर्थात् निर्दोष जिनेन्द्रदेव ही परमात्मप्रकाश हैं । **भावार्थ**—रागादि रहित चिदानन्दस्वभाव परमात्मा से भिन्न जो सर्व कर्म हैं, भगवान इनसे मुक्त हैं और न केवल कर्मों से मुक्त हैं अपितु ज्ञायक स्वभाव आत्मा के अनन्तज्ञानादि गुणों के आच्छादक दोषों से भी रहित हैं, वे ही सर्वज्ञ परमात्म प्रकाश हैं ।।१९८।।

**केवल-दंसणु णाणु सुहु वीरिउ जो जि अणंतु ।**
**सो जिण-देउ वि परम-मुणि परम-पयासु मुणंतु ।।१९९।।**

केवलदर्शनं ज्ञानं सुख वीर्यं य एव अनन्तम् ।
स जिनदेवोऽपि परममुनि: परमप्रकाश जानन् ।।१९९।।

**सो जिणदेउ वि** स जिनदेवोऽपि एव भवति । न केवलं जिनदेवो भवति **परम-मुणि** परम उत्कृष्टो मुनि: प्रत्यक्षज्ञानी । किं कुर्वन् सन् । **मुणंतु** मन्यमानो जानन् सन् । कम् । **परमपयासु** परममुत्कृष्ट लोकालोकप्रकाशक केवलज्ञान यस्य स भवति परमप्रकाशस्त परमप्रकाशम् । स क. । **केवलदंसणु णाणु सुहु वीरिउ जो जि** केवलज्ञानदर्शनसुखवीर्यस्वरूप य एव । कथंभूत तत् केवलज्ञानादिचतुष्टयम् । **अणंतु** युगपदनन्तद्रव्यक्षेत्रकालभावपरिच्छेदकत्वादविनश्वरत्वाच्चानन्तमिति भावार्थ ।।१९९।।

**केवल-दंसणु णाणु सुहु वीरिउ जो जि अणंतु सो जिणदेउ वि परममुणि परमपयासु मुणंतु ।।१९९।।** केवलदर्शन, केवलज्ञान, अनन्तसुख और अनन्तवीर्य ये अनन्त चतुष्टय जिसके है, वही जिनदेव है, वही परममुनि अर्थात् प्रत्यक्ष ज्ञानी है, उत्कृष्ट लोकालोक का प्रकाशक जो केवलज्ञान वही जिसके परमप्रकाश है, उससे सकल द्रव्य, क्षेत्र, काल, भव, भाव को जानते हुए परमप्रकाशक है । ये केवलज्ञानादि अनन्त चतुष्टय एक ही समय में अनन्तद्रव्य, अनन्तक्षेत्र, अनन्तकाल और अनन्त भावों को जानते है, इसलिए अनन्त है, अविनश्वर है, यह **भावार्थ** है ।

**जो परमप्पउ परम-पउ हरि हरु बंभु वि बुद्धु ।**
**परम पयासु भणंति मुणि सो जिण-देउ विसुद्धु ।।२००।।**

य. परमात्मा परमपद. हरि: हर: ब्रह्मापि बुद्ध. ।
परमप्रकाश: भणन्ति मुनय: स जिनदेवो विशुद्ध: ।।२००।।

**भणंति** कथयन्ति । के ते **मुणि** मुनयः प्रत्यक्षज्ञानिनः । कथंभूतं भणन्ति **परम-पयासु** परमप्रकाशः । यः कथंभूतः । **जो परमप्पउ** यः परमात्मा । पुनरपि कथंभूतः । **परमपउ** परमानन्तज्ञानादिगुणाधारत्वेन परमपदस्वभावः । किंविशिष्टः । **हरि** हरि-संज्ञः **हरु** महेश्वराभिधानः **बंभु वि** परमब्रह्माभिधानोऽपि **बुद्ध** बुद्धः सुगतसंज्ञः **सो जिणदेउ** स एव पूर्वोक्तः परमात्मा जिनदेवः । किंविशिष्टः । **विसुद्ध** समस्तरागादि-दोषपरिहारेण शुद्ध इति । अत्र य एव परमात्मप्रकाशसंज्ञो निर्दोषिपरमात्मा व्याख्यातः स एव परमात्मा, स एव परमपदः, स एव विष्णुसंज्ञः, स एवेश्वराभिधानः, स एव ब्रह्म-शब्दवाच्यः, स एव सुगतशब्दाभिधेयः, स एव जिनेश्वरः, स एव विशुद्ध इत्याद्यष्टाधिक-सहस्रनामाभिधेयो भवति । नानारुचीना जनानां तु कस्यापि केनापि विवक्षितेन नाम्ना-राध्यः स्यादिति भावार्थः । तथा चोक्तम्—**"नामाष्टकसहस्रेण युक्तं मोक्षपुरेश्वरम्"** इत्यादि ॥२००॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमात्मप्रकाशशब्दार्थकथन-मुख्यत्वेन सूत्रत्रयेण तृतीयमन्तरस्थलं गतम् ।

**जो परमप्पउ मुणि परमपउ हरिहरु बंभु वि बुद्ध परमपयासु भणंति सो विसुद्ध जिणदेउ** ॥२००॥ जिस परमात्मा को मुनि परमपद, विष्णु, शिव, ब्रह्मा, बुद्ध और परमप्रकाश नाम से कहते है, वह रागादिरहित शुद्ध जिनदेव ही है, ये सब नाम उसी के है । **भावार्थ**– यहाँ जो परमात्मप्रकाश संज्ञा से निर्दोषपरमात्मा कहा गया है, वही परम आत्मा है, वही (परम अनन्तज्ञानादि गुणो का आधार होने से) परमपद है, वही विष्णु है, वही महेश्वर है, वही ब्रह्मा है, वही बुद्ध है, वही जिनेश्वर है और वही (समस्त रागादि दोषो के परिहार से) विशुद्ध है, इसप्रकार एक हजार आठ नाम वाला वह अरहंतदेव ही है । नानारुचियो वाले मनुष्य नाना नामो से उनकी आराधना करते है । कहा भी है—"वह मोक्षपुर का स्वामी १००८ नामो वाला है ।" ॥२००॥ इस प्रकार चौबीस दोहों के महास्थल मे परमात्मप्रकाश शब्द के अर्थ की मुख्यता से तीन दोहो मे तीसरा अन्तरस्थल कहा ।

तदनन्तरं सिद्धस्वरूपकथनमुख्यत्वेन सूत्रत्रयपर्यन्तं व्याख्यानं करोति तद्यथा—

अब सिद्धस्वरूप के कथन की मुख्यता से तीन दोहो मे व्याख्यान करते हैं—

**झाणें कम्म-क्खउ करिवि मुक्कउ होइ अणंतु ।**
**जिणवरदेवइँ सो जि जिय पभणिउ सिद्ध महंतु ॥२०१॥**

ध्यानेन कर्मक्षयं कृत्वा मुक्तो भवति अनन्तः ।
जिनवरदेवेन स एव जीव प्रभणितः सिद्धो महान् ॥२०१॥

**पभणिउ** प्रभणितः कथितः । केन कर्तृभूतेन । **जिणवरदेवइं** जिनवरदेवेन । कोऽसौ भणितः । **सिद्ध** सिद्धः । कथंभूतः **महंतु** महापुरुषाराधितत्वात् केवलज्ञानादि-महागुणाधारत्वाच्च महान् । क एव । **सो जि** स एव । स कः योऽसौ **मुक्कउ होइ**

ज्ञानावरणादिभिः कर्मभिर्मुक्तो रहितः सम्यक्त्वाद्यष्टगुणसहितश्च **जिय** हे जीव । कथंभूतः । **अणंतु** न विद्यतेऽन्तो विनाशो यस्य स भवत्यनन्तः । किं कृत्वा पूर्वं मुक्तो भवति । **कम्मक्खउ करिवि** विशुद्धज्ञानदर्शनस्वभावादात्मद्रव्याद्विलक्षणं यदार्तरौद्रध्यानद्वयं तेनोपार्जितं यत्कर्म तस्य क्षयः कर्मक्षयस्तं कृत्वा । केन । **झाणें** रागादिविकल्परहितस्वसंवेदन ज्ञानलक्षणेन ध्यानेनेति तात्पर्यम् ॥२०१॥

**जिय ! झाणें कम्मक्खउ करिवि मुक्कउ अणंतु होइ । जिणवरदेवइँ सो जि महंतु सिद्ध पभणिउ** ॥२०१॥ हे जीव ! शुक्लध्यान से कर्मों का क्षय करके जो मुक्त और अविनाशी होता है, उसे ही जिनवर देव ने सबसे महान् सिद्ध कहा है । **भावार्थ**–महापुरुषो के द्वारा आराधित होने से और केवलज्ञानादि महान् गुणो के धारण करने से जो महान् है, जो ज्ञानावरणादि आठो कर्मों से रहित है और सम्यक्त्वादि आठ गुणों (क्षायिक सम्यक्त्व, केवलज्ञान, केवलदर्शन, अनन्तवीर्य, सूक्ष्मत्व, अवगाहनत्व, अगुरुलघुत्व और अव्याबाधत्व) से युक्त है ; जिन्होने विशुद्धज्ञानदर्शनस्वभाव जो आत्मद्रव्य उससे विपरीत जो आर्त रौद्र खोटे ध्यान हैं उनमे उत्पन्न शुभ-अशुभ कर्म का शुक्लध्यान मे क्षय कर मोक्ष पा लिया है, वे सिद्ध परमेष्ठी है ॥२०१॥

अथ—

पुन. सिद्धों की महिमा कहते हैं—

**अण्णु वि बंधु वि तिहुयणहँ सासय-सुक्ख-सहाउ ।**
**तित्थु जि सयलु वि कालु जिय णिवसइ लद्ध-सहाउ ॥२०२॥**

अन्यदपि बन्धुरपि त्रिभुवनस्य शाश्वतसौख्यस्वभाव ।
तत्रैव सकलमपि काल जीव निवसति लब्धस्वभावः ॥२०२॥

**अण्णु** वि इत्यादि । **अण्णु वि** अन्यदपि पुनरपि स पूर्वोक्तः सिद्ध. । कथभूतः । **बंधु वि** बन्धुरेव । कस्य । **तिहुयणहं** त्रिभुवनस्थभव्यजनस्य । पुनरपि किं विशिष्टः । **सासयसुक्खसहाउ** रागादिरहिताव्याबाधशाश्वतसुखस्वभाव. । एवगुणविशिष्ट. सन् कि करोति स भगवान् । **तित्थु जि** तत्रैव मोक्षपदे **णिवसइ** निवसति । कथंभूतः सन् **लद्धसहाउ** लब्धशुद्धात्मस्वभाव. कियत्काल निवसति । **सयलु वि कालु** समस्तमप्यनन्तानन्तकालपर्यन्तं **जिय** हे जीव इति । अत्रानेन समस्तकालग्रहणेन किमुक्तं भवति । ये केचन वदन्ति मुक्तानां पुनरपि ससारे पतनं भवति तन्मत निरस्तमिति भावार्थः ॥२०२॥

**जिय ! अण्णु वि तिहुयणहँ बंधु वि, सासयसुक्खसहाउ, तित्थु जि लद्धसहाउ सयलु वि कालु णिवसइ** ॥२०२॥ हे जीव ! वे सिद्ध भगवान् तीन लोक के प्राणियो का हित करने वाले है और जिनका स्वभाव अविनाशी सुख है और उसी शुद्ध क्षेत्र में निज स्वभाव को पाकर सदा काल निवास करते हैं, फिर चतुर्गति में नहीं लौटेंगे । **भावार्थ**–सिद्धपरमेष्ठी त्रिभुवनस्थ भव्यजीवों के हितकारी हैं,

उनका रागादिरहित अव्याबाध अविनाशी सुख-स्वभाव है। ऐसे अनन्त गुणरूप वे भगवान् सदा मोक्ष में विराजते हैं। उन्होंने शुद्ध आत्मस्वभाव प्राप्त कर लिया है अतः वे अनन्त काल पर्यन्त मोक्षपद में ही रहेंगे, कभी संसार में नहीं आवेंगे। यहाँ अनन्त काल कहने से क्या प्रयोजन है? इसके कहने का प्रयोजन है जो कोई ऐसा कहते हैं कि मुक्त जीवों का भी संसार में पतन होता है, सो उनका कहना खण्डित किया गया ॥२०२॥

**जम्मण-मरण-विवज्जियउ चउ-गइ-दुक्ख-विमुक्कु।**
**केवल-दंसण-णाणमउ णंदइ तित्थु जि मुक्कु ॥२०३॥**

जन्ममरणविवर्जितः चतुर्गतिदुःखविमुक्तः।
केवलदर्शनज्ञानमयः नन्दति तत्रैव मुक्तः ॥२०३॥

पुनरपि कथंभूतः स भगवान्। **जम्मणमरणविवज्जियउ** जन्ममरणविवर्जितः। पुनरपि किंविशिष्टः। **चउगइदुक्खविमुक्कु** सहजशुद्धपरमानन्दैकस्वभावं यदात्मसुखं तस्माद्विपरीतं यच्चतुर्गतिदुःखं तेन विमुक्तो रहितः। पुनरपि किंस्वरूपः। **केवलदंसण-णाणमउ** क्रमकरणव्यवधानरहितत्वेन जगत्त्रयकालत्रयवर्तिपदार्थानां प्रकाशककेवलदर्शन-ज्ञानाभ्यां निर्वृत्तः केवलदर्शनज्ञानमयः। एवंगुणविशिष्टः सन् किं करोति। **णंदइ** स्व-कीयस्वाभाविकानन्तज्ञानादिगुणैः सह नन्दति वृद्धिं गच्छति। क्व। **तित्थु जि** तत्रैव मोक्षपदे। पुनरपि किंविशिष्टः सन्। **मुक्कु** ज्ञानावरणाद्यष्टकर्मनिर्मुक्तो रहितः अव्या-बाधाद्यनन्तगुणैः सहितश्चेति भावार्थः ॥२०३॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये सिद्धपरमेष्ठिव्याख्यानमुख्यत्वेन सूत्रत्रयेण चतुर्थमन्तरस्थलं गतम्।

**जम्मण-मरण-विवज्जियउ चउ-गइ-दुक्ख विमुक्कु, केवल-दंसण-णाणमउ मुक्कु तित्थु जि णंदइ ॥२०३॥** वे सिद्ध परमेष्ठी जन्म-मरण से रहित हैं, चारों गतियों के दुःखों से रहित हैं और केवलदर्शन केवलज्ञानमयी हैं, ऐसे कर्मरहित हुए वे अनन्त काल तक उसी सिद्ध क्षेत्र में अपने स्वभाव में आनन्दरूप विराजते हैं। **भावार्थ**–सिद्ध परमेष्ठी सहज शुद्ध परमानन्द एक अखण्ड स्वभावरूप जो आत्मसुख है उससे विपरीत जो चारों गतियों के दुःख हैं, उनसे रहित है, जन्म-मरण से रहित हैं तथा क्रम-करण और व्यवधानरहित तथा तीनों लोकों और तीनों कालों के पदार्थों को एक साथ जानने वाले केवलदर्शन और केवलज्ञान से युक्त हैं। ऐसे स्वकीय स्वाभाविक अनन्तज्ञानादि गुणों के साथ सदा आनन्दरूप से वे लोकशिखर पर विराज रहे हैं। वे ज्ञानावरणादि आठ कर्मों से रहित है तथा अव्याबाधादि अनन्त गुणों से युक्त हैं ॥२०३॥ इस प्रकार चौबीस दोहा प्रमाण महास्थल में सिद्ध परमेष्ठी के व्याख्यान की मुख्यता से तीन दोहों में चौथा अन्तरस्थल कहा।

अथानन्तरं परमात्मप्रकाशभावनारतपुरुषाणां फलं दर्शयन् सूत्रत्रयपर्यन्तं व्याख्यानं करोति। तथाहि—

अब 'परमात्मप्रकाश' की भावना में रत पुरुषों को प्राप्त होने वाले फल को दर्शाते हुए तीन दोहों में व्याख्यान करते हैं—

**जे परमप्प-पयासु मुणि भावि भावहिँ सत्थु।**
**मोहु जिणेविणु सयलु जिय ते बुज्झहिँ परमत्थु ॥२०४॥**

ये परमात्मप्रकाशं मुनयः भावेन भावयन्ति शास्त्रम्।
मोह जित्वा सकल जीव ते बुध्यन्ति परमार्थम् ॥२०४॥

**भावहिं** भावयन्ति ध्यायन्ति। **के मुणि** मुनयः **जे** ये केचन। किं भावयन्ति। **सत्थु** शास्त्रम्। **परमप्पपयासु** परमात्मस्वभावप्रकाशत्वात्परमात्मप्रकाशसंज्ञम्। केन भावयन्ति। **भावि** समस्तरागाद्यपध्यानरहितशुद्धभावेन। किं कृत्वा पूर्वम्। **जिणेविणु** जित्वा। कम्। **मोहु** निर्मोहपरमात्मतत्त्वाद्विलक्षण मोहम्। कतिसंख्योपेतम्। **सयलु** समस्त निरवशेष **जिय** हे जीवेति ते त एवंगुणविशिष्टास्तपोधनाः **बुज्झहिं** बुध्यन्ति। कम्। **परमत्थु** परमार्थशब्दवाच्य चिदानन्दैकस्वभाव परमात्मानमिति भावार्थः ॥२०४॥

**जिय! जे मुणि भावि परमप्प-पयासु सत्थु भावहिँ, ते सयलु मोहु-जिणेविणु परमत्थु बुज्झहिँ ॥२०४॥** हे जीव! जो कोई मुनि भावो मे इस परमात्मप्रकाश नामक शास्त्र का चिन्तन करते है, वे समस्त मोह को जीत कर परमतत्त्व को जानते हैं। अन्तरग-बहिरग परिग्रह के त्यागी जो कोई मुनिराज समस्तरागादि अपध्यान से रहित शुद्ध भाव से परमात्मस्वभाव के प्रकाशक इस 'परमात्मप्रकाश' ग्रन्थ का चिन्तन करते है, वे गुणविशिष्ट तपोधन निर्मोह परमात्मतत्त्व से विलक्षण सम्पूर्ण मोह को जीत कर चिदानन्द अखण्ड स्वभाव परमात्मा को अच्छी तरह जानते है। यह **भावार्थ** है ॥२०४॥

**अण्णु वि भत्तिए जे मुणहिँ इहु परमप्प-पयासु।**
**लोयालोय-पयासयरु पावहिँ ते वि पयासु ॥२०५॥**

अन्यदपि भक्त्या ये जानन्ति इम परमात्मप्रकाशम्।
लोकालोकप्रकाशकर प्राप्नुवन्ति तेऽपि प्रकाशम् ॥२०५॥

**अण्णु** वि इत्यादि। **अण्णु वि** अन्यदपि विशेषफलं कथ्यते। **भत्तिए जे मुणहिं** भक्त्या ये मन्यन्ते जानन्ति। कम्। **इहु परमप्पपयासु** इमं प्रत्यक्षीभूतं परमात्मप्रकाशग्रन्थमर्थतस्तु परमात्मप्रकाशशब्दवाच्य परमात्मतत्त्वं **पावहिं** प्राप्नुवन्ति **ते वि** तेऽपि। कम्। **पयासु** प्रकाशशब्दवाच्य केवलज्ञान तदाधारपरमात्मानं वा। कथभूतं परमात्मप्रकाशम्। **लोयालोयपयासयरु** अनन्तगुणपर्यायसहितत्रिकालविषयलोकालोकप्रकाशकमिति तात्पर्यम् ॥२०५॥

**अण्णु वि जे भत्तिए बुहु परमप्प-पयासु मुणंति, ते वि लोयालोय-पयासयरु पयासु पावंति** ।।२०५।। और भी जो कोई भव्यजीव भक्तिपूर्वक इस 'परमात्मप्रकाश' ग्रन्थ को जानते हैं, वे भी लोकालोक के प्रकाशक केवलज्ञान को प्राप्त करेंगे । परमात्मप्रकाश शब्द से वाच्य परमात्मतत्त्व भी है और यह ग्रन्थ भी । सो 'परमात्मप्रकाश' ग्रन्थ को पढ़ने वाले दोनों को ही प्राप्त करेंगे । प्रकाश नाम केवलज्ञान का भी है, उसका आधार है शुद्ध परमात्मा । अनन्त गुण पर्याय सहित तीन काल का जानने वाला जो लोकालोक का प्रकाशक आत्मद्रव्य है, उसे शीघ्र ही प्राप्त करेंगे ।।२०५।।

**जे परमप्प-पयासयहं अणुदिणु णाउ लयंति ।**
**तुट्टइ मोहु तडत्ति तहँ तिहुयण-णाह हवंति ।।२०६।।**

ये परमात्मप्रकाशस्य अनुदिन नाम गृह्णन्ति ।
त्रुटयति मोह झटिति तेषा त्रिभुवननाथा भवन्ति ।।२०६।।

**लयंति** गृह्णन्ति **जे** ये विवेकिन: **णाउ** नाम । कस्य । **परमप्पपयासयहं** व्यवहारेण परमात्मप्रकाशाभिधानग्रन्थस्य निश्चयेन तु परमात्मप्रकाशशब्दवाच्यस्य केवलज्ञानाद्यनन्त-गुणस्वरूपस्य परमात्मपदार्थस्य । कथम् । **अणुदिणु** अनवरतम् । तेषां किं फल भवति । **तुट्टइ** नश्यति । कोऽसौ । **मोहु** निर्मोहात्मद्रव्याद्विलक्षणो मोह: **तडत्ति** झटिति तहं तेषाम् । न केवल मोहो नश्यति **तिहुयणणाह हवंति** तेन पूर्वोक्तेन निर्मोहशुद्धात्मतत्त्व-भावनाफलेन पूर्व देवेन्द्रचक्रवर्त्यादिविभूतिविशेष लब्ध्वा पश्चाज्जिनदीक्षा गृहीत्वा च केवलज्ञानमुत्पाद्य त्रिभुवननाथा भवन्तीति भावार्थ ।।२०६।। एवं चतुर्विंशतिसूत्रप्रमित-महास्थलमध्ये परमात्मप्रकाशभावनाफलकथनमुख्यत्वेन सूत्रत्रयेण पञ्चमं स्थलं गतम् ।

**जे परमप्प पयासयहं अणुदिणु णाउ लयंति, तहँ मोहु तडत्ति तुट्टइ, तिहुयण-णाह हवंति** ।।२०६।। जो कोई विवेकीजन व्यवहार से इस 'परमात्मप्रकाश' नामक ग्रन्थ का तथा निश्चय से केवलज्ञानादि अनन्त गुणसहित परमात्मपदार्थ का सदैव नाम लेते हैं यानी अनवरत उसी का स्मरण करते है, उनका निर्मोह आत्मद्रव्य से विलक्षण मोह (मोहनीयकर्म) शीघ्र ही टूट जाता है और वे शुद्धात्मतत्त्व की भावना के फल से देवेन्द्र, चक्रवर्त्यादि की महनीय विभूति को पाकर, फिर जिनदीक्षा ग्रहण कर, केवलज्ञान उत्पन्न करके तीनों लोको के स्वामी होते हैं, यह **भावार्थ है** ।।२०६।। इस प्रकार चौबीस दोहों के महास्थल में परमात्मप्रकाश की भावना के फल के कथन की मुख्यता से तीन दोहों में पाँचवां अन्तरस्थल कहा ।

अथ परमात्मप्रकाशशब्दवाच्यो योऽसौ परमात्मा तदाराधकपुरुषलक्षणज्ञापनार्थं सूत्रत्रयेण व्याख्यानं करोति । तद्यथा—

अब परमात्मप्रकाश शब्द से वाच्य जो यह परमात्मा है, उसकी आराधना करने वाले पुरुषों के लक्षण जानने के लिए तीन दोहों में व्याख्यान करते हैं—

**जे भव-दुक्खहँ बीहिया पउ इच्छहिँ णिव्वाणु ।**
**इह परमप्प-पयासयहँ ते पर जोग्ग वियाणु ।।२०७।।**

ये भवदुःखेभ्यः भीता पद इच्छन्ति निर्वाणम् ।
इह परमात्मप्रकाशकस्य ते परं योग्या विजानीहि ।।२०७।।

**ते पर** त एव **जोग्ग वियाणु** योग्या भवन्तीति विजानीहि । कस्य । **इह परमप्प-पयासयहं** व्यवहारेणास्य परमात्मप्रकाशाभिधानग्रन्थस्य, परमार्थेन तु परमात्मप्रकाश-शब्दवाच्यस्य निर्दोषिपरमात्मनः । ते के । जे **बीहिया** ये भीताः । केषाम् । **भव-दुक्खहं** रागादिविकल्परहितपरमाह्लादरूपशुद्धात्मभावनोत्थपारमार्थिकसुखविलक्षणानां नारकादिभवदु खानाम् । पुनरपि कि कुर्वन्ति । **जे इच्छहिं** ये इच्छन्ति । किम् । **पउ** पद स्थानम् । **णिव्वाणु** निर्वृतिगतपरमात्माधारभूत निर्वाणशब्दवाच्य मुक्तिस्थान-मित्यभिप्राय. ।।२०७।।

**ते पर इह परमप्प-पयासयहँ जोग्ग वियाणु जे भव-दुक्खहँ बीहिया णिव्वाणु पउ इच्छहिं ।।२०७।।** व्यवहार से तो इस 'परमात्मप्रकाश' नामक ग्रन्थ के और निश्चयनय मे निर्दोष परमात्म-तत्त्व की भावना के वे ही योग्य है जो रागादिविकल्प रहित परम आह्लादरूप शुद्धात्मभावना से उत्पन्न हुए पारमार्थिक सुख से विलक्षण (विपरीत) नरकादि ससार के दु.खो से भयभीत है और जो निर्वाण पद की यानी मोक्षस्थान की अभिलाषा करते है ।।२०७।।

**जे परमप्पहँ भत्तियर विसय ण जे वि रमंति ।**
**ते परमप्प-पयासयहँ मुणिवर जोग्ग हवंति ।।२०८।।**

ये परमात्मनो भक्तिपरा विषयान् न येऽपि रमन्ते ।
ते परमात्मप्रकाशकस्य मुनिवरा योग्या भवन्ति ।।२०८।।

**हवंति** भवन्ति **जोग्ग** योग्या. । के **ते मुणिवर** मुनिप्रधानाः । के । **ते** ते पूर्वोक्ताः । कस्य योग्या भवन्ति । **परमप्पपयासयहँ** व्यवहारेण परमात्मप्रकाशसज्ञग्रन्थस्य परमार्थेन तु परमात्मप्रकाशशब्दवाच्यस्य शुद्धात्मस्वभावस्य । कथंभूता ये । जे **परमप्पहं भत्तियर** ये परमात्मनो भक्तिपराः । पुनरपि कि कुर्वन्ति ये । **विसय ण जे वि रमति** निर्विषयपरमात्मतत्त्वानुभूतिसमुत्पन्नातीन्द्रियपरमानन्दसुखरसास्वादतृप्ता. सन्तः मुलभा-न्मनोहरानपि विषयान्न रमन्त इत्यभिप्रायः ।।२०८।।

**जे परमप्पहँ भत्तियर, जे विसय ण वि रमंति, ते मुणिवर परमप्प-पयासयहँ जोग्ग हवंति ।।२०८।।** जो परमात्मा की भक्ति करने वाले है और जो विषय-कषायो मे नही रमते हैं, वे ही मुनीश्वर 'परमात्मप्रकाश' के अभ्यास के योग्य हैं । **भावार्थ**–व्यवहार से 'परमात्मप्रकाश' सज्ञक ग्रन्थ के और निश्चय नय से परमात्मप्रकाश शब्द से वाच्य शुद्धात्मस्वभाव की भक्ति मे जो तत्पर है वे

विषयातीत परमात्मतत्त्व की अनुभूति से उत्पन्न अतीन्द्रिय परमानन्द सुख के रसास्वाद से तृप्त हुए सुलभ मनोहर विषयों में रमण नहीं करते हैं, यह अभिप्राय है ॥२०८॥

**णाण-वियक्खणु सुद्ध-मणु जो जणु एहउ कोइ ।**
**सो परमप्प-पयासयहँ जोग्गु भणंति जि जोइ ॥२०९॥**

ज्ञानविचक्षणः शुद्धमना यो जन ईदृशः कश्चिदपि ।
तं परमात्मप्रकाशकस्य योग्यं भणन्ति ये योगिन. ॥२०९॥

**भणंति** कथयन्ति **जि जोइ** ये परमयोगिन । कं भणन्ति । **जोग्गु** योग्यम् । कस्य । **परमप्पपयासहं** व्यवहारनयेन परमात्मप्रकाशाभिधानशास्त्रस्य निश्चयेन तु परमात्मप्रकाशशब्दवाच्यस्य शुद्धात्मस्वरूपस्य । क पुरुषं योग्य भणन्ति । **सो** तम् । त कम् । **जो जणु एहउ कोइ** यो जन. इत्थभूत कश्चित् । कथंभूत । **णाणवियक्खणु** स्वसंवेदनज्ञानविचक्षण । पुनरपि कथंभूत । **सुद्धमणु** परमात्मानुभूतिविलक्षणरागद्वेषमोहस्वरूपसमस्तविकल्पजालपरिहारेण शुद्धात्मा इत्यभिप्राय: ॥२०९॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमाराधकपुरुषलक्षणकथनरूपेण सूत्रत्रयेण षष्ठमन्तरस्थलं गतम् ।

**जो जणु णाण वियक्खणु सुद्ध मणु कोइ एहउ, सो जि जोइ परमप्प-पयासयहँ जोग्गु भणंति** ॥२०९॥ जो मनुष्य स्वसंवेदनज्ञान से विचक्षण है और जिसका मन परमात्मानुभूति से विपरीत रागद्वेष मोहरूप समस्त विकल्पजाल के त्याग से शुद्ध है, ऐसा कोई भी हो, उसे योगीश्वर परमात्मप्रकाश की आराधना के योग्य कहते है । **भावार्थ**–व्यवहारनय से यह परमात्मप्रकाश नामक शास्त्र और निश्चयनय से परमात्मप्रकाश शब्द से वाच्य शुद्धात्मस्वरूप की आराधना करने के योग्य वे ही पुरुष है जो ज्ञान से विचक्षण है और मिथ्यात्वादि मल से रहित शुद्धमन है ॥२०९॥ इस प्रकार चौबीस दोहा प्रमाण महास्थल मे परमाराधक पुरुष के लक्षण तीन दोहो मे कह कर छठा अन्तरस्थल पूर्ण हुआ ।

अथ शास्त्रफलकथनमुख्यत्वेन सूत्रमेकं तदनन्तरमौद्धत्यपरिहारेण च सूत्रद्वयपर्यन्तं व्याख्यान करोति । तद्यथा—

अब शास्त्र के फल-कथन की मुख्यता से एक दोहा और औद्धत्य-परिहार की मुख्यता से दो दोहे–इसप्रकार तीन दोहे कहते हैं—

**लक्खण-छंद-विवज्जियउ एहु परमप्प-पयासु ।**
**कुणइ सुहावइँ भावियउ चउ-गइ-दुक्ख-विणासु ॥२१०॥**

लक्षणछन्दोविवर्जितः एष परमात्मप्रकाशः ।
करोति सुभावेन भावितः चतुर्गतिदुःखविनाशम् ॥२१०॥

लक्खरण इत्यादि । लक्खरणछंदविवज्जियउ लक्षणछन्दोविवर्जितोऽयम् । अयं कः । एहु परमप्पपयासु एष परमात्मप्रकाशः । एवंगुणविशिष्टोऽयं किं करोति । कुणइ करोति । कम् । चउगइदुक्खविरणासु चतुर्गतिदुःखविनाशम् । कथंभूतः सन् । भावियउ भावितः । केन । सुहावइं शुद्धभावेनेति । तथाहि । यद्यप्ययं परमात्मप्रकाशग्रन्थः शास्त्रक्रमव्यवहारेण दोहकछन्दसा प्राकृतलक्षणेन च युक्तः, तथापि निश्चयेन परमात्मप्रकाशशब्दवाच्यशुद्धात्मस्वरूपापेक्षया लक्षणछन्दोविवर्जितः । एवंभूत. सन्नयं किं करोति । शुद्धभावनया भावित सन् शुद्धात्मसंवित्तिसमुत्पन्नरागादिविकल्परहितपरमानन्दैकलक्षणसुखविपरीताना चतुर्गतिदुःखानां विनाशं करोतीति भावार्थः ॥२१०॥

**सुहावइं भावियउ लक्खरण-छंद-विवज्जियउ एहु परमप्प-पयासु चउगइ-दुक्ख-विरणासु कुणइ** ॥२१०॥ शुद्ध भावो से भावित और लक्षण छन्द से विवर्जित यह परमात्मप्रकाश चारों गतियो के दुःखो का विनाश करता है । **भावार्थ**-*यद्यपि यह परमात्मप्रकाश ग्रन्थ शास्त्रक्रमव्यवहार से प्राकृत* लक्षणों से युक्त दोहा छन्दो में है तथापि निश्चय से परमात्मप्रकाश शब्द से वाच्य शुद्धात्म स्वरूप की अपेक्षा लक्षण और छन्दों से रहित है । ऐसा होकर यह क्या करता है ? शुद्ध भावों से भावित करने पर शुद्धात्मज्ञान से उत्पन्न रागादिविकल्परहित परमानन्दलक्षण सुख से विपरीत चारो गतियो के दुःखों का विनाश करता है, यह भावार्थ है ॥२१०॥

अथ श्रीयोगीन्दुदेव औद्धत्यं परिहरति—

अब श्री योगीन्दुदेव औद्धत्य का परिहार करते है—

**इत्थु ण लेवउ पंडियहिँ गुण-दोसु वि पुणरुत्तु ।**
**भट्ट-पभायर-कारणइँ मइँ पुणु-पुणु वि पउत्तु ॥२११॥**

अत्र न ग्राह्यः पण्डितैः गुणो दोषोऽपि पुनरुक्त ।
भट्टप्रभाकरकारणेन मया पुन. पुनरपि प्रोक्तम् ॥२११॥

इत्थु इत्यादि । **इत्थु** अत्र ग्रन्थे **ण लेवउ** न ग्राह्यः । कैः । **पंडियहिं** पण्डितैर्विवेकिभिः । कोऽसौ । **गुणदोसु वि** गुणो दोषोऽपि । कथंभूत. । **पुणरुत्तु** पुनरुक्तः । कस्मान्न ग्राह्यः । यतः **मइं पुणु-पुणु वि पउत्तु** मया पुन.-पुनः प्रोक्तम् । किं तत् । वीतरागपरमात्मतत्त्वम् । किमर्थम् । **भट्टपभायरकारणइं** प्रभाकरभट्टनिमित्तेनेति । अत्र भावनाग्रन्थे **समाधिशतकादिवत्** पुनरुक्तदूषणं नास्ति इति । तदपि कस्मादिति चेत् । अर्थं पुनःपुनश्चिन्तनलक्षणमिति वचनादिति मत्वा **प्रभाकरभट्टव्याजेन** समस्तजनाना सुखबोधार्थं बहिरन्त परमात्मभेदेन तु त्रिविधात्मतत्त्वं बहुधाप्युक्तमिति भावार्थः ॥२११॥

**इत्थु पुणवत्तु गुणदोसु वि पंडियहिं ण लेवउ । मइँ भट्टपभायर-कारणइँ पुणु पुणु वि पउत्तु ।।२११।।** इस ग्रन्थ के पुनरुक्ति दोष को पण्डितजन ग्रहण नहीं करें क्योंकि मैंने प्रभाकरभट्ट को समझाने के लिए वीतराग परमात्म तत्त्व का कथन बार-बार किया है ।।२११।। **भावार्थ—**'समाधिशतक' आदि के समान इस भावना ग्रन्थ में भी पुनरुक्ति का दोष नहीं लगता। फिर भी ऐसा क्यों हुआ ? तत्त्व के अर्थ पर बार-बार विचार करना इसी अभिप्राय से प्रभाकरभट्ट के बहाने सभी जीवों को आसानी से बोध हो जाए इसलिए बार-बार बहिरात्मा, अन्तरात्मा और परमात्मा के भेद से त्रिविधआत्मतत्त्व का कथन किया है ।।२११।।

**जं मइँ किं पि विजंपियउ जुत्ताजुत्तु वि इत्थु ।**
**तं वर-णाणि खमंतु महु जे बुज्झहिँ परमत्थु ।।२१२।।**

यन्मया किमपि विजल्पित युक्तायुक्तमपि अत्र ।
तद् वरज्ञानिन क्षाम्यन्तु मम ये बुध्यन्ते परमार्थम् ।।२१२।।

**जं** इत्यादि । **मइं किं पि विजंपियउ** यन्मया किमपि जल्पितम् । किं जल्पितम् । **जुत्ताजुत्तु वि** शब्दविषये अर्थविषये वा युक्तायुक्तमपि **इत्थु** अत्र परमात्मप्रकाशाभिधानग्रन्थे **खमंतु** क्षमा कुर्वन्तु । कि तत् । पूर्वोक्तदूषणम् । के । **वरणाणि** वीतरागनिर्विकल्पस्व सवेदनज्ञानयुक्ता विशिष्टज्ञानिनः । कस्य । **महु** मम **योगीन्दु**देवाभिधानस्य । कथंभूता ये ज्ञानिनः । **जे बुज्झहि** ये केचन बुध्यन्ते जानन्ति । कम् । **परमत्थु** रागादिदोषरहितम-नन्तज्ञानदर्शनसुखवीर्यसहित च परमार्थशब्दवाच्य शुद्धात्मानमिति भावार्थः ।।२१२।। इति सूत्रत्रयेण सप्तममन्तरस्थल गतम् । एवं सप्तभिरन्तरस्थलैश्चतुर्विंशतिसूत्रप्रमित महा-स्थल समाप्तम् ।

**इत्थु जं मइँ किं पि जुत्ताजुत्तु वि विजंपियउ तं जे वरणाणि परमत्थु बुज्झहिँ, महु खमंतु ।।२१२।।** यहाँ इस ग्रन्थ में जो मेरे द्वारा (योगीन्दुदेव द्वारा) कुछ भी युक्त अथवा अयुक्त शब्द कहा गया हो तो परमार्थ के जानने वाले श्रेष्ठ ज्ञानीजन उसके लिए मुझे क्षमा करें। **भावार्थ—** जो कदाचित् शब्द मे, अर्थ में, छन्द-अलकार मे मुझसे कोई दोष बन गया हो या अयुक्त कथन हुआ हो तो वीतरागनिर्विकल्प स्वसंवेदनज्ञान से युक्त विशिष्ट ज्ञानीजन उस दोष को ग्रहण न करें और मुझे इसके लिए क्षमा प्रदान करे। वे विशिष्टज्ञानीजन रागादि दोषरहित है, शुद्धात्मा को अच्छी तरह जानते हैं और अनन्त ज्ञान, दर्शन, सुख और वीर्य सहित है ।।२१२।। इन दोहों मे सातवाँ अन्तर-स्थल पूर्ण हुआ। इस प्रकार चौबीस दोहों में सात अन्तरस्थल वाला महास्थल पूर्ण हुआ।

**अथैकवृत्तेन प्रोत्साहनार्थ पुनरपि फलं दर्शयति—**

अब एक स्रग्धरा छन्द में प्रोत्साहनार्थ फिर इस ग्रंथ के पढने का फल बताते हैं—

**जं तत्तं णाण-रूवं परम-मुणि-गणा णिच्च झायंति चित्ते ।**
**जं तत्तं देह-चत्तं णिवसइ भुवणे सव्व-देहीण देहे ।।**

**जं तत्तं दिव्व-देहं तिहुवण-गुरुगं सिज्झए संत-जीवे ।**
**तं तत्तं जस्स सुद्धं फुरइ णिय-मणे पावए सो हि सिद्धि ।।२१३।।**

यत् तत्त्व ज्ञानरूप परममुनिगणा नित्यं ध्यायन्ति चित्ते ।
यत् तत्त्वं देहत्यक्तं निवसति भुवने सर्वदेहिनां देहे ।।
यत् तत्त्व दिव्यदेहं त्रिभुवनगुरुकं सिध्यति शान्तजीवे ।
तत् तत्त्वं यस्य शुद्धं स्फुरति निजमनसि प्राप्नोति स हि सिद्धिम् ।।२१३।।

**पावए सो** प्राप्नोति स **हि** स्फुटम् । काम् । **सिद्धि** मुक्तिम् । यस्य किम् । **जस्स णियमणे फुरइ** यस्य निजमनसि स्फुरति प्रतिभाति । कि कर्मतापन्नम् । **तं तत्तं** त तत्त्वम् । कथंभूतम् । **सुद्धं** रागादिरहितम् । पुनरपि कथभूतं यत् । **जं तत्तं णाणरूवं** यदात्मतत्त्वं ज्ञानरूपम् । पुनरपि किविशिष्टं यत् । **णिच्च झायंति** नित्य ध्यायन्ति । क्व **चित्ते** मनसि । के ध्यायन्ति । **परममुणिगणा** परममुनिसमूहाः । पुनरपि किविशिष्ट यत् । **जं तत्तं देहचत्तं** यत्परमात्मतत्त्वं देहत्यक्तं देहाद्भिन्नम् । पुनरपि कथंभूत यत् । **णिवसइ** निवसति । **क्व** । **भुवणे सव्वदेहीण** देहे त्रिभुवने सर्वदेहिनां ससारिणां देहे । पुनरपि । कीदृशं यत् । **जं तत्तं दिव्वदेहं** यत् शुद्धात्मतत्त्व दिव्यदेह दिव्य केवलज्ञानादिशरीरम् । शरीरमिति कोऽर्थः । स्वरूपम् । पुनश्च कीदृश यत् । **तिहुयणगुरुगं** अव्याबाधानन्तसुखादिगुणेन त्रिभुवनादपि गुरुं पूज्यमिति त्रिभुवनगुरुकम् । पुनरपि किरूप यत् । **सिज्झए** सिद्ध्यति निष्पत्ति याति । क्व । **संतजीवे** ख्यातिपूजालाभादिसमस्तमनोरथविकल्पजालरहितत्वेन परमोपशान्तजीवस्वरूपे इत्यभिप्रायः ।।२१३।।

**जं तत्तं णाणरूवं परममुणिगणा णिच्च चित्ते झायंति, जं तत्तं भुवणे सव्व देहीण देहे णिवसइ, देहचत्तं, जं तत्तं दिव्वदेहं तिहुवण गुरुगं संतजीवे सिज्झए, तं तत्तं सुद्धं जस्स णियमणे फुरइ सो हि सिद्धिं पावए ।।२१३।।** जो आत्मतत्त्व ज्ञानरूप है और जिसे परम मुनीश्वर सदैव अपने चित्त में ध्याते हैं, जो तत्त्व इस लोक मे सब प्राणियो के शरीर मे विद्यमान है और स्वय देह से रहित है, जो तत्त्व केवलज्ञान और आनन्दरूप अनुपम देह को धारण करता है और तीन भुवन मे श्रेष्ठ है, जिसकी आराधना कर शान्तपरिणामी सन्तपुरुष सिद्धिपद पाते है, ऐसा यह चैतन्यतत्त्व—निज आत्मतत्त्व जिसके मन मे प्रकाशमान हो जाता है, वह अवश्य ही सिद्धि को प्राप्त करता है। **भावार्थ—**अव्याबाध अनन्तसुख आदि गुणों से वह तत्त्व तीनलोक का गुरु है और ख्याति-पूजा-लाभादि समस्त मनोरथों के विकल्पसमूह से रहित परम शान्तभाव को प्राप्त जोवो (सत्पुरुषों) के हृदय में ही वह तत्त्व सिद्ध होता है, यह **अभिप्राय है** ।।२१३।।

अथ ग्रन्थस्यावसाने मङ्गलार्थमाशीर्वादरूपेण नमस्कारं करोति—

अब ग्रन्थ की समाप्ति पर अन्तमङ्गल के लिए आशीर्वादरूप नमस्कार करते हैं—

**परम-पय-गयाणं भासओ दिव्व-काओ,**
**मणसि मुणिवराणं मुक्खदो दिव्व-जोओ ।**
**विसय-सुह-रयाणं दुल्लहो जो हु लोए,**
**जयउ सिव-सरूवो केवलो को वि बोहो ।।२१४।।**

परमपदगतानां भासको दिव्यकायः,
मनसि मुनिवराणां मोक्षदो दिव्ययोगः ।
विषयसुखरतानां दुर्लभो यो हि लोके,
जयतु शिवस्वरूपः केवलः कोऽपि बोधः ।।२१४।।

**जयउ** सर्वोत्कर्षेण वृद्धिं गच्छतु । कोऽसौ । **दिव्वकाओ** परमौदारिकशरीराभिधान-दिव्यकायस्तदाधारो भगवान् कथंभूतः । **भासओ** दिवाकरसहस्रादप्यधिकतेजस्त्वाद्भासकः प्रकाशकः । केषां काय । **परमपयगयाणं** परमानन्तज्ञानादिगुणास्पदं यदर्हत्पदं तत्रगतानाम् । न केवल दिव्यकायो जयतु । **दिव्वजोओ** द्वितीयशुक्लध्यानाभिधानो वीतरागनिर्विकल्पसमाधिरूपो दिव्ययोगः । कथंभूतः । **मोक्खदो** मोक्षप्रदायकः । क्व जयतु । **मणसि** मनसि । केषाम् । **मुणिवराणं** मुनिपुङ्गवानाम् । न केवल योगो जयतु । **केवलो को वि बोहो** केवलज्ञानाभिधान. कोऽप्यपूर्वो बोधः । कथंभूत. । **सिवसरूवो** शिवशब्दवाच्यं यदनन्तसुख तत्स्वरूप. । पुनरपि कथंभूतः । **दुल्लहो जो हु लोए** दुर्लभो दुष्प्राप्यः य. स्फुटम् । क्व । लोके । केषां दुर्लभः । **विसयसुहरयाणं** विषयसुखातीतपरमात्मभावनोत्पन्नपरमानन्दैकरूपसुखास्वादरहितत्वेन पञ्चेन्द्रियविषयासक्तानामिति भावार्थः ।।२१४।।

**परमपयगयाणं भासओ दिव्व-काओ, मुणिवराणं मणसि दिव्व जोओ मुक्खदो । जो हु लोए विसयसुहरयाणं दुल्लहो केवलो को वि बोहो सिवसरुवो जयउ** ।।२१४।। जो अरहन्तपद को प्राप्त हुए जीवों का प्रकाशमान परमौदारिक शरीर है यानी जो परमपद को प्राप्त हुए केवली हैं उनको तो साक्षात् दिव्यकाय पुरुषाकार भासता है और जो महामुनि हैं, उनके मन में द्वितीयशुक्लध्यानरूप वीतराग निर्विकल्पसमाधिरूप भास रहा है और मोक्ष का देने वाला है; जो लोक में परमानन्द अतीन्द्रियसुख से विपरीत पाँचों इन्द्रियों के विषयों मे आसक्त रहने वालो के लिए दुर्लभ है, जिसका केवलज्ञान स्वभाव है, ऐसी अपूर्व ज्ञानज्योति सदा कल्याणरूप है। **भावार्थ** यह है कि इस लोक मे विषयी जीव जिसे प्राप्त नही कर सकते, ऐसा वह सदाकल्याणरूप परमात्म तत्त्व जयवन्त हो ।।२१४।।

इति **'पर जाणंतु वि परममुणि परसंसग्गु चयंति'** इत्याद्येकाशीतिसूत्र पर्यन्तं सामान्यभेदभावना, तदनन्तरं **'परमसमाहि'** इत्यादि चतुर्विंशतिसूत्रपर्यन्तं महास्थलं, तदनन्तरं वृत्तद्वयं चेति सर्वसमुदायेन सप्ताधिकसूत्रशतेन **द्वितीयमहाधिकारे** चूलिका गतेति ।

इसप्रकार 'पर जाणंतु वि परममुणि परसंसग्गु चयंति' इत्यादि ८१ दोहासूत्रों तक सामान्य भेद भावना, अनन्तर 'परमसमाहि' इत्यादि २४ दोहासूत्रों तक महास्थल, फिर दो छन्दों व समुदाय-रूप १०७ दोहासूत्रों सहित **दूसरे महाधिकार** में चूलिका पूर्ण हुई।

एवमत्र परमात्मप्रकाशाभिधानग्रन्थेन प्रथमस्तावत् **'जे जाया झाणग्गियए'** इत्यादि त्रयोविंशत्यधिकसूत्रशतेन प्रक्षेपकत्रयसहितेन प्रथममहाधिकारो गतः। तदनन्तरं चतुर्दशाधिकशतद्वयेन प्रक्षेपकपञ्चकसहितेन द्वितीयोऽपि महाधिकारो गतः। एवं पञ्चाधिकचत्वारिंशत्सहितशतत्रयप्रमितश्रीयोगीन्दुदेवविरचितदोहकसूत्राणां विवरणभूता **परमात्मप्रकाशवृत्तिः समाप्ता ॥**

इसप्रकार **परमात्मप्रकाश** ग्रन्थ में पहले 'जे जाया झाणग्गियए' इत्यादि एक सौ तेईस दोहे व तीन प्रक्षेपक कुल १२६ दोहों मे **प्रथम महाधिकार** पूर्ण हुआ। फिर २१४ दोहों व पांच प्रक्षेपकों सहित कुल २१६ दोहों में दूसरा महाधिकार पूर्ण हुआ। इसप्रकार श्री योगीन्दुदेव विरचित ३४५ तीन सौ पैतालीस दोहों वाले परमात्मप्रकाश ग्रन्थ की ब्रह्मदेवकृत 'परमात्मप्रकाशवृत्ति' समाप्त हुई।

# [ टीकाकारस्यान्तिमकथनम् ]

अत्र ग्रन्थे प्रचुरेण पदानां सन्धिर्न कृतः, वाक्यानि च भिन्नभिन्नानि कृतानि सुखबोधार्थम्। किं च परिभाषासूत्र पदयोः संधिर्विवक्षितो न समासान्तर तयोः तेन कारणेन लिङ्गवचनक्रियाकारकसंधिसमासविशेष्यविशेषणवाक्यसमाप्त्यादिकं दूषणमत्र न ग्राह्यं विद्वद्भिरिति।

यहाँ ग्रन्थ में प्रायः पदों की सन्धि नही की गई है और सरलता से समझ में आने के लिए वाक्य भी भिन्न-भिन्न रखे गये हैं। अतः विद्वानों को यहाँ लिंग, वचन, क्रिया, कारक, संधि, समास, विशेष्य-विशेषण, वाक्य - समाप्ति आदि के दोष नही ग्रहण करने चाहिए (क्योंकि यह ग्रन्थ बाल-बुद्धियों को समझाने के लिए लिखा गया है)।

इदं परमात्मप्रकाशवृत्तेर्व्याख्यानं ज्ञात्वा किं कर्तव्यं भव्यजनैः। सहजशुद्धज्ञानानन्दैकस्वभावोऽहं, निर्विकल्पोऽहं, उदासीनोऽहं, निजनिरञ्जनशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपनिश्चयरत्नत्रयात्मनिर्विकल्पसमाधिसंजातवीतरागसहजानन्दरूपसुखानुभूतिमात्रलक्षणेन स्वसंवेदनज्ञानेन स्वसंवेद्यो गम्यः प्राप्यो भरितावस्थोऽहं, रागद्वेषमोहक्रोध-

मानमायालोभपञ्चेन्द्रियविषयव्यापारमनोवचनकायव्यापारभावकर्मद्रव्यकर्मनोकर्मख्याति-पूजालाभदृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानमायामिथ्याशल्यत्रयादिसर्वविभावपरिणामरहितशून्योऽहं, जगत्त्रये कालत्रयेऽपि मनोवचनकायैः कृतकारितानुमतैश्च शुद्धनिश्चयनयेन । तथा सर्वेऽपि जीवाः, इति निरन्तरं भावना कर्तव्येति ॥ ग्रन्थसंख्या ॥४०००॥

इस परमात्मप्रकाशवृत्ति का व्याख्यान जान कर भव्यजनों को ऐसा विचार करना चाहिए कि मैं सहजशुद्ध ज्ञानानन्दस्वभावी हूँ, निर्विकल्प हूँ, उदासीन हूँ, निज निरंजन शुद्धात्म सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्ररूप निश्चय रत्नत्रयमयी निर्विकल्प समाधि से उत्पन्न वीतराग सहजानन्द रूप आनन्दानुभूति मात्र लक्षण वाले स्वसंवेदनज्ञान से ही स्वसंवेद्य गम्य हूँ, अन्य उपायों से नही । उस निर्विकल्प निजानन्दज्ञान से ही मैं परिपूर्ण हूँ । रागद्वेष, मोह, क्रोध, मान, माया, लोभ, पाँचो इन्द्रियो के विषय-व्यापार, मन-वचन-काय के व्यापार, द्रव्यकर्म, भावकर्म, नोकर्म, ख्याति-पूजा-लाभ, देखे-सुने और अनुभूत भोगो की आकाक्षा रूप निदानबन्ध, माया, मिथ्या इन तीन शल्यों आदि सर्व विभाव परिणामो से रहित शून्य हूँ । तीनलोक, तीनकाल में, मनवचनकाय से, कृतकारित अनुमोदना से शुद्धनिश्चयनय से ऐसा ही हूँ तथा सभी जीव ऐसे हैं । सदैव ऐसी भावना करनी चाहिए ।

**पंडवरामहिं णरवरहिं पुज्जिउ भत्तिभरेण ।**
**सिरिसासणु जिणभासियउ णंदउ सुक्खसएहिं ॥१॥**

[ पाण्डवरामैः नरवरैः पूजित भक्तिभरेण ।
श्रीशासन जिनभाषित नन्दतु सुखशतैः ॥१॥]

श्रीरामचन्द्र और पाण्डवो तथा अन्य भी अनेक नरश्रेष्ठो से भक्तिपूर्वक पूजित यह जिन-भाषित शासन सैकडो मुखों से वृद्धि को प्राप्त हो ॥१॥

## इति श्रीब्रह्मदेवविरचिता परमात्मप्रकाशवृत्तिः समाप्ता

॥ इसप्रकार श्री ब्रह्मदेव विरचित परमात्मप्रकाशवृत्ति पूर्ण हुई ॥

# ❋ परमात्मप्रकाशदोहादीनां वर्णानुक्रमसूची ❋